# DHARMAKUTAM

## VOL. II.

# AYODHYAKANDA

## PART I.

BY

**TRYAMBAKARAYA MAKHI.**



SRIRANGAM:

SRI VANI VILAS PRESS.

1924

*Copyright Registered.*

॥ श्रीः ॥

# ॥ धर्माकूतम् ॥

तञ्जानगराधीशस्यैकोजिमहाराजस्य मन्त्रिणो गङ्गाधराध्वरिणः पुत्रेण शहजिशरभोजिमहीपालयोरमात्येन

**व्यङ्कटरायमखिना**

विरचितम् ।

ॐ

## २. अयोध्याकाण्डः

(प्रथमो भागः ।)

ॐ

श्रीरङ्गम्

श्रीवाणीविलासमुद्रायन्त्रालयः ।

॥ श्रीः ॥

# ॥ धर्माकूतम् ॥

## अयोध्याकाण्डः ॥

अथ श्रीरामचरितवर्णनमुखेन धर्मनिरूपणाय प्रवृत्तो भगवान्वाल्मीकिः, भगवतो दाशरथेरवतरणप्रभृतिदार-परिग्रहपर्यन्तचरितवर्णनमुखेन धर्मान्प्रतिपाद्य तदनन्त-रचरितवर्णनमुखेन धर्मान्प्रतिपादयितुमयोध्याकाण्डमार-ब्धवान् । तत्र प्रथमे सर्गे—

गच्छता मातुलकुलं भरतेन तदानघः ।
शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥

एवं प्रीतिपुरस्कृतेन शत्रुघ्नेन सह मातुलकुलं गतो भरतः मातुलेनाश्वपतिना तत्तत्समयोचिताभीष्टप्रदानादिना पुत्राधिकस्नेहेन लालितस्तत्रैव सुखमुवास । श्रीरामो-

ऽपि प्रीतिविषयेषु चतुर्ष्वपि पुत्रेषु, स्वयंभूरिव गुणवत्तरः उदीर्णरावणवधायावतीर्णः, परिचर्यादिना पितुरत्यन्तं प्रीतिकरो बभूव ॥

स हि रूपोपपन्नश्च वीर्यवाननसूयकः ।
भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥

स तु नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते ।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥

कथंचिदुपकारेण कृतेनैकेन तुष्यति ।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥

शीलवृद्धैर्वयोवृद्धैर्ज्ञानवृद्धैश्च सज्जनैः ।
कथयन्नास्त वै नित्यमस्रयोग्यान्तरेष्वपि ॥

बुद्धिमान्मितराभाषी पूर्वभाषी प्रियंवदः ।
वीर्यवान्न तु वीर्येण महता स्वेन विस्मितः ॥

न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः ।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जते ॥

सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ।
दीनानुकम्पी धर्मात्मा नित्यं प्रग्रहवाञ्शुचिः ॥

कुलोचितमतिः क्षात्रं धर्मं स्वं बहु मन्यते ।
मन्यते परया कीर्त्या महत्स्वर्गफलं ततः ॥

नाश्रेयसि रतो विद्वान्न विरुद्धकथारुचिः ।
उत्तरोत्तरयुक्तौ तु वक्ता वाचस्पतिर्यथा ॥

अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित् ।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः ॥

स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ।
बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥

सम्यग्विद्याव्रतस्नातो यथावत्साङ्गवेदवित् ।
इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥

कल्याणाभिजनः साधुरदीनः सत्यवागृजुः ।
वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः ॥

धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान् ।
लौकिके समयाचारे कृतकल्पो विशारदः ॥

अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान् ॥

अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ।
दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचाः ॥

निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित् ।
शास्त्रज्ञश्च कृतज्ञश्च पुरुषान्तरकोविदः ॥

यः प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणः ।
सत्संग्रहप्रग्रहणे स्थानविनिग्रहस्य च ॥

आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मवित् ।
श्रैष्ठ्यं शास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च ॥

अर्थधर्मौ च संगृह्य सुखतन्त्रो न चालसः ।
वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित् ॥

आरोहे विनये चैव युक्तो वारणवाजिनाम् ।
धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः ॥

अभियाता प्रहर्ता च सेनानयविशारदः ।
अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥

न चावमन्ता भूतानां न च कालवशानुगः ।
एवं श्रेष्ठगुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥

संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्येणापि शचीपतेः ॥

तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः ।
गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥

तमेवं वृत्तसंपन्नमप्रधृष्यपराक्रमम् ।
लोकपालोपमं नाथमकामयत मेदिनी ॥

अत्र ऐवंगुणाढ्यस्यैव मेदिनीमनोविषयत्वप्रतिपादनेन एतादृश एव महीपतिः कर्तव्य इति सूचितम् । तथा च याज्ञवल्क्यः— 'महोत्साहः स्थूललक्षः कृतज्ञो

वृद्धसेवकः। विनीतः सत्त्वसंपन्नः कुलीनः सत्त्ववाञ्शुचिः॥ अदीर्घसूत्रो द्युतिमान्न क्षुद्रोऽपरुषस्तथा। धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॥ स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च। विनीतस्त्वथ वार्त्तायां कार्यश्चैव नराधिपः' इति। राजधर्मेऽपि— 'कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम्। सर्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं सहजं तथा॥ कृतज्ञं बलवन्तं च क्षान्तं दान्तं जितेन्द्रियम्। अलुब्धं लब्धसंतुष्टं स्वामिमित्रबुभूषकम्॥ सचिवं देशकालज्ञं सत्त्वसंग्रहणे रतम्। सततं युक्तमनसं हितैषिणमतन्द्रितम्॥ युक्ताचारं स्वविषये संधिविग्रहकोविदम्। राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियम्॥ खातकं व्यूहतत्त्वज्ञं बलहर्षणकोविदम्। इङ्गिताकारतत्त्वज्ञं पात्रापात्रविशारदम्॥ हस्त्यश्वशिक्षाततत्त्वज्ञमहंकारविवर्जितम्। प्रगल्भं दक्षिणं दान्तं बलिनं युक्तिकारिणम्॥ शुद्धं चौक्षसमाकीर्णं सुवेषं सुखदर्शनम्। नायकं नीतिकुशलं गुणचेष्टासमन्वितम्॥ अस्तब्धं प्रसृतं श्लक्ष्णं मृदुवादिनमेव च। धीरं श्लक्ष्णं

महर्धि च देशकालोपपादकम् ॥ सचिवं यः प्रकुरुते न चैनमवमन्यते । तस्य विस्तीर्यते राष्ट्रं ज्योत्स्ना ग्रहपतेरिव ॥ एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः । एष्टव्यो धर्मपरमः प्रजापालनतत्परः ॥ धीरोऽमर्षः शुचिस्तीक्ष्णः काले पुरुषकारवित् । शुश्रूषुः श्रुतवाञ्श्रोताप्यूहापोहविशारदः ॥ मेधावी धारणायुक्तो यथायुक्तोपपादकः । दान्तः सदा प्रियाभाषी क्षमावांश्च विपर्यये ॥ दानच्छेदे स्वयंकारी साध्वाचारः सुदर्शनः । आर्तहस्तप्रदो नित्यमात्मामात्यो नये रतः ॥ नाहंवादी न निर्द्वन्द्वो न यत्किंचनकारकः । कृते कर्मण्यमात्यानां कर्ता भृत्यजनप्रियः ॥ संगृहीतजनः स्तब्धः प्रसन्नवदनः सदा । सदा भृत्यजनावेक्षी अक्रोधी सुमहामनाः ॥ युक्तदण्डो न निर्दण्डो धर्मकार्यानुशासकः । चारनेत्रः परावेक्षी धर्मार्थकुशलः सदा ॥ राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत्' इति । एवं धर्मप्रधानेषु स्मृतीतिहासपुराणेषूक्तगुणविशिष्टो राजैव एष्टव्य इत्युक्तम् । अर्थप्रधाने कामन्दकीये नीतिशास्त्रेऽपि एते गुणा आवश्यकत्वेनोक्ताः— 'कुलं सत्यं वयः

शीलं दाक्षिण्यं क्षिप्रकारिता । दैवसंपन्नता बुद्धिरक्षुद्रपरिवारिता ॥ शक्यसामन्तता चैव तथा च दृढभक्तिता । दीर्घदर्शित्वमुत्साहः शुचिता स्थूललक्षता ॥ विनीतता धार्मिकता गुणाः साध्वाभिगामिकाः । वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान्वशी ॥ नेता दण्डस्य निपुणः कृतविद्यः सुविग्रहः । पराभियोगप्रसहो दृष्टसर्वप्रतिक्रियः ॥ परच्छिद्रान्ववेक्षी च संधिविग्रहतत्त्ववित् । गूढमन्त्रप्रचारश्च देशकालविभागवित् ॥ आदाता सम्यगर्थानां विनियोक्ता च पात्रवित् । क्रोधलोभभयद्रोहस्तम्भचापलवर्जितः ॥ परोपतापपैशुन्यमात्सर्येर्ष्यानृतातिगः । वृद्धोपदेशसंपन्नः शुक्लो मधुरदर्शनः ॥ गुणानुरागी स्मितवागात्मसंपत्प्रकीर्तिता । इत्यादिगुणसंपन्ने लोकयात्रा विदुः स्थिरा ॥ निर्वृतः पितरो वास्ते यत्र लोकः स पार्थिव' इति ॥ एते राजगुणाः श्रीराम एव तिष्ठन्ति नेतरत्र । अत एव सर्वोत्कृष्टे दशरथे धर्मतो राज्यं पुत्रवत्परिपालयितरि सत्यपि जनानां स्वत एव रामेऽभिलाषो बभूव । अयं चार्थो द्वितीयसर्गे

पौरवाक्यैः स्पष्टः । अत्र स हि रूपोपपन्नश्चेत्यारभ्य, अकामयत मेदिनीत्यन्तेन, श्रीरामभद्रस्य गुणाः साकल्येन प्रतिपादिताः । संस्कारास्तु सम्यग्विद्याव्रतस्नात इत्यादिना स्नानान्ताः कतिपया एव वचनप्रतिपादिताः । नन्वत्र 'अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः' इत्यादि युद्धकाण्डस्थसीतावचनम् । तथापि तेषां राज्यपरिपालनानुपयोगादिति चेत् तर्हि स्नानान्तानां संस्काराणां वा कथमुपयोग इति चेत्, स्नानान्तैः संस्कारैरसंस्कृतस्य राज्यानर्हत्वात् आश्रमधर्मेष्वधिकाराभावाच्च सर्वत्र स्नानान्तसंस्कारा उपयुक्ता इति स्नानान्ता एव संस्काराः प्रतिपादिताः । स्नानान्तसंस्काराणां सर्वत्रोपयोगश्च आपस्तम्बाचार्यैरुक्तः 'सर्वेषामुपनयनप्रभृत्याचार्यकुले वासः सर्वेषामनूत्सर्गो विद्यायाः, बुद्ध्वा कर्माणि यत्कामयेत तदारभेत' इति। अस्यार्थः— सर्वाश्रमिणामुपनयनप्रभृत्याचार्यकुले वासः समानः । यतः सर्वाश्रमाणां विद्याया अपरित्यागोऽपेक्षितः। अतश्च आचार्यकुलाद्विद्यामधीत्य कर्माणि स्वरूपतः फलतोऽधिकारतश्च विविच्य बुद्ध्वा स्वस्वशक्त्यानुष्ठेया इति ।

एतदभिप्रायेणैव नैव स्नानान्तरसंस्कारमात्रप्रतिपादनमत्र भगवता वाल्मीकिना कृतम्। गुणास्तु सर्वेऽपि राज्यपरिपालनेऽपेक्षिता इति साकल्येन प्रतिपादिताः। न केवलमैहिकराज्यपरिपालनार्था एव गुणाः संस्काराश्च, अपि तु, आमुष्मिकब्रह्मलोकादिसाधका अपि भवन्ति। तथा च गौतमः— 'गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनम्, चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषां चाष्टका पार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्थाः अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणम् चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्तहविर्यज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोढशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्तसोमसंस्थाः इत्येते चत्वारिंशत्संस्काराः। अथाष्टावात्मगुणाः— दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति। यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणः सालोक्यं च

गच्छति। यस्य तु खलु चत्वारिंशत्संस्काराणामेकदेशोऽपि अष्टावात्मगुणाः अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति' इति। गौतमसूत्रस्यायमभिप्रायः—यस्य चत्वारिंशत्संस्कारा अष्टावात्मगुणास्तस्य ब्रह्मलोकावाप्तिरनुक्तसिद्धैव। यस्य चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न तस्य ब्रह्मलोकावाप्तिः। चत्वारिंशति संस्कारेषु गृहस्थ एवाधिकारी। यस्त्वेतेषां साकल्येनानुष्ठानेऽशक्तः तस्य ब्रह्मचारिवानप्रस्थयतीनां च स्वस्वाश्रमविहितानां यथाशक्त्यवश्यानुष्ठानेऽपि दयाद्यात्मगुणानां साकल्येन सत्त्वे ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति। ननु आचार्यैः संस्काराणामेकदेशोऽपीत्युक्तम्, शक्त्या सर्वेऽपि संस्काराः कर्तव्या इति कथमुक्तमिति चेत्तत्र स्नानान्तसंस्काराणां सर्वाश्रमाधिकारसंपादकत्वात् तेष्वेकदेशानुष्ठानेनाश्रमधर्मेऽधिकाराभावात्ते सर्वे अवश्यमनुष्ठेया एव। आश्रमपरिग्रहोत्तरं तत्तदाश्रमे विहितसंस्काराणां मध्ये शक्यानां परित्यागे प्रत्यवायो भवति। तथा चाथर्वणी श्रुतिः—

'यस्याग्निहोत्रमदर्शमपौर्णमासमनाग्रयणमतिथिवर्जितं च अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति' इति। बोधायनोऽपि 'यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च। विपथस्थो न हि स्वर्गं गच्छेत्तु पतितो हि सः' इति। अतः स्वस्वाश्रमविहितसंस्कारापरित्यागेनावश्यानुष्ठेया इति शक्यसर्वानुष्ठानमेव सूत्रस्थैकदेशशब्दार्थ इति न विरोधः। तथा च मनुः— 'अधीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्'। अत्र सूत्रे पूर्वोक्तगुणमध्ये दयादीनां केषांचिदेव गुणानां कथनं सर्वाश्रमसाधारण्या इत्यभिप्रायेण। तथा च विष्णुपुराणे— 'दया समस्तभूतेषु तितिक्षा नातिमानिता। सत्यं शौचमनायासो मङ्गलं प्रियवादिता॥ मैत्री तथास्पृहा तद्वदकार्पण्यं नरेश्वर। अनसूया च सामान्या वर्णानां कथिता गुणाः॥ आश्रमाणां तु सर्वेषामेते सामान्यलक्षणा' इति। विशेषतस्तु राज्यपरिपालने स हि रूपोपन्नश्चेत्यादिना उक्ता अपि गुणाः अपेक्षणीया

इत्युक्तं नीतिशास्त्रे । एवं चोक्तप्रकारेण ऐहिकराज्यपरिपालनामुष्मिकब्रह्मलोकावाप्त्योः आवश्यकसकलगुणानामवश्यिकस्नानान्तसंस्काराणां च प्रतिपादनं युक्तमेव । ननु एवंगुणाढ्यत्वमिदानीं किमिति प्रतिपाद्यते, उत्पत्त्यनन्तरमेव एवंगुणाढ्य इति वक्तुं शक्यत्वादिति चेन्न, तदानीं सत्संग्रहप्रग्रहणसज्जनप्रतिपूजकत्वादिगुणानां वक्तुमशक्यत्वात् । यद्यपि रूपोपपन्नत्वप्रशान्तात्मत्वादिसहजगुणास्तदानीमपि वक्तुं शक्याः तथापि तेषां गुणानां तस्मिन्काले ऽनुपयोगात्, एवमपि ब्रह्मचर्यसमये शान्त्यादिगुणानां संभवत्युपयोगः तथापि केषांचिदेवोपयोगो न सर्वेषां गृहस्थस्य तु सर्वगुणोपयोगो वर्तत इत्यभिप्रायेण दानपरिग्रहसमनन्तरमेव सर्वे गुणाः प्रतिपादिताः । अत एव 'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य, कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते

न च पुनरावर्तते' इति च्छान्दोग्ये गृहस्थेनैवोपसंहारदर्शनान्न तुरीयाश्रम इत्याशङ्कायां भगवान्बादरायणः—'कृत्स्नभावात्तु गृहिणोपसंहारः' इति सूत्रेण ब्रह्मचारिणामुक्तसत्यवचनादेः गृहस्थाश्रमोक्ताग्निहोत्रादिकर्मणां वानप्रस्थतुरीयाश्रमयोरुक्तशान्त्यादीनामपि कृत्स्नशः गृहस्थे संभवात् गृहस्थेनोपसंहारः न तुरीयाश्रमाभावादिति प्रतिपादितवान् । तस्मात्सर्वेऽपि गुणाः दारपरिग्रहानन्तरमेव स्वरूपत उपयोगतश्च सुलभा इति । उपपन्नमेवेदानीं गुणवर्णनम् । ततो वृद्धो दशरथः सकलकल्याणगुणालंकृतं श्रीरामं मन्त्रिभिः सह युवराजं निश्चित्य, पौरजानपदसंपूर्णां सभां प्रविवेश । द्वितीये— ततो धर्मतो राज्यपरिपालनेन परिश्रान्तोऽहं राममेव युवराजं कर्तुमिच्छामि ॥

यद्यप्येषा मम प्रीतिर्हितमन्यद्विचिन्त्यताम् ।
अन्या मध्यस्थचिन्ता तु विमर्दाभ्यधिकोदया ॥

इति वदन्तं राजानं पौरजानपदाः सानन्दमभिनन्द्य

रामं हि युवराजानमभिषिञ्चस्व धार्मिकम् ।
इच्छामो हि महाबाहुं रघुवीरं महाबलम् ।
गजेन महता यान्तं रामं छत्रावृताननम् ॥

इत्यवोचन् । ततो राजा पौरजानपदाभिप्रायं जानन्नपि तन्मुखेन द्रढयितुमजानान इव धर्मतो राज्यं प्रशासति मयि किमिति राममेव युवराजमिच्छथ इत्यपृच्छत् ।

ते तमूचुर्महात्मानं पौरजानपदैः सह ।
बहवो नृप कल्याणा गुणाः पुत्रस्य सन्ति ते ॥

गुणान्गुणवतो देव देवकल्पस्य धीमतः ।
प्रियानानन्दनान्कृत्स्नान्प्रवक्ष्यामोऽथ ताञ्शृणु ॥

दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः ।
इक्ष्वाकुभ्योऽपि सर्वेभ्यो ह्यतिरिक्तो विशांपते ।

रामः सत्पुरुषो लोके सत्यधर्मपरायणः ।
साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ॥

प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमा गुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥

धर्मज्ञः सत्यसंधश्च शीलवाननसूयकः ।
क्षान्तः सान्त्वयिता शक्यः कृतज्ञो विजितेन्द्रियः ॥

मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।
प्रियवादी च भूतानां सत्यवादी च राघवः ॥

बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।
तेनास्येहातुला कीर्त्तिर्यशस्तेजश्च वर्धते ॥

देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः ।
सम्यग्विद्याव्रतस्नातो यथावत्साङ्गवेदवित् ॥

गान्धर्वे च विभुः श्रेष्ठो बभूव भरताग्रजः ।
यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ॥

गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ।
संग्रामा[illegible]नरागम्य कुञ्जरेण रथेन वा ॥

पौरान्स्वजनवच्चित्यं कुशलं परिपृच्छति ।
पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ॥

निखिलेनानुपूर्व्याच्च पिता पुत्रानिवौरसान् ।
शुश्रूषन्ते च वः शिष्याः कच्चित्कर्मसु दंशिताः ॥

इति नः पुरुषव्याघ्रः सदा रामोऽभिभाषते ।
व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ॥

उत्सवेषु च सर्वेषु पितेव परितुष्यति ।
सम्यग्योक्ता श्रेयसां च न विगर्ह्यकथारुचिः ॥

प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः ।
शक्यस्त्रैलोक्यमप्येष भोक्तुं किं नु महीमिमाम् ॥

नास्य क्रोधः प्रसादश्च निरर्थोऽस्ति कथंचन ।
हन्त्येष नियमाद्ध्यान्यद्येष खलु कुप्यति ।
युनक्त्यर्थैः प्रहृष्टश्च तस्मै यत्र स तुष्यति ॥

इत्येवंविधैः कल्याणगुणैरनुरक्तानस्मानकरोत् । अपि च,

आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ।
आभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः ॥

स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः ।
सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ॥

राममिन्दीवरश्यामं सर्वशत्रुनिबर्हणम् ।
पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥

तं देवदेवोपममात्मजं ते
सर्वस्य लोकस्य हिते निविष्टम् ।
हिताय नः क्षिप्रमुदारजुष्टं
मुदाभिषेक्तुं वरद त्वमर्हसि ॥

इति सकललोकहितकरश्रीरामाभिषेकरूपमेव वरं प्रार्थयामासुः । अनेन सर्गेण सर्वप्रजाभ्यनुज्ञयैव अभिषिक्तो राजा श्रेयान्भवतीति सूचितम् । तथा च

भारते आदिपर्वणि प्रकृतीः प्रति ययातिवचनम्— 'भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम्' । प्रकृतय ऊचुः— 'यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा । सर्वमर्हति कल्याणं कनीयानपि सत्तमः ॥ अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव' इति । तत्रैव स्थलान्तरेऽपि धर्मपुत्रमुद्दिश्य प्रकृतिवचनम्— 'गुणैः समुदितान्दृष्ट्वा पौराः पाण्डुसुतास्तथा । कथयांचक्रिरे तेषां गुणान्संसत्सु भारत ॥ राज्यप्राप्तिं च संप्राप्तं ज्येष्ठं पाण्डुसुतं तदा । कथयन्ति स्म संभूय चत्वरेषु सभासु च ॥ ते वयं पाण्डवं ज्येष्ठं तरुणं वृद्धशीलिनम् । अभिषिञ्चाम साध्वद्य सप्रकारुण्यवेदिनम्' । तत्रैव च दुर्योधनं प्रति धृतराष्ट्रवचनम्— 'गुणवाँल्लोकविख्यातः पौराणां च सुसंमतः । कथं स शक्यतेऽस्माभिरपाकर्तुं बलादितः । ते पुरा सत्कृतास्तात पाण्डुना नागरा जनाः । कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान्' इति ॥

तृतीये— ततो राज्ञा प्रजाभिप्रायमवलोक्य,

अभिषेकाय रामस्य यत्कर्म सपरिच्छदम् ।

तदद्य भगवान्सर्वमाज्ञापयितुमर्हसि ॥

इति समुदीरितो वसिष्ठः—

सुवर्णादीनि रत्नानि बलीन्सर्वौषधीरपि ।
शुक्लमाल्यानि लाजांश्च पृथक्च मधुसर्पिषी ॥

अहतानि च वासांसि रथं सर्वायुधान्यपि ।
चतुरङ्गबलं चैव गजं च शुभलक्षणम् ॥

चामरे व्यजने शुभ्रे ध्वजं छत्रं च पाण्डरम् ।
हिरण्यशृङ्गं वृषभं समग्रं व्याघ्रचर्म च ॥

शतं च शातकुम्भानां कुम्भानामग्निवर्चसाम् ।
उपस्थापयत प्रातरग्न्यगारं महीपतेः ॥

यदन्यत्किंचिदेष्टव्यं तत्सर्वमुपकल्प्यताम् ।
अन्तःपुरस्य द्वाराणि सर्वस्य नगरस्य च ॥

चन्दनस्रग्भिरर्च्यन्तां धूपैश्च घ्राणहारिभिः ।
प्रशस्तमन्नं विधिवद्दधिक्षीरोपसेचनम् ॥

द्विजानां शतसाहस्रे यत्प्रकाममलं भवेत् ।
सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयताम् ॥

घृतं दधि च लाजांश्च दक्षिणाश्चापि पुष्कलाः ।
सूर्येऽभ्युदितमात्रे च भविता स्वस्तिवाचनम् ॥

ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च ।
आबध्यन्तां पताकाश्च राजमार्गश्च सिच्यताम् ॥

सर्वे च तालावचरा गणिकाश्च स्वलंकृताः ।
कक्ष्यां तृतीयामासाद्य तिष्ठन्तु नृपवेश्मनः ॥

देवायतनचैत्येषु सान्नभक्षाः सदक्षिणाः ।
उपस्थापयितव्याः स्युर्माल्ययोग्याः पृथक्पृथक् ॥

दीर्घासिबद्धयोधाश्च संनद्धा मृष्टवाससः ।
महाराजाङ्गणं सर्वे प्रविशन्तु महोदयम् ॥

इत्येवं समादिश्य राजकीयान्यथानिदेशं सुविहितमेति निवेदयामास । अनेन सुवर्णादीनि रत्नानीत्यादि

प्रविशन्तु महोदयमित्यन्तेन सर्वौषधिरत्नादीनां राजाभिषेके सामग्रीत्वमुक्तं भवति। यथा च सामविधानब्राह्मणे— 'राजानमभिषेचयेत्तिष्येण श्रवणेन वा। व्रीहियवैस्तिलमाषैर्दधिमधुसुमनोजातरूपैर्यशस्विनीभ्यो नदीभ्यः समुद्राच्चोदकान्याहृत्यौदुम्बरे भद्रासने वैयाघ्रे चर्मण्युत्तरलोम्न्यासीनं जीवन्तीनां गवां शृङ्गकोशैरभिषिञ्चेत्। अभ्रातृव्य इति रहस्येन यं कामयेतैकराजः स्यान्नास्य चक्रं प्रतिहन्येतैकवृषेणाभिषिञ्चेत्। अभिषेक्त्रे दद्याद्ग्रामवरं दासीशतं सहस्रं तदधीनश्च भवेत्' इति। ततश्च राजनियुक्तेन सुमन्त्रेण समानीतो रामभद्रः स्वावलोकनमात्रेण समुदितानन्दसंदोहमांसलं दशरथमवलोक्य

स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके।
नाम स्वं श्रावयन् रामो ववन्दे चरणौ पितुः॥

अनेन बद्धाञ्जलिपुटः सन्नुपसृत्य स्वनाम संकीर्त्य गुर्वाद्यभिवादनं कुर्यात् इति सूचितम्। तथा च गौतमः—

'स्वं नाम प्रोच्यायमहमित्यभिवादः' इति। मनुरपि—'अभिवादात्परं विप्रो ज्यायान्समभिवादयन्। असौ नामाहमस्मीति स्वनाम परिकीर्तयेत्॥ भोःशब्दं कीर्तयेदन्ते स्वस्वनाम्नोऽभिवादने' नम इति अभिवादये इति शब्दमुच्चार्य पश्चान्नामाहं भोः इति ब्रूयादित्यर्थः। प्रत्यभिवादनानभिज्ञस्य नाभिवादनं कर्तव्यमित्याह मनुः—'यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः' इति। प्रत्यभिवादनप्रकारोऽपि मनुना दर्शितः—'आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरप्लुतः' इति। यस्तु जानन्नपि प्रत्यभिवादं न करोति, तस्य दोषमाह स एव—'अभिवादे कृते यस्तु न करोत्यभिवादनम्। आशिषं वा कुरुश्रेष्ठ स याति नरकान्बहून्' इति। यमोऽपि—'अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति। यद्दुष्कृतं भवेत्तस्य स तस्याधं प्रपद्यते॥ तस्मात्पूर्वाभिभाषी स्याच्चण्डालस्यापि धर्मवित्। सुरां पिबेति वक्तव्यमेवं धर्मो न हीयते' इति।

ब्राह्मणादिषु कर्तव्यपूर्वाभिभाषणे विशेषमाह मनुः— 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च' इति। आपस्तम्बस्तु— 'कुशलमवरवयसं वयस्यं वा पृच्छेत्' 'अनामयं क्षत्रियम्' 'अनष्टं वैश्यम्' 'आरोग्यं शूद्रम्' इति। चतुर्णामपि वर्णानां पूर्वभाषणे विशेषमाह यमः— 'स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूमिपः। वर्धतामिति वैश्यस्तु शूद्रस्तु स्वागतं वदेत्' इति। स्त्रियं प्रति पूर्वभाषणे विशेषमाह मनुः— 'परपत्नी तु या स्त्री स्यादसंबद्धा तु योनितः। तां ब्रूयाद्भवतीत्येव सुभगे भगिनीति च' इति। अभिवादने तु वर्ज्यानाहापस्तम्बः— 'न सोपानद्वेष्टितशिरा अवहितपाणिर्वाभिवादयीत' इति। स एवाह—'अप्रयतेन नाभिवाद्यम्' इति। शङ्खोऽपि— 'नोदकुम्भहस्तोऽभिवादयेद्धैक्षं चरन्नक्तपुष्पान्नहस्तो नाशुचिर्न जपन्न शयानः' इति। अभिवाद्येषु वर्ज्यानाह आपस्तम्बः— 'विषमगतायागुरवे नाभिवाद्यम्, तथाप्रयताय' इति। तथान्यत्रापि स एव—'सामित्पुष्पकुशा-

ज्यार्घ्यमृदन्नाक्षतपाणिकः । जपं होमं च कुर्वाणो नाभिवाद्यास्तथा द्विजाः । पाषण्डं पतितं व्रात्यं महापातकिनं शठम् । नास्तिकं चाकृतघ्नं च नाभिवादेत्कथंचन ॥ धावन्तं च प्रमत्तं च मूत्रोच्चारकृतं तथा । भुञ्जानमातुरं मार्गे नाभिवादेद्द्विजोत्तमः ॥ वमन्तं जृम्भमाणस्य कुर्वन्तं दन्तधावनम् । अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादयेत् ॥ स्रक्पाणिकमनाज्ञातमशक्तं रिपुमातुरम् । योगिनं च तपःसक्तं कनिष्ठं नाभिवादयेत्' । शातातपोऽपि—'उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम् । अभिवाद्य द्विजो मोहादहोरात्रेण शुध्यति' । इदं चाभिवादनं ज्यायस एव कर्तव्यम् । तथा च मनुः—'अभिवादपरो विप्रो ज्यायांसमभिवादयेत्' इति । तत्र कियता ज्यायस्त्वमित्यत्र विशेषमाहापस्तम्बः—दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम् । त्रिवर्षपूर्वः श्रोत्रियः अभिवादनमर्हति' इति । गौतमोऽपि—'दशवर्षवृद्धः पौरः पञ्चभिः कलाभरः श्रोत्रियस्त्रिभिः' इति । मनुरपि—'दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृ

ताम्। त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु' इति। अस्यार्थः—समानपुरवासिनामश्रोत्रियाणां दशभिर्वर्षैः पूर्वः सखा भवति; ततोऽधिको ज्यायान्। कलाभृतां गीतादिविद्यावतां पञ्चाब्दपूर्वः सखा भवति; ततोऽधिको ज्यायान्। श्रोत्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वः सखा भवति, ततोऽधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु स्वल्पेनापि वयसा पूर्वः सखा भवति; ततोऽधिको ज्यायान् इति। स्त्रीणां ज्यायस्त्वे विशेषमाहापस्तम्बः—'पतिवयसः स्त्रियः' इति। यवीयस्यपि पत्युर्वयसा ज्यायसी अभिवाद्या। अप्रयतो न प्रत्यभिवदेदित्याहापस्तम्बः— 'अप्रयतश्च न प्रत्याभिवदेत्' इति। नमस्कार्याणामपि श्वशुरमातुलादीनां यवीयस्त्वे विशेषमाह गौतमः—'ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानम्। अनभिवाद्या' इति। बोधायनस्त्वाह— 'ऋत्विक्श्वशुरपितृव्यमातुलानां तु प्रत्युत्थानमभिभाषणम्' इति। आपस्तम्बोऽपि—'ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत्' इति। अत्र अभिवादोऽभिभाषणम्; एतच्चाभिवादनं सर्वैरपि ब्राह्मणानां

कर्तव्यम् । तथा च शातातपः— 'अभिवाद्यो नमस्कार्यः शिरसा वन्द्य एव च । ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा ॥ वयसाधिकोऽपि क्षात्रियो ब्राह्मणेन नाभिवाद्य इत्याहापस्तम्बः— 'दशवर्षस्तु ब्राह्मणः शतवर्षस्तु क्षत्रियः । पितापुत्रौ च तौ विद्धि तयोस्तु ब्राह्मणः पिता' इति । शातातपोऽपि— 'नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथंचन । ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः' इति । प्रमादादनभिवाद्यानामभिवादने प्रायश्चित्तमाह देवलः— 'अभिवाद्य द्विजः शूद्रं सचेलं स्नानमाचरेत् । ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति' इति । सभासु नाभिवादनं किं तु नमस्कार एवेत्याह विष्णुः— 'सभासु चैव सर्वासु यज्ञे राजगृहेषु च । नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत्' इति । गुर्वाद्यभिवादने विशेषमाह गौतमः— 'गुरोः पादोपसंग्रहणं प्रातर्ब्रह्मानुवचनं च' इति । आपस्तम्बोऽपि— 'उदिते त्वादित्ये आचार्याय समेत्योपसंग्रहणं सदैवाभिवादनम्' इति । उपसंग्रहणप्रकारमाह मनुः— 'व्य-

त्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः' इति। बोधायनोऽपि— 'श्रोत्रे संस्पृश्य मनः समाधायाधस्ताज्जान्वोरा पद्भ्याम्' इति; उपसंग्रहणं कुर्यादिति शेषः। आपस्तम्बोऽपि—'दक्षिणेन पाणिना दक्षिणं पाणिमधस्तादभ्यधिमृश्य सकृष्टिकमुपसंगृह्णीयात्' 'उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके' इति। एकहस्तेनाभिवादने दोषमाह विष्णुः—'जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत्। सर्वं तं निष्फलं याति एकहस्ताभिवादनात्' इति। उपसंग्रहणं गुर्वादिपत्नीनामपि कर्तव्यम्। तथा च मनुः— 'गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः। असवर्णास्तु संपूज्याः प्रत्युत्थानाभिभाषणैः' इति। भ्रातृभार्यादिषु सवर्णासूपसंग्रहणे विशेषमाह मनुः— 'भ्रातृभार्योपसंग्राह्या सवर्णाह्न्यहन्यपि। विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः' इति। एवं सर्वासां गुरुभार्याणां प्राप्ते विशेषमाह मनुः— 'गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः। पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥ अभ्यञ्जनं

स्नापनं च गात्रोद्वर्तनमेव च । गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम्' इति । गौतमोऽपि—'नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि विप्रोष्योपसंग्रहणं गुरुभार्याणां नैके युवतीनाम्' इति । किं तर्हि तत्र कर्तव्यमिति अपेक्षायामाह मनुः— 'कामं तु गुरुपत्नीनां युवतीनां युवा भुवि । विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥ विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् । गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्' इति । अत्र यद्यपि गुरुपत्न्या युवत्याः भूमावेव वन्दनं कुर्यादिति कथनात्, जनन्या अपि भूमावेव वन्दनं प्राप्नोति । तथापि अग्रे—

**पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः ।**
**कराभ्यां मृदुपीनाभ्यां चरणौ पीडयिष्यति ।**

इति कौसल्यां प्रति सुमित्रावचनपर्यालोचनया जनन्याः पादयोरेवाभिवादनमवगम्यते । भार्यया क्रियमाणे भर्तृनमस्कारे विशेषमाह गौतमः— 'स्त्रीपुंयोगेऽभिवादतो

नियममेके' इति। अस्यार्थः— अभिवादने क्रियमाणे अभिवादनीयनाम्ना अभिवादननियमो नास्ति; किं तु तत्तत्कालोपस्थितव्यवहारोपयुक्तयत्किंचिन्नाम्नाभिवादनं कर्तव्यम्' इति। एतादृशाभिवादनस्य फलमाह मनुः— 'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धन्ते ह्यायुः प्रज्ञा यशो बलम्' इति। आपस्तम्बोऽपि 'स्वर्गमायुश्चेप्सन्' इति स्वर्गायुषोः फलत्वमाह। श्रीरामभद्रोऽपि एवमकरणे प्रत्यवायकरं करणे अभ्युदयकरं नमस्कारं कृतवान्। ततः

तस्मै चाभ्युदितं दिव्यं मणिकाञ्चनभूषितम्।
दिदेश राजा रुचिरं रामाय परमासनम्॥

तदासनवरं प्राप्य व्यदीपयत राघवः।
स्वयैव प्रभया मेरुमुदये विमलो रविः।

अनेन गुर्वाद्यभ्यनुज्ञयैव तत्संनिधौ आसने उपवेष्टव्यमिति सूचितम्। तथा च मनुः— 'आस्यतामिति चोक्तः सन्नासीताभिमुखो गुरोः' इति।

तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ।
अलंकृतमिवात्मानमादर्शतलसंस्थितम् ॥

अत्र पुत्रः पितुः प्रतिबिम्ब इत्युक्तं भविष्यति इति । तथा च शाकुन्तलोपाख्याने दुष्यन्तं प्रति शकुन्तलावचनम् 'त्वदङ्गेभ्यः प्रसूतोऽयं पुरुषात्पुरुषोऽपरः । सरःस्विवामल आत्मानं द्वितीयं पश्य वै सुतम् । यथा ह्याहवनीयोऽग्निर्गार्हपत्यात्प्रणीयते । तथा त्वत्तः प्रसूतोऽयमेकः सन्द्विधा कृतः' इति ।

स तं सस्मितमाभाष्य पुत्रं पुत्रवतां वरः ।
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥

ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।
उत्पन्नस्त्वं गुणैः श्रेष्ठो मम रामात्मजः प्रियः ॥

अत्र ज्येष्ठायां पत्न्यां सदृश्यामिति विशेषणत्रयेण सुतो गुणाढ्य आत्मजः प्रिय इति विशेषणचतुष्टयेन च अज्येष्ठाजाताद्यपेक्षयापि ज्यैष्ठिनेयादीनां प्राबल्यमुक्तं भ-

वति। तथा च ज्येष्ठभार्याजातस्य उद्धाराधिक्यकथनेन प्राबल्यमाविष्करोति मनुः— 'पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः। कथं तत्र विभागः स्यादिति चेत्संशयो भवेत् ॥ एकं वृषभमुद्धारं संहरेत स पूर्वजः। ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः ॥ ज्येष्ठस्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः। ततः स्वमातृतः शेषा भजेरन्निति धारणा' इति। गौतमोऽपि 'वृषभोऽधिको ज्येष्ठस्य वृषभषोडशा ज्यैष्ठिनेयस्य' इति। कनिष्ठायामुत्पन्नस्य ज्येष्ठस्य एको वृषभः, ज्यैष्ठिनेयस्य वृषभाधिकाः पञ्चदश गाव इत्यर्थः, कनिष्ठायामुत्पन्नस्य ऋषभोद्धारेण विना ज्येष्ठायामुत्पन्नयवीयसा समो भाग इति वदन् ज्येष्ठा-प्राबल्यमाविष्करोति गौतम एव— 'समं वा अज्यैष्ठिनेयेन यवीयसामिति, कनिष्ठायामुत्पन्नेन जन्मतो ज्येष्ठेन ज्येष्ठायामुत्पन्नानां यवीयसां समो भाग इत्यर्थः। प्रवासप्रकरणे त्रिकाण्डमण्डनोऽपि— 'ज्येष्ठा चेदग्निसंयुक्ता ह्यन्या गच्छेद्यथासुखम्। यजमानेन सहिता यद्वा ता एव केवलाः'। तत्रैव स्थलान्तरे— 'भार्याः सन्तीह याव-

त्वस्ताभिः सर्वाभिरन्वितः । यद्वाधानादुपव्यूढकामपत्नी-विवर्जितः ॥ आधानानन्तरोढा सवर्णापि कामपत्नी-त्यर्थः इति । कात्यायनोऽपि— 'प्रथमा धर्मपत्नी स्याद्वि-तीया रतिवर्धनी । दृष्टमेव फलं तत्र नादृष्टमुपपद्यते' इति । अत्र ज्येष्ठाप्राबल्यकथनात्तत्पुत्रस्य श्रेष्ठत्वमर्थसि-द्धम् । एवं ज्यैष्ठिनेयप्राबल्यमुक्तं पत्न्यामिति विशेषणाच्च । पत्नी पाणिगृहीती, तस्यामुत्पन्न एव प्रबल इति गम्यते । तथा चापस्तम्बः तस्यैव भागार्हत्वं धर्म्यत्वं चाह— 'सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रांस्तेषां क-र्मभिः संबन्धः' 'दायेनाव्यतिक्रमश्चोभयोः' इति ॥ स-वर्णा च अनन्यपूर्वा च शास्त्रोक्तविवाहसंस्कृता च या भार्या तस्यामुत्पन्न एव धर्म्यो रिक्थभाक्चेत्यर्थः । स एवापरिणीतायामुत्पन्नस्य दोषमप्याह— 'पूर्ववत्त्वामसं-स्कृतायां वर्णान्तरे च मैथुने दोषः' 'तत्रापि दोषवान्पुत्र एव' अतिशयेन दोषवानित्यर्थः ॥ तथा च पत्न्यामुत्पन्नः प्रबलः । सदृश्यामिति विशेषणेन सवर्णाजातः प्रबलः । तथा च बोधायनः— 'द्वितीय आत्मा जीवता द्रष्टव्यो यः

पुत्रमुत्पादयति स तथा भवति तस्मान्नात्मा क्वचिदक्षेत्रे समुत्सृष्टव्यः आत्मानमेव मन्यते हि यो यथात्मानमुत्पादयति स तथा भवति तस्मादादित एव क्षेत्रमन्विच्छेत्। सवर्णे संस्कृतमुपदेशेन तस्मिन्दारसंयोगे प्रजामुत्पादयेदौषधमन्त्रसंयोगेन' इति। भारतेऽपि– 'एवं जातिषु सर्वासु सवर्णाः श्रेष्ठतां गताः। पत्युः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्॥ स्वास्वैव कुर्यात्सर्वेषां नासजातिः कथंचन'। कात्यायनोऽपि—'अग्निहोत्रादिशुश्रूषां बहुभार्यः सवर्णया कारयेत्तद्वहुत्वे च ज्येष्ठया गर्हिता न चेत्' इति। मनुरपि— 'सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः' इति। भारते आनुशासनिके– 'तिस्रः कृष्ण पुरो भार्याः पञ्चाद्विन्देत ब्राह्मणीम्। सा ज्येष्ठा सा च पूज्या स्यात्सा च भार्या गरीयसी॥ स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम्। हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं गृहे भवेत्॥ न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति। ब्राह्मणी त्वेव कुर्याद्वै ब्राह्मणस्य युधिष्ठिर॥ अन्नं

पानं च माल्यं च वासांस्याभरणानि च। ब्राह्मण्यै-तानि देयानि भर्तुः सा हि गरीयसी॥ अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर। यथा ब्राह्मणचण्डालपूर्व-दृष्टस्तथैव सः' इति। याज्ञवल्क्योऽपि– 'सत्सामन्यां सव-र्णायां धर्मकार्यं न कारयेत्॥ सवर्णासु विधौ धर्मे ज्येष्ठया न विनेतराः' इति। सवर्णाजातस्य उद्धारप्र-तिपादनेन प्राबल्यमाविष्करोति मनुः– 'ब्रह्मीषु चैकजा-तानां नानास्त्रीषु निबोधत। ब्राह्मणस्यानुपूर्व्येण चतस्रः स्युर्यदि स्त्रियः॥ तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः। कीनाशो गोवृषोयानमलंकारश्च वेश्म च। विप्र-स्यौद्धारिकं देयमेकांशश्च प्रधानतः॥ त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः। वैश्याजोऽध्यर्धमेवांशमर्धं शूद्रा-सुतो हरेत्॥ सर्वं वा रिक्थभागं तं दशधा प्रविभज्य तु। धर्म्यं विभागं कुर्वीत विधिनानेन धर्मवित्॥ चतु-रोंशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः। वैश्यापुत्रो हरे-द्व्यंशमंशं शूद्रासुतो हरेत्॥ यद्यपि स्यात्सपुत्रस्तु यद्यपुत्रोऽपि वा भवेत्। नाधिकं दशमाद्द्याच्छूद्रापु-

त्राय धर्मवित् ॥ भारतेऽपि पूर्ववर्णोत्पन्नपुत्रासत्त्वेऽपि वा शूद्रपुत्राय दशममेव भागं दद्यात् इत्युक्तम् । 'अविद्यमानमृक्थं तु संप्रवक्ष्यामि भारत । लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत् ॥ ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितुर्धनात् । शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर ॥ तत्र तेनैव हर्तव्यश्चत्वारोंशाः पितुर्धनात् । क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः ॥ स तु मातृविशेषेण त्रीनंशान्हर्तुमर्हति । वर्णे तृतीये जातेन वैश्यायां ब्राह्मणादपि । द्विरंशस्तेन हर्तव्यो ब्रह्मणः स्याद्युधिष्ठिर ॥ शूद्रायां ब्राह्मणाज्जातो नित्यदेयधनः स्मृतः । अल्पं वापि प्रदातव्यं शूद्रपुत्राय भारत ॥ दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः । सवर्णासु च जातानां समान्भागान्प्रकल्पयेत् ॥ एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर । अष्टधा तु भवेत्कार्यं क्षत्रियस्वं जनाधिप ॥ क्षत्रियाया हरेत्पुत्रश्चतुरोंशान्पितुर्धनात् । युद्धाय हारिकं यच्च पितुः स्यात्स हरेत तत् ॥ वैश्यापुत्रस्तु भागांस्त्रीञ्शूद्रापुत्रस्तथाष्टमम् । सोऽपि दत्तं हरेत्पित्रा

नादत्तं हर्तुमर्हति ॥ एकैव हि भवेद्भार्या वैश्यस्य कुरु-
नन्दन । द्वितीया तु भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥
वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ । शूद्रायां चापि
कौन्तेय तयोर्विधिरयं स्मृतः ॥ पञ्चधा तु भवेत्कार्यं
वैश्यस्य भरतर्षभ । तयोरपत्ये वक्ष्यामि विभागं च
जनाधिप ॥ वैश्यापुत्रेण हर्तव्याश्चत्वारोंशाः पितु-
र्धनात् । पञ्चमस्तु स्मृतो भागः शूद्रापुत्राय भारत ॥
सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति । त्रिभिर्वर्णैः
सदा जातः शूद्रो देयधनो भवेत् ॥ शूद्रस्य स्यात्सवर्णैव
भार्या नान्या कथंचन' इति सदृश्यां जातस्य प्राबल्य-
मुक्तम् । सुत इति विशेषणेन इतरापेक्षया रिक्थभा-
क्त्वेन प्राबल्यमुक्तम् । तथा च श्रुतिः— 'मनुः पुत्रे-
भ्यो दायं व्यभजत' इति । आपस्तम्बोऽपि— 'जीव-
न्पुत्रेभ्यो दायं विभजेत्समम्' । गौतमोऽपि— 'ऊर्ध्वं
पितुः पुत्रा रिक्थं भजेरन्' । आपस्तम्बोऽपि—'पुत्राभावे
यः प्रत्यासन्नः सपिण्डः' । अतः सुतः प्रबलः । गुणैर्युक्ते-
रित्यनेन च गुणवाञ्श्रेष्ठः । तथा च बोधायनः— 'गुण-

वान्हि शेषाणां भर्ता भवति ' इति । पतितज्येष्ठांशं प्र-
त्याह मनुः— 'ज्येष्ठांशं प्राप्नुयात्तस्य यवीयान्गुणतोऽधि-
कः' इति । आपस्तम्बोऽपि— 'सर्वे हि धर्मयुक्ता भा-
गिनः' 'यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि
तमभागं कुर्वीत' इति । गौतमोऽपि– 'राजन्यापुत्रो ज्ये-
ष्ठो गुणसंपन्नस्तुल्यभाक्' इति निर्गुणज्येष्ठेन ब्राह्मणीपुत्रेण
राजन्यापुत्रः कनिष्ठोऽपि गुणसंपन्नस्तुल्यभागी इत्यर्थः। स
एव—'अवैद्येभ्यो वैद्यः कामं न दद्यात्' इति। अविदुषे
विद्वान्दद्याद्वा न वेत्यर्थः । गौतमोऽपि—सवर्णापुत्रोऽप्य-
न्यायवृत्तो न लभत एकेषाम् । अन्यायवृत्तः निन्दित-
वृत्तिः, सवर्णापुत्रोऽपि रिक्थं न लभते इत्येके । भार-
तेऽपि 'सर्वे चापि विकर्मस्था भागं नार्हन्ति सोदराः'
इति । आत्मज इत्यनेन च औरसः प्रबल इत्युक्तम् ।
तल्लक्षणमाह बोधायानः— 'सवर्णायां संस्कृतायां स्वय-
मुत्पादितमौरसं पुत्रं विद्यात्' । प्राबल्यमप्याह मनुः—
'स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यम्। तमौरसं वि-
जानीयात्पुत्रं प्रथमकल्पितम्॥ एक एवौरसः पुत्रः पित्र्य-

स्य वसुनः प्रभुः। शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्। नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः। नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः॥ नियुक्ता ह्यन्यतः पुत्रं देवराद्वाप्यवाप्नुयात्। तं कामजमरिक्थार्हं मिथ्योत्पन्नं प्रचक्षते' इति। एवं च औरसः प्रबलः। प्रियस्य श्लाघ्यत्वे, 'योऽस्य पुत्रः प्रियस्यात्तं प्रति पूर्णमुन्नयेत्' इत्याश्वलायनः। आपस्तम्बोऽपि— 'प्रियस्य पुत्रस्य नाम गृह्णाति तामाशिषमाशास्ते तं शतव इत्यजातस्य अमुष्मा इति जातस्येत्यग्निहोत्रप्रकरणे दर्शपूर्णमासयोरपि ज्योतिषे तं तवोद्वासाचनुमातन्वच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यः छेदि देव्याद्वान्नो मा चिच्छि मानुषादिति प्रियस्य पुत्रस्य नाम गृह्णाति' इति। तस्मादुक्तसर्वविधश्रैष्ठ्यसत्त्वात् श्रीराम एव राज्यार्ह इति सिद्धम्॥

गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितम्।

अनेन गुणवानपि पुत्रः पित्रानुशासनीय इत्युक्तम्। तथा च बृहदारण्यके— 'तस्मात्पुत्रमनुशिष्टं लोक्यमाहु-

स्तस्मादेनमनुशासते' इति। आपस्तम्बोऽपि— 'पुत्रमिवैनमनुकाङ्क्षन् सर्वधर्मेष्वनपच्छादयमानः सुयुक्तो विद्यां ग्राहयेत्' इति। अस्यार्थः— एनं शिष्यं पुत्रमिव सर्वधर्मेष्वगूहमानो विद्यां ग्राहयेत् इति। अत्र सूत्रे पुत्रानुशासनं सिद्धवत्कृत्य तद्दृष्टान्तेन शिष्योऽनुशासनीय इत्युक्तम्। तथा च्छान्दोग्येऽपि—'श्वेतकेतुर्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति' इति। तथा 'ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्' इति। राजधर्मेऽपि— 'विदितं हि यथा सर्वं लोकवृत्तमिदं तव। विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः' इति।

'भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः।
कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च॥

परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा।
अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरञ्जय॥

**कोष्ठागारायुधागारैः कृत्वा संनिचयान्बहून् ।**
**तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ॥**

**तस्य नन्दन्ति मित्राणि लब्ध्वामृतमिवामराः ।**
**तस्मात्त्वमपि चात्मानं नियम्यैवं समाचर ॥**

अनेन प्रजापालनं कुर्वतो राज्ञ एतादृशा गुणा अपेक्षिता इत्युक्तं भवति । तत्र विनयस्यावश्यिकत्वे मनुर्विनीतानभिधायाह— 'तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः । विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्' । विनयाविनययोः फलमाह स एव— 'बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः । वनस्थाश्चैव राज्यानि विनयात्प्रतिपेदिरे ॥ वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः ॥ सुदासो यवनश्चैव सुमुखो निमिरेव च ॥ पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च । कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः' । तथा च कामन्दकोऽपि—'भवति हि विनयो ह बृहतो नृपतिपदाय शमाय च क्षमः । अविनयरतमादराद्दते वशमवशं च नयन्ति विद्विषः ॥

श्रुतविनयविधिः समाश्रितस्तनुरपि नैति पराभवं कचित्। इति स्म राजा विनयं नयान्वितो निषेवमाणो नरदेवसेवितम्। पदं समाक्रामति भास्वरं श्रियः शिरो महारत्नगिरेरिवोन्नतम्॥ इयं हि लोकोक्तिरलोकवर्तिनी स्वभावतः पार्थिवता समुद्धता। बलात्तदैनां विनयेन योजयेन्नयस्य सिद्धौ विनयः पुरःसरः। परं विनीतः समुपैति सेव्यतां महीपतीनां विनयो हि भूषणम्। प्रवृत्तदानो मृदुसंचरत्करः करीव भद्रो विनयेन शोभते॥ नयविक्रमसंपन्नः सूत्थानश्चिन्तयेच्छिवम्। नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः॥ विनयो हीन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति। तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः श्रियः' इति। एवं विनयस्यावश्यिकत्वमुक्तम्। इन्द्रियजयस्यावश्यिकत्वे मनुः— 'इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः'। कामन्दकोऽपि—'जितेन्द्रियस्य नृपतेर्नीतिमार्गानुसारिणः। भवन्त्युज्ज्वलिता लक्ष्म्यः कीर्त्तयश्च नभःस्पृशाः॥ प्रकीर्णे विषयारण्ये धावन्तं वि-

प्रमाथिनम् । ज्ञानाङ्कुशेन कुर्वीत वश्यमिन्द्रियदन्तिनम् ॥ एकस्यापि नयः शक्तो मनसः संनिबर्हणे । महीं सागरपर्यन्तां स कथं नु विजेष्यति ॥ क्रियावसानविरसैर्विषयैरपहारिभिः । गच्छत्याक्षिप्तहृदयः करीव नृपतिर्ग्रहम् । सज्जमानोऽप्यकार्येषु विषधीविकृतेक्षणः । आवहत्युग्रभयदां स्वयमेवापदं नृपः ॥ शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः । एकैकमलमेतेषां विनाशप्रतिपत्तये ॥ शुचिशष्पाङ्कुराहारो विदूरक्रमणक्षमः । लुब्धकाद्गीतिलोभेन मृगो मृगपतेर्वधम् ॥ गिरीन्द्रशिखराकारो लीलयोन्मूलितद्रुमः । करिणीस्पर्शसंमोहादालानं याति वारणः ॥ स्निग्धदीपशिखालोकविलोभितविलोचनः । मृत्युमृच्छत्यसंमोहात्पतङ्गः सहसा पतन् ॥ दूरेऽपि हि भवन्दृष्टेरगाधे सलिले चरन् । मीनस्तु सामिषं लोहमास्वादयति मृत्यवे ॥ गन्धलुब्धो मधुकरो दानासवपिपासया । अभ्येत्य सुखसंचारान्गजकर्णझलज्झलान् ॥ कामो द्यूतं तथा पानं गर्हितानि महीभुजाम् । दृष्टास्तेभ्यस्तु विपदः पाण्डुनैषधवृष्णिषु' इति व्यसनपरित्यागस्यावश्यिकतोक्ता । प्रजारञ्जने काम-

न्दकः— 'प्राधान्येन हि सर्वत्र सर्वा वै रञ्जयेत्प्रजाः ।
तासां तु रञ्जनाद्राजा सर्वाङ्गीं श्रियमश्नुते ॥ सदानुरक्त-
प्रकृतिः प्रजापालनतत्परः । विनीतात्मा हि नृपतिर्भू-
यसीं श्रियमश्नुते' इति । मार्कण्डेयपुराणेऽपि— 'वत्स
राज्याभिषिक्तेन प्रजारञ्जनमादितः । कर्तव्यमविरोधेन
स्वधर्मस्य महीभृता' । कामन्दके— 'क्व च नरपतिगर्वः
संग्रहः क्व प्रजानां मधुरवचनयोगाल्लोकमभ्याददीत ।
मधुरवचनपाशैरायताल्लानितः सन्पदमपि न हि लोकः
पुस्थितेर्भेदमेति' । कामक्रोधजयविषये कामन्दकः—
'कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा । षड्वर्गमु-
त्सृजेदेनं यस्मिंस्त्यक्ते सुखी भवेत् ॥ दाण्डक्यो नृपतिः
कामात्क्रोधाच्च जनमेजयः । लोभादैलस्तु राजर्षिर्वातापि-
र्हर्षतोऽसुरः ॥ पौलस्त्यो राक्षसो मानान्मदाद्दम्भोद्भवो
नृपः । प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः ॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः । अम्ब-
रीषश्च नाभागो बुभुजाते चिरं महीम् ' । काम-
न्दके द्रव्यसंग्रहे— 'कोष्ठागारेऽभियुक्तः स्यात्तदायत्तं हि

जीवितम्। नान्याय्यं च व्ययं कुर्यात्प्रत्यवेक्षेत चान्वहम् ॥ कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरं वनादानं शून्यानां च निवेशनम् ॥ अष्टवर्गमिमं साधु स्वच्छवृत्तो विवर्धयेत् । ब्रह्मादानोऽल्पनिस्रावः ख्यातः पूजितदैवतः ॥ ईप्सितद्रव्यसंपूर्णो हृद्यैरापैरधिष्ठितः । मुक्ताकनकरत्नाढ्यः पितृपैतामहोच्छ्रितः । धर्मार्जितो व्ययसहः कोशः कोशज्ञसंमतः । धर्महेतोस्तथार्थाय भृत्यानां भरणाय च ॥ आपदर्थं च संरक्ष्यः कोशः कोशवता सदा'। जनानुरागे कामन्दकः— 'जितेन्द्रियत्वं विनयस्य लक्षणं गुणप्रकर्षो विनयादवाप्यते । गुणाधिके पुंसि जनोऽनुरज्यते, जनानुरागप्रभवा हि संपदः' इति । ततः

तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ।
त्वरिताः शीघ्रमभ्येत्य कौसल्यायै न्यवेदयत् ॥

सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ।
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥

अनेन प्रियाख्यातृभ्यः प्रीतिदानं कर्तव्यमिति सूचितम्। तच्च बालकाण्डे रामोत्पत्तिप्रकरणे प्रपञ्चितम्। ननु स्त्रियाः धनाभावात्कथं दानेऽधिकारः? तथा च मनुः— 'भार्या पुत्रश्च दासश्च त्रय एतेऽधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्' इति। 'तस्मात्स्त्रियो निरिन्द्रिया अदायादाः' इति श्रुतिश्चेति चेत्, न, अस्ति तासामपि न्यायतो धनागमः। तथा च मनुः— 'अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि। मातृभ्रातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्' इति। अत्र कात्यायनः— 'विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निः स्मृतं सद्भिः स्त्रीधनं परिकीर्तितम्' इति। 'यत्पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावहनिकं नाम स्त्रीधनं परिकीर्तितम्' इति च। एवं न्यायप्राप्तस्य स्त्रीधनस्य विभागविशेषमाह मनुः— ऋतुभिः श्लोकैः— 'अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्'। अस्यार्थमाह कात्यायनः— 'विवाहात्परतो यत्तु

लब्धं भर्तृकुले स्त्रियः । अन्वाधेयं तदुक्तं तु सर्वबन्धुकुले तथा' इति । 'ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम् । अप्रजायामतीतायां भर्तुरेव तदिष्यते ॥ यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु । अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥ स्त्रियाश्च यद्भवेद्वित्तं पित्रा दत्तं कथंचन । ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्' इति । स्त्रियाः धनस्वामित्वाभाववचनं तु भर्तृकुले साधारणद्रव्यपरं भर्तृद्रव्यपरं च । तथा च स एवाह— 'न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् । स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया' । अत्र 'निर्हारः' आदानम्, 'कुटुम्बाद्बहुमध्यगात्' इति देवरादिसाधारणद्रव्यात्, 'स्वकादपि च वित्तात्' इति भर्तुः स्वस्य च साधारणादर्थात् । आपस्तम्बोऽपि— 'न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति' इति । अस्यार्थः— भर्तुरनुज्ञया नित्यदाने दोषप्रसक्तिरेव नास्ति । नैमित्तिके पूर्णपात्रादिषु भर्तुराज्ञाविरहेऽपि न दोषः, अन्यथा कर्मवैगुण्यापत्तेः' इति, एवं च भर्तुराज्ञां विना कर्मानुपयुक्त

यथेच्छप्रदाने स्तेयदोषोऽस्त्येव । तस्मात्स्त्रिया अपि न्यायतो धनागमस्तत्र स्वामित्वं च । अत एव अग्रे श्रीरामं प्रति लक्ष्मणवचनमपि—

कौसल्या बिभृयादार्या सहस्रमपि मद्विधात् ।
यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीवनम् ॥

तदात्मभरणे चैव मम मातुस्तथैव च ।
पर्याप्ता मद्विधानां च भरणाय यशस्विनी ॥

इति । एवं स्त्रिया अपि धनसत्त्वात्कौसल्याकृतं प्रीतिदानं युक्तमेव ॥

अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमद्धैश्म जनौघैरभिनन्दितः ॥

अनेन गमनसमयेऽपि गुरवोऽभिवादनीया इत्युक्तं भवति । तथा च भारते आदिपर्वणि— 'पाण्डवास्तु रथान्युक्तान्सदश्वैरनिलोपमैः । आरोहमाणा भीष्मस्य पादौ जगृहुरार्तवत् ॥ राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः ।

अन्येषां चैव वृद्धानां कृपस्य विदुरस्य च ॥ एवं सर्वान्कुरून्वृद्धानभिवाद्य यतव्रताः । समालिङ्ग्य समानांश्च बालैश्चाप्यभिवादिताः ॥ गुरूनप्यर्चयित्वा च कृत्वा चैव प्रदक्षिणम् । सर्वाः प्रकृतयश्चैव प्रययुर्वारणावतम्' इति । चतुर्थे— ततो मन्त्रिभिः सह संमन्त्र्य राममानयेति राज्ञा नियुक्तः सुमन्त्रः शारदनीरदपाण्डरमभ्रंकषशिखरं राममन्दिरमयासीत् ॥

द्वाःस्थैरावेदितं तस्य रामायागमनं पुनः ।
प्रवेश्य चैनं त्वरितं रामो वचनमब्रवीत् ॥

अनेन अतिपरिचितोऽपि राजाभ्यनुज्ञामन्तरेण राजभवनं न प्रविशेदिति सूचितम् । तथा च उद्योगपर्वणि द्वाःस्थं प्रति विदुरवाक्यम्— 'प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् । ईश्वरस्त्वां महाराजो महाप्राज्ञो दिदृक्षति ॥ एवमुक्तस्तु विदुरः प्राप्य राजनिकेतनम् । अब्रवीद्धृतराष्ट्राय द्वाःस्थं मां संनिवेदय ॥ द्वाःस्थ उवाच— 'विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात् । द्रष्टुमिच्छति

ते पादौ किं करोतु प्रशाधि माम् ॥ धृतराष्ट्रः— 'प्रवेशय महाप्राज्ञं विदुरं दीर्घदर्शनम् । अहं हि विदुरस्यास्य नाकल्पो जातु दर्शने ॥ द्वाःस्थ उवाच— प्रविशान्तःपुरं क्षत्तर्महाराजस्य धीमतः । न हि ते दर्शने कल्पो जातु राजाब्रवीद्धि माम् ॥ वैशम्पायनः— 'ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनम् । अब्रवीत्प्राञ्जलिर्वाक्यं चिन्तयानं नराधिपम्' इति । विनाज्ञां प्रवेष्टुर्निन्दामाह स एव— 'अनाहूतः प्रविशति अपृष्टो बहु भाषते । अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ततः सुमन्त्रवचनेन ससंभ्रममुपदीकृतप्रणामं रामभद्रं परिष्वज्य निर्दिष्टासनमुपविशन्तमवलोक्य दशरथ आह—

राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा मयेप्सिताः ।
अन्नवद्भिः क्रतुशतैर्यथेष्टं भूरिदक्षिणैः ॥

जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि ।
दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥

अनुभूतानि चेष्टानि मया वीर सुखान्यपि।
देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः॥
न किंचिन्मम कर्तव्यं तवान्यत्राभिषेचनात्॥

अनेन न्यायार्जितधनो धर्माविरोधेन भुक्तभोगः अपाकृतऋणषट्कः पुत्राय वृत्तिं कल्पयेदित्युक्तं भवति। तथा च शङ्खलिखितौ– 'पुत्रमुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विधाय दारैः संयोज्य गुणवति पुत्रे कुटुम्बमावेश्य कृतप्रस्थानलिङ्गो वृत्तिविशेषाननुक्रमेत्' इति। प्रजागरे धृतराष्ट्रं प्रति विदुरः—'उत्पाद्य पुत्राननृणांश्च कृत्वा वृत्तिं च तेभ्योऽनुविधाय कांचित्। स्थाने कुमारीः प्रतिपाद्य सर्वा अरण्यसंस्थोऽथ मुनिर्बुभूषेत्' इति। मनुरपि—'महर्षिपितृदेवानां गत्वानृण्यं यथाविधि। पुत्रे सर्वं समावेश्य वसेन्माध्यस्थ्यमाश्रितः' इति। भारते मोक्षधर्मेऽपि— 'देवर्ष्यतिथिभृत्येभ्यः पितृभ्यश्चात्मनस्तथा। ऋणवाञ्जायते मर्त्यस्तस्मादनृणतां व्रजेत्॥ स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्मणा। पितृभ्यः श्राद्धदानेन नृणा-

मभ्यर्चनेन च ॥ पाकशेषाच्च भृत्यानां पालनेनात्मनोऽपि च' इति ।

अपि चाद्याशुभान्राम स्वप्नान्पश्यामि दारुणान् ।
सनिर्घाता महोल्का च पतितेह महास्वना ॥

अवष्टब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः ।
आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥

प्रायेण च निमित्तानामीदृशानां समुद्भवे ।
राजा वा मृत्युमाप्नोति घोरां वापदमृच्छति ॥

अनेन दुष्टस्वप्नदर्शनस्य दुर्निमित्तानां च अनिष्टफलसूचकत्वमुक्तम् । तथा च बह्वृचारण्यके—'स यश्चायमशरीरः प्रज्ञात्मा यश्च सा चादित्य एकमेतदित्यवोचाम तौ यत्र विहीयेते चन्द्रमा इवादित्यो दृश्यते न रश्मयः प्रादुर्भवन्ति लोहिनी द्यौर्भवति यथा मञ्जिष्ठा व्यस्तः पायुः काककुलाय गन्धिकमस्य शिरो वायति संपरेतोऽस्यात्मा न चिरमिव जीविष्यतीति विद्यात् अथापि

यत्र च्छिद्र इवादित्यो दृश्यते रथानाभिरिवाभिख्यायेत छिद्रं वा च्छायां पश्येत्तदप्येवमेव विद्यादथाप्यादर्शे वोदके च । वाजिमाशिरसं वात्मानं पश्येद्विपर्यस्ते वा कन्याके जिह्मेन वा दृश्येयातां तदप्येवमेव विद्यादथाप्यपिधाया-क्षिणी उपेक्षेत तद्यथा वटरकाणि संपतन्तीव दृश्यन्ते तानि यदा न पश्येत्तदप्येवमेव विद्यादथाप्यपिधाय कर्णा-वुपशृणुयात्स एषोऽग्निरिव प्रज्वलतो रथस्येवोपद्विस्तं यदा न शृणुयात्तदप्येवमेव विद्यादथापि यत्र नील इवा-भिर्दृश्यते यथा मयूरग्रीवाभेघे वा विद्युतं पश्येन्मध्ये वा विद्युतं न पश्येन्महामेघे वा मरीचीरिव पश्येत्तदप्येवमेव विद्यादथापि यत्र भूमिं ज्वलन्तीमिव पश्येत तदप्येवमेव विद्यादिति प्रत्यक्षदर्शनान्यथा स्वप्नाः पुरुषं कृष्णं कृष्ण-दन्तं पश्यति स एनं हन्ति वराह एनं हन्ति मर्कट एन-मास्कन्दयति । आशु वायुरेनं प्रवहति सुवर्णं खादित्वा-पगिरति मध्वश्नाति बिसानि भक्षयति एकं पुण्डरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नल-दमाली दक्षिणामुखो व्राजयतीति' ॥

अतस्त्वामभिषेक्ष्यामि यौवराज्ये परंतप ।
तस्मात्त्वयाद्य व्रतिना निशेयं नियतात्मना ।
सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥

अनेन यत्किंचिद्धितं कर्म भार्यया सहैव कर्तव्यमित्युक्तं भवति । तथा चापस्तम्बः— 'पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु द्रव्यपरिग्रहेषु च' इति ।

सुहृदस्त्वप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ।

अनेन राज्ञां स्वापकालेष्वाप्तैः संरक्षणं कर्तव्यमिति सूचितम् । तथा च कामन्दके— 'अन्तर्वंशिकसैन्यं च संनद्धं साधु संमतम् । रक्षेदायुक्तकुशलमन्तःपुरगतं नृपम् ॥ विचार्य सर्वावयवान्दिनक्षये विसृज्य लोकं प्रमदादृतक्रियः । अशस्त्रवध्येन हि साधु पाणिना स्वप्यादसक्तं परमाप्तरक्षितः' इति ।

भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि'

श्रेयसां बहुविघ्नत्वं लोकप्रसिद्धम् ॥

विप्रोषितश्च भरतो यावदेव पुरादितः ।
तावदेवाभिषेकस्ते प्राप्तकाले मतो मम ॥

अत्र 'विप्रोषितश्च भरतः' इत्यादिना भरतागमे रामाभिषेकप्रतिबन्धो भवेत् भरतागमनात् प्रागभिषेकः कर्तव्यमिति चोत्युक्तं तदनुपपन्नम् ।

श्रुतेन बालस्थानेन जन्मना भवतो ह्यहम् ।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥

इति चित्रकूटे श्रीरामं प्रति भरतवचनेन
इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ।
पूर्वजेनावरः पुत्रो ज्येष्ठो राज्येऽभिषिच्यते ॥

स राघवाणां कुलधर्ममात्मनः
सनातनं नाद्य विहातुमर्हसि ।
प्रभूतरत्नामनुशाधि मेदिनीं
प्रभूतरत्नां पितृवन्महायशाः ॥

तत्रैव वसिष्ठवचनेन—

'रामो राज्ञः सुतो ज्येष्ठो यौवराज्यमतोऽर्हति'

इति कैकयीवचनेन,—

'तस्माज्ज्येष्ठो हि कैकयि राज्यतन्त्राणि पार्थिवाः।
स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि'

इति मन्थरावचनेन च; न्यायतो रामस्यैव राज्याभिषेकावगमेन अभिषेकप्रतिबन्धशङ्काया एवाभावादिति चेन्न।

पुरा भ्रान्तः पिता नः स मातरं ते समुद्वहन्।
मातामहे समश्रौषीद्राज्यशुल्कमनुत्तमम्॥

इति चित्रकूटे भरतं प्रति रामवचनेन भरतस्यापि राज्याधिकारसंभवात्तदागमनात्प्रागारम्भो युक्त एव। न चैवं प्राक्प्रतिश्रुतराज्याप्रदाने धार्मिकस्य राज्ञः सत्यप्रतिज्ञत्वभङ्गः प्रसज्येतेति वाच्यम्। विवाहादिषु

प्रतिज्ञाया असत्यत्वेऽपि दोषाभावात्। तथा च भारते—
'विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थेऽप्यनृतं वदेत पञ्चानृतान्याहुरपातकानि'
इति । मनुरपि— 'कामिनीषु विवाहेषु गवां भक्ते तथेन्धने । ब्राह्मणस्य विपत्तौ च शपथे नास्ति पातकम्'
इति । अत एवाग्रे भरतराज्याभिषेकोपायं वदन्त्या कुब्जया विवाहकालीनप्रतिज्ञाया असत्यत्वमाशङ्कमानया युद्धकाले प्रतिश्रुतवरद्वयेनैव राज्यं प्रार्थयस्वेत्यभिहिता कैकेयी वरद्वयमेव प्रार्थितवती । तर्हि धार्मिकभरतसंनिधानेऽपि रामाभिषेकस्य निर्वर्तयितुं शक्यत्वादिदमयुक्तमिति चेन्न ।

किं तु चित्तं मनुष्याणामनित्यमिति मे मतिः ।
सतां च धर्मनित्यानां कृतशोभि च राघव ॥
तावदेवाभिषिञ्चस्व चला हि प्राणिनां मतिः ।

इति दशरथवचनेन स्वस्य भरतस्य च मनश्चापल्यसंभवेन तत्परिहाराय प्रागारम्भ उपपन्न एव ।

इत्युक्तः सोऽभ्यनुज्ञातः श्वोभाविन्यभिषेचने ।
व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहम् ॥

ततो दाशरथिर्मातृगृहमागत्य श्रुतयौवराज्याभिषेकाम्

तत्र तां प्रवणामेव मातरं क्षौमवासिनीम् ।
वाग्यतां देवतागारे ददर्शायाचतीं श्रियम् ॥

प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तदा ।
सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनम् ॥

अत्र कौसल्यया देवताध्यानादिकं कृतमित्यवगम्यते, तन्न संघटते । स्त्रीणां पतिशुश्रूषणमेव धर्मः तस्मादेव च सर्वफलवाप्तिः इतरधर्मानुष्ठाने स्वस्य च भर्तुश्चानिष्टं स्वस्य पातित्यं च । अत्रैव कौसल्यां प्रति रामवचनम्—

शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता ।
एष धर्मः पुरा दृष्टो लोके वेदे श्रुतः स्मृतः ॥

इति । अत्रैव

**भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम् ।**
**अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ॥**

इति । मनुरपि— 'नास्ति स्त्रीणां पृथग्धर्मो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते या तु तेन स्वर्गे महीयते' इति । आश्वलायनोऽपि—'शूद्राणां द्विजशुश्रूषा विहिता ब्रह्मणा यथा । स्त्रीणां स्वभर्तुः शुश्रूषा तथैव विहिता सदा' । शङ्खलिखितावपि— 'न व्रतोपवासनियमेज्या-दानं दमो वानुग्रहकारः स्त्रीणामन्यत्र पतिशुश्रूषायाः' इति । स्कान्देऽपि— 'नास्ति स्त्रीणां पृथग्धर्मो न व्रतं नाप्युपोषणम् । भर्तृशुश्रूषयैवैता लोकानिष्टाञ्जयन्ति हि' इति । अत्रिरपि— 'न व्रतेनोपवासेन धर्मेण विविधेन च । नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात्' इति । यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भर्त्राभ्यर्चनं स-त्क्रियां च । तस्य ह्यर्धं सा फलं नान्यचित्ता नारी भुङ्क्ते भर्तृशुश्रूषणेन' इति । तथा अन्यधर्मफलावाप्तिः पतिशुश्रू-षयैव । तथा च स्कान्दे, अत्रैव— 'व्रतोपवासनिरता या नारी परमोत्तमा । भर्तारं नानुवर्तेत तस्याः पापा गतिर्भ-

वेत्' इति । पराशरोऽपि— 'पत्यौ जीवति या नारी उपोष्य व्रतचारिणी । आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्' इति । मनुरपि— 'जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् । देवताराधनं चेति स्त्रीशूद्रपतनानि षट्' इति । तस्मात्स्त्रीणां पतिशुश्रूषणमेव धर्मः नान्यदिति । किं बहुना, काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम् । अतिथिः पूजितो याद्धि ध्यायते मनसा शुभम् । न तत्क्रतुशतेनापि तुल्यमाहुर्मनीषिणः । पात्रं त्वतिथिमासाद्य शीलाढ्यं यो न पूजयेत् ॥ स दत्त्वा दुष्कृतं तस्य पुण्यमादाय गच्छति । तस्माद्गृहाश्रमस्थस्य नान्यदैवतमस्ति वै ॥ ऋतेऽतिथिम्' इत्यादिशास्त्रपर्यालोचनयावश्यकर्तव्यातिथिपूजनादपि स्त्रीणां भर्तृशुश्रूषणस्यैव श्रेष्ठ्यमुक्तम् । अरण्यपर्वणि तपश्चरणाय ऋष्याश्रमे संचरन्कौशिकः तरुमूलमुपाश्रित्य वेदानुच्चारयन्स्वशिरसि पुरीषमुत्सृजन्तीं बलाकामवलोक्य क्रोधाकुलहृदयः समपाध्यायत् । तत अपध्यानमात्रेण गतसत्त्वां पुरतो निपतितां बलाकामभि-

वीक्ष्य भृशं संतप्तहृदयः सकरुणं विलप्य भैक्षार्थी गृहादृहं संचरन्, कयाचित्स्त्रिया भैक्ष्यप्रदानाय निमन्त्रितः। तदागमनसमयं प्रत्यपालयत्। 'एतस्मिन्नन्तरे राजन्क्षुधासंपीडितो भृशम्। भर्ता प्रविष्टः सहसा तस्या भरतसत्तम ॥ सा तु दृष्ट्वा पतिं साध्वी ब्राह्मणं व्यपहाय तम्। पाद्यमाचमनीयं च ददौ भर्तुस्तदासनम् ॥ प्रह्वा पर्यचरच्चापि भर्तारमसितेक्षणा। आहारेणाथ भक्ष्यैश्च भोज्यैः सुमधुरैस्तथा। उच्छिष्टं भाविता भर्तुर्भुङ्क्ते नित्यं युधिष्ठिर ॥ दैवतं च पतिं मेने भर्तुश्चित्तानुसारिणी। कर्मणा मनसा वाचा नान्यचित्तात्यगात्पतिम् ॥ तं सर्वभावोपगता पतिशुश्रूषणे रता। साध्वाचारा शुचिर्दक्षा कुटुम्बस्य हितैषिणी ॥ भर्तुश्चापि हितं यत्तत्सततं सानुवर्तते। देवतातिथिभृत्यानां श्वश्रूश्वशुरयोस्तथा ॥ शुश्रूषणपरा नित्यं सततं संयतेन्द्रिया। सा ब्राह्मणं तदा दृष्ट्वा संस्थितं भैक्षकाङ्क्षिणम्। कुर्वती पतिशुश्रूषां सस्मारार्थ शुभेक्षणा ॥ व्रीडिता साभवत्साध्वी तदा भरतसत्तम। भिक्षामादाय विप्राय निर्जगाम यशस्विनी'। ततश्चिरेण

भैक्ष्यमादाय समागतां स्त्रियमवलोक्य संजातकोपेन द्विजवरेण 'ब्राह्मणा न गरीयांसो गरीयांस्ते पतिः कृतः। अवलिप्ते न जानीषे वृद्धानां न श्रुतं त्वया' इत्यधिक्षिप्ता स्त्री समभाषत— 'क्षन्तुमर्हसि मे विद्वन्भर्ता मे दैवतं महत्। स चापि क्षुधितः श्रान्तः प्राप्तः शुश्रूषितो मया'। ब्राह्मणः— 'ब्राह्मणा न गरीयांसो गरीयांस्ते पतिः कृतः। गृहस्थधर्मे वर्तन्ती ब्राह्मणानवमन्यसे॥ इन्द्रोऽप्येषां प्रणमते किं पुनर्मानवा भुवि। अवलिप्ते न जानीषे वृद्धानां न श्रुतं त्वया॥ ब्राह्मणा ह्यग्निसदृशा दहेयुः पृथिवीमपि'। स्त्र्युवाच— 'नाहं बलाका विप्रेन्द्र त्यज क्रोधं तपोधन। अनया क्रुद्धया दृष्ट्वा क्रुद्धः किं मां करिष्यसि॥ नावजानाम्यहं विप्रान्देवैस्तुल्यान्मनस्विनः। अपराधमिमं विप्र क्षन्तुमर्हसि मेऽनघ॥ जानामि तेजो विप्राणां महाभाग्यं च धीमताम्। अपेयः सागरः क्रोधात्कृतो हि लवणोदकः॥ तथैव दीप्ततपसां मुनीनां भावितात्मनाम्। येषां क्रोधाग्निरद्यापि दण्डके नोपशाम्यति॥ ब्राह्मणानां परि-

भवाद्वातापिः सुदुरात्मवान्। अगस्त्यमृषिमासाद्य जीर्णः क्रूरो महासुरः॥ बहुप्रभावाः श्रूयन्ते ब्राह्मणानां महात्मनाम्। अस्मिंस्त्वतिक्रमे ब्रह्मन्क्षन्तुमर्हस्यि मेऽनघ॥ पतिशुश्रूषया धर्मो यः स मे रोचते द्विज। दैवतेष्वपि सर्वेषु भर्ता मे दैवतं परम्॥ अविशेषेण तस्याहं कुर्यां धर्मं द्विजोत्तम। शुश्रूषायाः फलं पश्य पत्युर्ब्राह्मण यादृशम्। बलाका हि त्वया दग्धा रोषात्तद्विदितं मम'। ब्राह्मणः— 'प्रीतोऽस्मि तव भद्रं ते गतः क्रोधश्च शोभने॥ उपालम्भस्त्वयात्युक्तो मम निःश्रेयसं परम्। स्वस्ति तेऽस्तु गमिष्यामि शाधयिष्यामि शोभने'। मार्कण्डेयः— 'तया विसृष्टो निर्गत्य स्वमेव भवनं ययौ॥ विनिन्दन्स्वमात्मानं कैशिको द्विजसत्तमः,' इति। अतः स्त्रियाः भर्तृशुश्रूषणव्यतिरिक्तधर्मेषु कुत्राप्यनधिकारात्कथं कौसल्यया देवताराधनं कृतमिति चेन्न। भर्त्रनुज्ञया धर्माचरणे पूर्वोक्तदोषाभावात्। तथा च शङ्खलिखितौ 'कामं तु भर्तुरनुज्ञया व्रतोपवासनियमादीनामभ्यासः'। स्त्रीधर्मे कात्यायनोऽपि— 'भार्या

भर्तृमतेनैव व्रतादीनाचरेत्सती' इति । आदित्यपुराणे 'नारी खल्वननुज्ञाता भर्त्रा वापि सुतेन वा । विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदैहिकम्' इति । और्ध्वदैहिकं पारलौकिकम् । भर्तुरनन्तरं पुत्राज्ञा । कात्यायनः— 'भार्या पत्युर्मतेनैव व्रतादीनाचरेत्सदा' इति । तस्माद्भर्तुरनुज्ञया तच्छुश्रूषानुरोधेनैव यत्किंचिद्धर्माचरणे दोषो नास्तीत्यत्यल्पमिदमुच्यते । तदाज्ञया पातित्याधायककर्माचरणमपि श्रेयःसाधनमित्युक्तम् । 'अपत्यं धर्मफलदं श्रेष्ठं विन्दन्ति मानवाः । आत्मा शुक्रादपि पृथे मनुः स्वायंभुवोऽब्रवीत् । तस्मात्प्रहेष्याम्यद्य त्वां हीनः प्रजननात्स्वयम् ॥ सदृशाच्छ्रेयसो वा त्वं विद्धयपत्यं यशस्विनि । शृणु कुन्ति कथामेतां शारदण्डायनीं प्रति ॥ सा वीरपत्नी गुरूणा नियुक्ता पुत्रजन्मनि । पुष्पेण प्रयता स्नाता निशि कुन्ति चतुष्पथे ॥ वरयित्वा द्विजं सिद्धं हुत्वा पुंसवनेऽनलम् । कर्मण्यवसिते तस्मिन्सा तेनैव सहावसत् ॥ तत्र त्रीञ्जनयामास दुर्जयादीन्महारथान् । तथा

त्वमपि कल्याणि ब्रह्मणात्तपसाधिकात् । मन्नियोगाद्यतः क्षिप्रमपत्योत्पादनं प्रति ॥ अथ त्विदं प्रवक्ष्यामि धर्मतत्त्वं निबोध मे । पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥ अनावृताः खलु पुरा स्त्रिय आसन्वरानने । कामचारविहारिण्यः स्वतन्त्राश्चारुलोचने ॥ तासां व्युच्चरमाणानां कौमारात्सुभगे पतीन् । नाधर्मोऽभूद्वरारोहे स हि धर्मः सनातनः ॥ अद्याप्यनुविधीयन्ते कामद्वेषविवर्जिताः । प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ॥ श्वेतकेतोः किल पुरा समक्षं मातरं पितुः । जग्राह ब्राह्मणः पाणौ गच्छावं इति चाब्रवीत् ॥ ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः । क्रुद्धं तु तं पिता दृष्ट्वा वेपमानमुवाच ह ॥ मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः । अनावृता हि सर्वेषां वर्णानामङ्गना भुवि ॥ यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः । ऋषिपुत्रस्तु तं धर्मं श्वेतकेतुर्न चक्षमे । चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि ॥ मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु । तदाप्रभृति मर्यादास्थितेऽयमिति नः श्रुतम् ॥ भ्रूणहत्या-

कृतं पापं भविष्यत्यसुखावहम् । व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम्॥ भार्या तथा व्युच्चरतः कौमारब्रह्मचारिणीम् । पतिव्रतामेतदेव भविता पातकं भुवि । पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव च। न करोति वचस्तस्य भविष्यत्येतदेव हि ॥ इति तेन पुरा भीरु मर्यादा स्थापिता बलात् । उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना ॥ सौदासेन च रम्भोरु नियुक्तापत्यजन्मनि । मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ॥ तस्माल्लेभे च सा पुत्रमश्मकं नाम भामिनी । एवं कृतवती सा तु भर्तुः प्रियचिकीर्षया ॥ अस्माकमपि ते जन्म विदितं कमलेक्षणे । कृष्णद्वैपायनाद्भीरु कुरुवंशविवृद्धये ॥ अत एतानि सर्वाणि कारणानि समीक्ष्य वै । ममैतद्वचनं धर्म्यं कर्तुमर्हस्यनिन्दिते ॥ ऋतावृतौ राजपुत्रि स्त्रिया भर्ता पतिव्रते । नातिवर्तव्य इत्येवं धर्मं धर्मविदो विदुः॥ शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलार्हति । धर्ममेतं जनाः सन्तः पुराणं परिचक्षते । भर्ता भार्या राजपुत्रि धर्म्यं वाधर्म्यमेव वा ॥ यद्ब्रूयात्तत्तथा कार्यमिति धर्म-

विदो विदुः । मन्नियोगात्सुकेशान्ते द्विजातेस्तपसाधिकात् ॥ पुत्रान्गुणसमायुक्तानुत्पादयितुमर्हसि । त्वत्कृतेऽहं पृथुश्रोणि गच्छेयं पुत्रिणां गतिम्' इति । गुरुतल्पं हि गुर्वर्थे न दूषयति मानवम् । उद्दालकः श्वेतकेतुं जनयामास शिष्यतः ॥ एवमेवासूत कुन्ती पाण्डुं परपुरंजयम् । प्रत्युवाच वरारोहा भर्तुः प्रियहिते रता ॥ त्वयाहमभ्यनुज्ञाता विद्धयस्मिन्कर्मणि स्थिताम्' । तथा आनुशासनिके सुदर्शनोपाख्याने धर्मपुत्रं प्रति भीष्मः, अग्निसकाशात्सुदर्शनायामुत्पन्नः सुदर्शनाख्योऽग्निपुत्रः नृगराजस्य वंशजामौघवतीं कन्यां परिणीय— 'कुरुक्षेत्रेऽवसद्राजन्नौघवत्या समन्वितः । गृहस्थश्चावजेष्यामि मृत्युमित्येव स प्रभो । प्रतिज्ञामकरोद्धीमान्दीप्ततेजा विशांपते ॥ तामथौघवतीं राजन्स पावकसुतोऽब्रवीत् । अतिथेः प्रतिकूलं ते न कर्तव्यं कथंचन ॥ येन येन च तुष्येत नित्यमेव त्वयातिथिः । अप्यात्मनः प्रदानेन न ते कार्या विचारणा ॥ एतद्व्रतं मम सदा हृदि संपरिवर्तते । गृहस्थानां च सुश्रोणि नातिथेर्विद्यते परम् ॥

प्रमाणं यदि वा मोहवचस्ते मम शोभने। इदं वचनमव्यग्रा हृदि त्वं धारयेः सदा ॥ निष्क्रान्ते मयि कल्याणि तथा संनिहितेऽनघे। नातिथिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव ॥ तमब्रवीदौघवती तथा मूर्ध्नि कृताञ्जलिः। न मे त्वद्वचनातिक्रिचिन्न कर्तव्यं कथंचन ॥ जिगीषमाणस्तु गृहे तदा मृत्युः सुदर्शनम्। पृष्ठतोऽन्वगमद्राजन्रन्ध्रान्वेषी तदा तदा ॥ इध्मार्थं तु गते तस्मिन्नग्निपुत्रे सुदर्शने। अतिथिर्ब्राह्मणः श्रीमांस्तामाहौघवतीं तदा ॥ आतिथ्यं कर्तुमिच्छामि त्वयाद्य वरवर्णिनि। प्रमाणं यदि धर्मस्ते गृहस्थाश्रमसंमतम् ॥ इत्युक्त्वा तेन विप्रेण राजपुत्री यशस्विनी। विधिना प्रतिजग्राह वेदोक्तेन विशांपते। आसनं चैव पाद्यं च तस्मै दत्त्वा द्विजातये ॥ प्रोवाचौघवती विप्रं केनार्थः किं ददामि ते। तामब्रवीत्तदा विप्रो राजपुत्रीं सुदर्शनीम् ॥ त्वया ममार्थः कल्याणि निर्विशङ्कैतदाचर। यदि प्रमाणं धर्मस्ते गृहस्थाश्रमसंमतम् ॥ प्रदानेनात्मनो राज्ञि कर्तुमर्हसि मे प्रियम्। स तया च्छन्द्यमानो-

न्यैरीप्सितैर्नृपकन्यया ॥ नान्यमात्मप्रदानात्स तस्या वव्रे वरं द्विजः । सा तु राजसुता स्मृत्वा भर्तुर्वचनमादितः ॥ तथेति लज्जमाना सा तमुवाच द्विजर्षभम् । ततो विहस्य विप्रर्षिः सा चैवाथ विवेश ह ॥ संस्मृत्य भर्तुर्वचनं गृह-स्थाश्रमकाङ्क्षिणः । अथेध्मं समुपादाय स पावकिरुपागमत् ॥ तस्मै प्रतिवचः सा च भर्त्रे न प्रददौ तदा । कराभ्यां तेन विप्रेण स्पृष्ट्वा भर्तृमती सती ॥ उच्छिष्टा-स्मीति मन्वाना लज्जिता भर्तुरेव च । तूष्णीभूताभवत्साध्वी न चोवाचाथ किंचन ॥ अथ तां पुनरेवेदं प्रो-वाच स सुदर्शनः । कुतः साध्वी क सा याता गरीयः किमतो मम । पतिव्रता सत्यशीला नित्यं चैवार्जवे रता । कथं न प्रत्युदेत्यद्य स्मयमाना यथा पुरा । उटजस्थस्तु तं विप्रः प्रत्युवाच सुदर्शनम् ॥ अतिथिं विद्धि संप्राप्तं ब्राह्मणं पावकं च माम् । अनया च्छन्द्यमानोऽहं भार्यया तव सत्तम ॥ तैस्तैरतिथिसत्कारैर्ब्रह्मन्नेषा वृता मया । अनेन विधिना सेयं मामृच्छति शुभानना ॥ अनुरूपं यदत्रान्यत्तद्भवान्कर्तुमर्हति । कूटमुद्गरहस्तस्तु मृत्युस्तं वै

समन्वगात्। हीनप्रतिज्ञमत्रैनं वधिष्यामीति चिन्तयन्। सुदर्शनस्तु मनसा कर्मणा चक्षुषा गिरा॥ त्यक्तैर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदम्। सुरतं तेऽस्तु विप्राग्र्य प्रीतिर्हि परमा मम॥ गृहस्थस्य हि धर्मोऽग्र्यः संप्राप्तातिथिपूजनम्। अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति॥ नान्यस्तस्मात्परो धर्म इति प्राहुर्मनीषिणः। प्राणा हि मम दाराश्च यच्चान्यद्विद्यते वसु॥ अतिथिभ्यो मया देयमिति मे व्रतमाहितम्। निःसंदिग्धं यथा वाक्यमेतन्मे समुदाहृतम्॥ तेनाहं विप्र सत्येन स्वयमात्मानमालभे। पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्॥ बुद्धिरात्मा मनः कालो दिशश्चैव गुणा दश। नित्यमेव हि पश्यन्ति देहिनां देहसंश्रिताः। सुकृतं दुष्कृतं चापि कर्म धर्मभृतां वर॥ यथैषां नानृता वाणी मयाद्य समुदीरिता। तेन सत्येन मां देवाः पालयन्तु दहन्तु वा॥ ततो नादः समभवद्दिक्षु सर्वासु भारत। असकृत्सत्यमित्येव नैतन्मिथ्येति सर्वतः॥ उटजात्तु ततस्तस्मान्निश्चक्राम स वै द्विजः। वपुषा द्यां च

भूमिं च व्याप्य वायुरिवोद्यतः ॥ स्वरेण विप्रः शैघ्र्येण त्रीँल्लोकाननुनादयन् । उवाच चैनं धर्मज्ञं पूर्वमामन्त्र्य नामतः ॥ धर्मोऽहमस्मि भद्रं ते जिज्ञासार्थं तवानघ । प्राप्तः सत्यं च ते ज्ञात्वा प्रीतिर्मे परमा त्वयि ॥ विजितश्च त्वया मृत्युर्योऽयं त्वामनुगच्छति । रन्ध्रान्वेषी तव सदा त्वया धृत्या वशीकृतः । न चास्ति शक्तिस्त्रैलोक्ये कस्यचित्पुरुषोत्तम । पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमप्युत ॥ रक्षिता त्वद्गुणैरेषा पतिव्रतगुणैस्तथा । अधृष्या यदिदं ब्रूयात्तत्तथा नान्यथा भवेत् । एषा हि तपसा स्वेन संयुक्ता ब्रह्मवादिनी ॥ पावनार्थे च लोकस्य सरिच्छ्रेष्ठा भविष्यति । अनेनैव च देहेन लोकांस्त्वमिह पत्स्यसे ॥ अर्धेनौघवती नाम त्वामर्धेनानुयास्यति । शरीरेण महाभागा योगो ह्यस्या वशे स्थितः । अनया सह लोकांश्च गन्तासि तपसार्जितान् ॥ यत्र नावृत्तिमभ्येति शाश्वतांस्तान्सनातनान् । अनेनैव च देहेन लोकांस्त्वमभिपत्स्यसे ॥ निर्जितश्च त्वया मृत्युरैश्वर्यं च तवोत्तमम् । पञ्च भूतान्यतिक्रान्तः स्ववीर्याच्च मनोजवः ॥ गृहस्थ-

धर्मेणानेन कामक्रोधौ च ते जितौ। स्नेहो रागश्च तन्द्री च मोहो द्रोहश्च केवलः॥ तव शुश्रूषया राजन्राजपुत्र्या विनिर्जिता' इति। अतश्च— पतिशुश्रूषावत्तदाज्ञापनपरिपालनमपि मुख्यो धर्मः। तथा च विज्ञानेश्वरीये 'स्त्रीभिर्भर्तुर्वचः कार्यमेष धर्मः सनातनः'। एतदुभयाकरणेऽपि प्रत्यवायः, करणे तु ऐहिकामुष्मिकसकलफलावाप्तिरित्यवगतम्। एवं च, वनं प्रति गमनसमये सीतां प्रति सकलपतिव्रताधर्मोपदेशेन स्वकीयनिष्ठुरभाषणप्रयुक्तदोषपरिहाराय बहुधा भर्तुः प्रसादनेन च सकलपतिव्रताधर्माभिज्ञा कौसल्येत्यवगम्यते। रामेणापि

शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता।

इति धर्मान्तरं निराकुर्वतः

अग्निकार्येषु च सदा सुमनोभिश्च देवताः।
पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सुव्रताः॥
नियतानियताहाराः भर्तृशुश्रूषणे रताः।

इति धर्मान्तराचरणस्याभ्यनुज्ञानेन कौसल्यायाः धर्मान्तराचरणे भर्तुराज्ञास्तीत्यवगम्यते। अतः भर्तुराज्ञां विना स्वतन्त्रतया धर्माचरणं न करिष्यति, दासीवच्च सखीवच्च मातृवद्भगिनीवच्च भार्यावच्चोपतिष्ठत इत्यादि दशरथवचनगतपतिशुश्रूषणानुरोधेन तदनुज्ञयैव ध्यानादिधर्माचरणं कृतवतीति न किंचिदनुपपन्नम्। अत एव

उवाच रामो वचनं हर्षयंस्तामनिन्दिताम्।
अम्ब पित्रा नियुक्तास्मि प्रजापालनकर्मणि॥

यानि यान्यत्र योग्यानि श्वोभाविन्यभिषेचने।
तानि मे मङ्गलान्यद्य वैदेह्याश्चापि कारय॥

इत्यभिहितवान्। ततश्च संजातसंतोषया कौसल्यया

वत्स राम चिरं जीव हतास्ते परिपन्थिनः।
ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय॥

कल्याणे बत नक्षत्रे मया जातोऽसि पुत्रक।
येन त्वया दशरथो गुणैराराधितः पिता॥

अमोघं बत मे क्षान्तं पुरुषे पुष्करेक्षणे ।
येऽयमिक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ॥

सततं प्रियकामा मे प्रियपुत्र प्रियंवद ।
न मया सत्कृता देवी सत्कारार्हा कृते तव ॥'

इति । भक्त्या शुश्रूषमाणा कौसल्या सत्कारार्हापि त्वत्कृते न मया सत्कारैरभिनन्दितेत्यग्रे कैकेयीविवाहसमये राज्यस्य शुल्कत्वेन प्रतिज्ञया च राज्यश्रीः परमग्रेमास्पदंकैकेयीपुत्रस्यैवेति निश्चितापि मत्कृततपश्चर्यासंतुष्टपुष्करेक्षणप्रसादपात्रभूतेन कल्याणनक्षत्रोत्पन्नेन त्वया स्वगुणाराधितपितृप्रीतिवशादधिगतेत्युक्तम् । तथा चादिपर्वणि पूर्वयायाते राज्यानर्हस्य कनिष्ठस्यापि स्वगुणैः पित्राराधनजनितपितृप्रीत्या राज्यप्राप्तिरुक्ता । मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः । स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु ॥ यदुनाहमनुज्ञातस्तथा तुर्वसुनापि च । द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥ पुरुणानुकृतं वाक्यं मानितं च विशेषतः ।

कनीयान्मम दायादो धृता येन जरा मम ॥ भवतोऽनुनयाम्येवं पुरू राज्येऽभिषिच्यताम्' इति राज्ञा पृष्टाः प्रकृतय ऊचुः— 'यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा । सर्वमर्हति कल्याणं कनीयानपि सत्तमः ॥ अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव' इति । ततो रामः पार्श्वतः समासीनं प्राञ्जलिं लक्ष्मणमवलोक्य—

लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधराम् ।
द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता ॥

सौमित्रे भुङ्क्ष्व भोगांस्त्वमिष्टान्राज्यफलानि च ।
जीवितं च हि राज्यं च त्वदर्थमभिकामये ॥

अनेन श्रीरामस्य ऐश्वर्याद्युपभोगो भ्रातृभिः सहैवाभिमतः' इति गम्यते । तथा च बालकाण्डे—

सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ।
लक्ष्मणो लक्ष्मिसंपन्नो बहिःप्राण इवापरः ॥

न च तेन विना निद्रां लभते पुरुषोत्तमः ।
मृष्टमन्नमुपानीतमश्नाति न हि तं विना ॥

तथा अग्रेऽपि चित्रकूटे भरतागमे ससंभ्रमं लक्ष्मणं प्रति

इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ।
भ्रातृणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण ।

राज्यमप्यहमिच्छामि सत्येनायुधमालभे ।
यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद ॥
भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ।

इति । एवं च, इतरैरपि संप्राप्तमैश्वर्यं भ्रातृभ्यो दत्त्वैव भोक्तव्यमित्युक्तं भवति । तथा च भारते राजधर्मे युधिष्ठिरं प्रति व्यासः—'धर्ममर्थं च कामं च भ्रातृभिः सह भारत। अनुभूय ततः पश्चात्प्रस्थातासि विशां पते' इति। स्वर्गारोहणिकेऽपि 'भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम । अर्जुनं चेन्द्रसंकाशं यमौ चैव यमोपमौ ॥

द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीम् । न चेह स्थातुमिच्छामि सत्यमेव ब्रवीमि वः ॥ किं मे भ्रातृविहीनस्य स्वर्गेऽपि सुरसत्तमाः । यत्र ते मम सर्गो वा अयं स्वर्गो मतो मम ॥ न तैरहं विना रंस्ये भ्रातृभिर्ज्ञातिभिस्तथा' इति ।

इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ।
अभ्यनुज्ञाप्य सीतां जगाम स्वं निवेशनम् ॥

पञ्चमे— ततो राजनियोगेन ब्राह्मं रथं समास्थाय कक्षात्रयमपि रथेनैव संप्राप्तं कुलपुरोहितं वसिष्ठमुपश्रुत्य ससंभ्रममुपागतो रामभद्रः

ततोऽवतारयामास परिगृह्य रथात्स्वयम् ।

अनेनान्यैरपि एवमेव गुर्वादीनां पूजा कर्तव्या इति सूचितम् । तथा च मनुः— 'प्रतिश्रवणसंभाषे शयानो न समाचरेत् । नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥ आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठ-

तः । प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥ पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् । प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥ नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसंनिधौ । गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत्' इति । गौतमोऽपि— 'गुरुदर्शने चोत्तिष्ठेद्व्रच्छन्तमनुव्रजेत्' इति । स एवान्यत्र 'गुरुदर्शने कर्णप्रावृतावसक्थिकापाश्रयणपादप्रसारणानि च' इति । आपस्तम्बोऽपि— 'देवमिवाचार्यमुपासीत' इति । विष्णुपुराणेऽपि 'स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीतवासिते ॥ शिष्यो गुरुं नरश्रेष्ठ प्रतिकूलं न संचरेत्' इति । तत आसनार्घ्यपाद्यादिभिः समागतमाचार्यमभिपूज्य तदनुज्ञया स्वयमप्यासन उपविवेश । ततो वसिष्ठोऽपि

**उपवासं भवानद्य करोतु सह सीतया ।**
**प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ॥**

**इत्युक्त्वा स तदा राममुपवासं यतव्रतम् ।**
**मन्त्रवत्कारयामास वैदेह्यासहितं मुनिः ॥**

अनेन राज्याभिषेकात्पूर्वदिने विहितं कर्मजातं कारितामित्युक्तम् । तत्र अभिषेकात्पूर्वदिनकृत्यमाह बोधायनः 'अथातो राजाभिषेकविधिं व्याख्यास्यामः— पूर्वपक्षस्य पञ्चम्यां त्रयोदश्यां तिष्ये श्रोणायां वा यानि चान्यानि शुभनक्षत्राणि तेषु पूर्वेद्युरेव युग्मान्ब्राह्मणान्भोजयेत्। आशिषो वाचयित्वा योनिगोत्रश्रुतवृत्तसंपन्नं ब्राह्मणं पुरोहितं वृणीत 'आकूत्यै त्वा कामाय त्वा समृधे त्वेति पुरोहितो जपति—आकुतिमस्यावसे काममस्य समृद्धयै इन्द्रस्य युञ्जते धियः' इति। स्वयं जपति— आकूतिं देवीं मनसः पुरोदधे यज्ञस्य माता सुहवा मे अस्तु । यदिच्छामि मनसा सकामो विदेयमेनद्धृदये निविष्टमिति। अथास्तमित आदित्ये पद्माकृतिं मण्डपं कृत्वा उपकल्पयते, व्रीहियवैस्तिलमाषैः पञ्चगव्यैः सामुद्राश्चापो नद्याश्चौदुम्बरं भद्रासनं व्याघ्रचर्म हेमकलशैर्गोशृङ्गैश्च संभृत्य सह सादयति यत्सह सर्वाणि मानुषाणीत्येतस्माद्ब्राह्मणात् उत्तरपूर्वदेशेऽगारस्य पाकयज्ञविधानेन व्रीहिभिर्यवैस्तिलमाषैर्व्याहृतिभिः सावित्र्या च व्यम्बकेनाष्टसहस्रं जुहोति । अथ

दक्षिणार्धे श्रीसूक्तविधानेन श्रीदेवीमाराध्य मकुटं प्रक्षालयति। 'गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधिक्रावृण्णेति वै दधि शुक्रमसीत्याज्यं देवस्य त्वेति कुशोदकम्' इति मकुटं प्रक्षाल्य प्रतिसरं बध्नाति— 'प्रतते अद्य शिपिविष्ट' इति। राजानं राजवाहनं चाभिषिञ्चेदेतां रात्रिमुपविशेत्संविशेद्वा' इति। ततो यथावद्रामेण समभ्यर्चितो वसिष्ठः रामाभिषेकश्रवणसमयसमुदितानन्दसंदोहतुन्दिलपौरजनावलोकनजनितहर्षप्रकर्षः सर्वं सुविहितमिति राज्ञे निवेद्य तदनुज्ञया स्वभवनमाससाद। षष्ठे—

गते पुरोहिते रामः स्नातो नियतमानसः।
सह पत्न्या विशालाक्ष्या नारायणमुपागमत्॥

अत्र 'स्नात' इत्यनेन विशेषणेन कर्माङ्गं स्नानमुक्तम्॥ तथा च बोधायनः— 'वेदकर्माणि प्रयोक्ष्यन्नादित एव तीर्थे स्नात्वा' इति। गौतमोऽपि— 'मनः

प्रसादात्सत्योक्त्या तपसा स्नानकर्मणा । आचान्त्या च मनःशुद्धिं कृत्वा कर्म समारभेत् ' इति । विष्णुपुराणेऽपि— 'नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च' इति । व्यासोऽपि— 'न हि स्नानं विना पुंसां प्रायत्यं कर्मसु स्मृतम् । होमे जप्ये विशेषेण तस्मात्स्नानं समाचरेत्' इति । 'नियतमानसः' इत्यनेन निगृहीतान्तःकरणेन कर्म कर्तव्यमित्युक्तं भवति ।

प्रगृह्य शिरसा पात्रीं हविषो विधिवत्तदा ।
महते दैवतायाज्यं जुहाव ज्वलितेऽनले ॥

अत्र 'ज्वलितेऽनले' इत्यनेन प्रज्वलितेऽग्नावेव होमः कर्तव्यो न धूमाद्यवस्थायामित्युक्तम् । तथा चाथर्वणी श्रुतिः— 'यदा लोलायते ह्यर्चिः समिद्धे हव्यवाहने । तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत्' इति । आपस्तम्बोऽपि— 'यदा वीतार्चिर्लोलायतीवाग्निरथाहुतीः' इति । विष्णुरपि— 'बहुशुष्केन्धने चाग्नौ सुसमिद्धे हुताशने । विधूमे लेलिहाने च होतव्यं कर्मसिद्धये '

इति। स एवानर्चिषि होमे अनिष्टफलमाह— 'योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारे चैव मानवः। मन्दाग्निरामयावी च दरिद्रश्चोपजायते' इति।

शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियम्।

अत्र हुतशिष्टस्य भक्षणादिना प्रतिपत्तिः कर्तव्या इत्युक्तं भवति। तथा च बृहदारण्यके— 'अथाभिप्रातरेव स्थालीपाकावृताज्येन चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहा इति हुत्वोद्धृत्य प्राश्नाति' इति। 'तच्छेषेऽप्यायुष्यचरौ अपरेणाग्निं प्राङ्मुख उपविश्य, वाग्यतः स्थालीपाकं सगणः प्राश्नाति' इति। तैत्तरीयश्रुतिरपि हविर्दाने— 'प्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति' इति। आपस्तम्बोऽपि—'अत्रैव ऋत्विजो हविःशेषान्भक्षयन्ति यजमानपञ्चमा इडां प्राश्य इति सोमान्हविःशेषान्' इति, 'सुत्येऽहनि भक्षयति' इति च। बोधायनोऽपि— 'एतस्मिन्काल आग्नीध्रे यजमानः

पुरोडाशानां प्राश्नाति'। आश्वलायनोऽपि— 'हविरुच्छिष्टं सर्वे प्राश्नीयुः' इति। 'आशास्यात्मनः प्रियम्' इत्यनेन फलवति कर्मणि फलप्रार्थनं कर्तव्यमित्युक्तम्॥ तथा च बोधायनापस्तम्बौ— 'क्रत्वादौ क्रतुकामं कामयेत यज्ञाङ्गादौ यज्ञाङ्गकामम्' इति, 'हुत्वा ध्यायेद्यत्कामः स्यात्' इति च।

**ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे।**

अत्र सत्कर्मसु परमेश्वरध्यानं कर्तव्यमित्युक्तम्। तथा च गोपालकारिकायाम्— 'ईश्वरो नित्यकालात्मा चिन्तनीयः सुकर्मसु' इति। 'स्वास्तीर्णे कुशसंस्तरे' इत्यनेन व्रतदिने खट्वादिवर्जनपूर्वकं कुशेषु शयनं कर्तव्यमित्युक्तम्। तथा च बोधायनः— 'नासन्द्यां शयीत' इति। आपस्तम्बोऽपि— 'उपरित्वेन शयीत' इति। यमोऽपि— 'खट्वासनं च शयनं वर्जयेद्दन्तधावनम्। स्वपेदेकः कुशेष्वेव न रेतः स्कन्दयेत्कचित्' इति।

**वाग्यतः सह वैदेह्या भूत्वा नियतमानसः।**

'जपकाले न भाषेत व्रतहोमादिकेषु च' इति ।

श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥

अनेन लक्ष्मीपूजां कृत्वा पट्टाभिषेकपूर्वदिने देवतागृहे शयनं कर्तव्यमित्युक्तम् । अयमर्थः— 'श्रीदेवीमाराध्यैतां रात्रिमुपविशेत्संविशेद्वा' इति पूर्वोदाहृतबोधायनसूत्रे स्पष्टः ।

एकयामावशिष्टायां रात्र्यां प्रतिविबुध्य सः ।
अलंकारविधिं कृत्स्नं कारयामास वेश्मनः ॥

अत्र सूर्योदयात्प्रागेव गृहस्य संमार्जनाद्यलंकरणं कारयितव्यमित्युक्तम् । गृहस्यालंकरणादिविधिः स्त्रिया कर्तव्यमित्युक्तं मार्कण्डेयपुराणे— 'स्त्रीधर्मः परं शृणु त्वं स्त्रीधर्मान्ननु विस्तरात् । उदुम्बरे वसेन्नित्यं भावनी सर्वदेवता ॥ ततः सा प्रत्यहं पूज्या गन्धपुष्पाक्षतादिभिः । अशून्या देहली कार्या प्रातःकालें विशेषतः॥ यस्याः शून्या भवेत्सा तु शून्यं तस्याः कुलं भवेत् ॥ पादस्य स्पर्शनं तत्र

असंपूज्या च लङ्घनम् । कुर्वन्नरकमाप्नोति तस्मात्तत्परिवर्जयेत् ॥ प्रातःकाले स्त्रिया कार्यं गोमयेनानुलेपनम् । प्रत्यहं सदने तस्मान्नैव दुःखिनि पश्यति ॥ स्पृशन्ति रश्मयो यस्य गृहं संमार्जनादृते । भवन्ति विमुखास्तस्य पितरो देवमातरः ॥ निशायाः पश्चिमे यामे धान्यसंस्करणादिकम् । क्रियमाणं हि नारीणां सर्वश्रेयोधनावहम् ॥ संध्याकाले तु संप्राप्ते धान्यसंस्करणादिकम् । कुरुते या तु मोहेन वन्ध्या जन्मनि जन्मनि । संध्याकाले तु संप्राप्ते मार्जनं न करोति या । भर्तृहीना भवेत्सा तु निःस्वा जन्मनि जन्मनि ॥ अकृतस्वस्तिका या तु क्रामेल्लिप्तां च मेदिनीम् । तस्याल्लक्ष्मीः विनश्यन्ति वित्तमायुर्यशस्तथा ॥ मार्जनीं चुल्लिकां काष्ठं दृषदश्चोपलांस्तथा । नाक्रमेदकृपिणा जातु पुत्रदारधनक्षयात् ॥ ऊलूखलं च मुसलं तथा चैव घरट्टकम् । पदाक्रमणात्पापी यो नाप्नुयादुत्तमां गतिम्' । तथा संग्रहे— 'यद्गृहं राजते नित्यं रङ्गवल्यानुलेपनैः । तद्गृहे वसते लक्ष्मीर्नित्यं पूर्णकलान्विता ॥

तत्र शृण्वन्सुखा वाचः सूतमागधवन्दिनाम् ।

अत्र सुखा वाचः शृण्वन्प्रतिविबुध्येत्युक्त्या सुखसंसुप्तोऽस्य राजा श्रुतिसुखवीणावेणुमृदङ्गशब्दैः स्तुतिभिश्चोषसि प्रबोध्यः इति सूचितम् । तथा च भारते आदिपर्वणि—'मधुरेणैव गीतेन वीणाशब्देन चैव ह । प्रबोध्यमानो बुबुधे स्तुतिभिर्मङ्गलैस्तथा' इति । शान्तौ राजधर्मेऽपि—'ततः प्रविश्य भवनं प्रशिश्ये मधुसूदनः । याममात्रावशेषायां यामिन्यां प्रत्यबुध्यत ॥ संज्ञानपदमाविश्य सर्वज्ञानानि माधवः । अवलोक्य ततः पश्चाद्ध्यौ ब्रह्म सनातनम् ॥ सूताः स्तुतिपुराणज्ञा रक्तकण्ठाः सुशिक्षिताः । अस्तुवन्विश्वकर्माणं वासुदेवं प्रजापतिम् ॥ पठन्ति पाणिस्वनिनो गाथा गायन्ति गायकाः । शङ्खानकमृदङ्गाश्च प्रावाद्यन्त सहस्रशः ॥ वीणापणववेणूनां स्वनश्चापि मनोरमः । प्रभात इव विस्तीर्णः शुश्रुवे तस्य वेश्मनि । तथा युधिष्ठिरस्यापि राज्ञो मङ्गलसंनिभाः । उच्चैरुर्मधुरा वाचो गीतवादित्रसंयुताः ॥ तत उत्थाय दाशार्हः स्नातः प्राञ्जलिरच्युतः' इति ।

कालिदासोऽपि— 'तं कर्णभूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशाङ्गरागम् । सूतात्मजाः सवयसः प्रथितप्रबोधं प्राबोधयन्नुषसि वाग्भिरुदारवाचः' इति।

**एकयामावशिष्टायां रात्र्यां प्रतिविबुध्य सः ।**

इत्यनेन ब्राह्मे मुहूर्ते उत्थाय कर्तव्यहितचिन्तनादिकर्मोक्तं भवति । तथा च मनुः— 'ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् । कायक्लेशांश्च तन्मूलान्वेद तत्त्वार्थमेव च' इति । याज्ञवल्क्योऽपि— 'ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् । धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत्' इति । विष्णुपुराणेऽपि— 'ब्राह्मे मुहूर्ते चोत्थाय मनसा मतिमान्नृप । विबुद्धश्चिन्तयेद्धर्ममर्थं चाप्यविरोधिनम् ॥ अपीडया तयोः काममुभयोरपि चिन्तयेत् । परित्यज्य चार्थकामौ धर्मपीडाकरौ नृप ॥ धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव च ' इति । कूर्मपुराणेऽपि— ब्राह्मे मुहूर्ते उत्थाय धर्मार्थावनुचिन्तयेत् । कायक्लेशं तदुद्भवं ध्यायीत परमेश्वरम् ' इति ।

तत्र सूर्योदयादर्वागर्धप्रहरः द्वौ मुहूर्तौ, तत्राद्यो ब्राह्मः, द्वितीयो रौद्रः, तत्राद्यस्य लक्षणमुक्तं स्मृतिभास्करे— 'रात्रेस्तु पश्चिमे यामे मुहूर्तौ ब्राह्म उच्यते' इति। तत्र गुर्वादीनामपि स्मरणं कर्तव्यमित्याह शौनकः— 'गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च' इति। स्मृत्यन्तरेऽपि— 'षोढा विभज्य रजनीं चरमांशे प्रबोधिताः। पत्न्या सह हरिं ध्यात्वा धर्ममर्थं च चिन्तयेत्' इति। ध्यानप्रकारमाह व्यासः— ब्रह्मासुरारिस्त्रिपुरान्तकश्च भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम्' इति। तदा दर्शनीयानाह कात्यायनः— 'श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा। प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते' इति। अदर्शनीयानप्याह— 'पापिष्ठं दुर्भगं मद्यं नग्नमुल्लुत्तनासिकः। प्रातरुत्थाय यः पश्येत्तु तत्कुरूपलक्षणम्' इति। नोपरुद्धः क्रियाश्चरेदित्यादिवचनैर्मलमूत्राद्युपरुद्धस्य कर्मानधिकारदर्शनात्तदुत्सर्गप्रकारमाह अङ्गिराः— 'उत्थाय पश्चिमे रात्रौ तत आचम्य चोदकम्। अन्त-

र्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥ वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः । कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः' इति । आपस्तम्बोऽपि— 'शिरः प्रावृत्य मूत्रपुरीषे कुर्याद्भूम्यां किंचिदन्तर्धाय' इति । तृणविशेषानाह अङ्गिराः 'शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनम् । अयज्ञियैरनार्द्रैश्च तृणैः संच्छाद्य मेदिनीम्' इति । अत्र निवीतमाह बोधायनः— 'नक्तमुष्णीषी मूत्रपुरीषोत्सर्गेषु च निवीती' इति । अङ्गिरास्तु 'कृत्वा यज्ञोपवीतं तु कण्ठतः पृष्ठलम्बितम् । विण्मूत्रं तु गृही कुर्याद्वा कर्णे समाहितम्' इति । कर्णनिधानमेकवस्त्रविषयम् ; तथा च सांख्यायनः— 'यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात्' इति । कर्णविशेषमाह स एव 'यज्ञोपवीतं कर्णे च दक्षिणे च निधाय च । कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः' इति । तत्र कालभेदेन दिङ्नियममाह गौतमः— 'मूत्रपुरीषे दिवा कुर्यादुदङ्मुखः संध्ययोश्च रात्रौ तु दक्षिणामुखः' इति । यमस्तु— 'प्रत्यङ्मुखस्तु पूर्वाह्णे सायाह्णे प्राङ्मुखस्तथा । उदङ्मु-

खस्तु मध्याह्ने निशायां दक्षिणामुखः' इति। एतद्वचनं सूर्याभिमुखत्वनिवृत्तिपरम्। तथा च भारते— 'प्रत्यादित्यं प्रज्वलनं प्रति गां च प्रति द्विजम्। मेहन्ति चेत्पतिष्यन्ति भवन्ति च गतायुषः' इति। मनुरपि— 'मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा' इति। विण्मूत्रादि च दूरादेव कर्तव्यम्। तथा च मनुः— 'दूरादावसथान्मूत्रं दूरात्पादावसेचनम्। उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत्' इति। स एव वर्ज्यदेशविशेषानाह— 'न श्मशाने न च पथि न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्वते॥ न जीर्णदेवायतने न वल्मीके कदाचन। ससत्त्वेषु च गर्तेषु न गच्छन्नापि वा स्थितः॥ न नदीतीरमासाद्य न च पर्वतमस्तके। वाय्वग्निविप्रादित्यमपः पश्यन्स्त्रियश्च गाः॥ न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम्' इति। गौतमोऽपि— 'न भस्मकरीषकृष्टच्छायापथिकाम्येषु' इति। न वाय्वग्निविप्रादित्यापोदेवता गाश्च प्रतिपश्यन्वा

मूत्रपुरीषामेध्यान्व्युदस्येत्' इति च । आपस्तेम्बोऽपि— 'न सोपानविण्मूत्रपुरीषे कुर्यात्कृष्टे पथ्यपसु च च्छायायां मूत्रपुरीषयोः कर्म वर्जयेत्, अग्निमादित्यमपो ब्राह्मणं गोदेवताश्चाभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत्' इति । तदनन्तरकृत्यमाह याज्ञवल्क्यः— 'गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतोदकैः । गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः' इति । देवलोऽपि— 'आशौचान्नोत्सृजेच्छिश्नं प्रस्रावोच्चारयोरपि । गुदं हस्तं च निर्मृज्य मृदम्भोभिर्मुहुर्मुहुः' । गौतमोऽपि— 'लेपगन्धापकर्षिणे शौचमध्यस्य तद्भिः पूर्वं मृदा च' इति । दक्षोऽपि—'तीर्थं शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा' इति । अपामुद्धरणासंभवे विशेषमाह विश्वरूपः— 'रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते । पश्चाच्छोधयेत्तीर्थमन्यथा ह्यशुचिर्भवेत्' इति । शौचयोग्यां मृदमाह यमः—'आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां तथा' इति । तत्रैव विशेषमाह मरीचिः— 'विप्रे शुक्ला तु मृत्प्रोक्ता रक्ता क्षत्रे विधीयते । हारिद्रवर्णा वैश्यस्य शूद्रे कृष्णेति निर्दिशेत्' उक्तविशेषा-

भावे या काचन ग्राह्या । तथा च मनुः— 'यस्मिन्देशे तु यत्तोयं या च यत्रैव मृत्तिका । सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते' इति । विष्णुपुराणे वर्ज्या मृदो दर्शिताः— 'वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा । शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवाम् ॥ अणुप्राण्युपपन्नां च फालोत्कान्तां न कर्दमाम्' इति । देवलोऽपि— 'अङ्गारतुषकीटास्थिशर्करावालुकान्विताम् । ग्रामबाह्यान्तरालस्थां वालुकापांसुरूपिणीम् ॥ आहृतामन्यशौचार्थमादद्दीत न मृत्तिकाम्' इति । हस्तनियममाह देवलः— 'धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत्' । मृत्परिमाणमाह शातातपः— 'आर्द्रामलकमात्रास्तु प्रासा इन्दुव्रते स्थिताः । तथैवाहुतयः सर्वाः शौचार्थे याश्च मृत्तिकाः' इति । स एव मृत्संख्यामाह— 'एका लिङ्गे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः । मूत्रशौचं समाख्यातं शकृति द्विगुणं भवेत्' इति । मनुरपि— 'एका लिङ्गे गुदे तिस्रः तथैकत्र करे दश । उभयोः सप्त दातव्याः मृदः शुद्धिमभीप्सता ॥ एतच्छौचं गृहस्थस्य द्विगुणं तु ब्रह्मचारिणः । त्रिगुणं

वनस्थस्य यतीनां तु चतुर्गुणम्' इति । स्त्रीशूद्रयोरर्ध-शौचम् । तथा चादित्यपुराणे– 'स्त्रीशूद्रयोरर्धमानं प्रोक्तं शौचं मनीषिभिः । दिवा शौचस्य निश्यर्धं पथि पादं विधीयते ॥ देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्' इति । उक्त-संख्यया गन्धलेपनिवृत्तौ मनुः— 'यावन्नापैत्यमेध्याक्ता-द्गन्धो लेपश्च तत्कृतः । तावन्मृद्वारि देयं स्यात्सर्वद्रव्य-विशुद्धिषु' । मनस्तुष्ट्यभावे देवलः— 'यावत्तु शुद्धिं मन्येत तावच्छौचं विधीयते' इति । शौचस्यावश्यकर्त-व्यतामाह दक्षः— 'शौचे यत्नः सदा कार्यः शौचमूलो यतो द्विजः । शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः' इति । तत आचमनमाह पराशरः— 'कृ-त्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्ध-शिखकच्छस्तु तत आचाममाचरेत् ॥ कृत्वोपवीतं सव्येन वाङ्मनःकायसंयतः' इति । आचमनप्रकारमाह आप-स्तम्बः— 'आसीनस्त्रिराचामेद्धृदयंगमाभिरद्भिः' इति । याज्ञवल्क्योऽपि— 'अन्तर्जानुः शुचौ देशे उपविष्ट

उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्' इति। गौतमोऽपि—'शुचौ देशे आसीनो दक्षिणं बाहुं जान्वन्तरा कृत्वा यज्ञोपवीत्या मणिबन्धात्पाणी प्रक्षाल्य वाग्यतो हृदयस्पृशस्त्रिश्चतुर्वाप आचामेत्' इति। खादिरगृह्येऽपि—'त्रिराचम्यापो द्विः परिमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्ष्येन्द्रियाण्यद्भिः संस्पर्शयेदन्ततः प्रत्युपस्पृश्य शुचिर्भवति' इति। 'ब्राह्मेण तीर्थेनोपस्पृशेत्' इत्युक्तम्; तत्र ब्राह्मादितीर्थलक्षणमाह याज्ञवल्क्यः—'कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य तु। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्' इति। एतदेव शङ्खलिखिताभ्यां स्पष्टीकृतम्। 'अङ्गुष्ठमूलस्योत्तरतः प्राग्ग्राग्यां ब्राह्मं तीर्थं प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यं कनिष्ठातलयोरन्तरा प्राजापत्यं पूर्वेणाङ्गुलिपर्वणि दैवम्' इति। आचमनार्थमुदकं विशिनष्टि पराशरः—'अद्भिः समुद्भूताभिस्तु हीनाभिः फेनबुद्बुदैः। वह्निना च न तप्ताभिरक्षाराभिरुपस्पृशेत्' इति। याज्ञवल्क्योऽपि—'अद्भिस्तु प्रकृतिस्थाभिः हीनाभिः फेनबुद्बुदैः।

हृत्कण्ठतालुकाभिश्च यथासंख्यं द्विजातयः॥ शुद्धेरन्ती च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः' इति। प्रचेता अपि— 'अनुष्णाभिरफेनाभिः पूताभिर्वस्त्रचक्षुषा। हृद्गताभिरक्ताभिस्त्रिश्चतुर्वाद्विराचमेत्' इति। तत्रापवादमाह यमः— 'रात्रावबीक्षितेनापि शुद्धिरुक्ता मनीषिणाम्। ...तथोष्णेनोष्णपायिनाम्' इति। उदकस्य ग्रहणप्रकारं परिमाणं चाह भरद्वाजः—'आयतं पर्वतः कृत्वा गोकर्णाकृतिवत्करम्। संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥ मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत्। माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः' इति। 'सव्यपाणिर्दक्षिणो द्रष्टव्यः त्रिः पिबेद्दक्षिणेनाम्भु' इति पुराणवचनात्। उदकपानानन्तरभाविनीमितिकर्तव्यतामाह दक्षः— 'संहृत्याङ्गुलिमूलेन द्विः प्रमृज्य ततो मुखम्। संहताभिश्चतसृभिः पूर्वमास्यमुपस्पृशेत्' अङ्गुष्ठेन प्रदेशिन्या घ्राणं स्पृष्ट्वा त्वनन्तरम्। अङ्गुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रे ततः परम्॥ कनिष्ठाङ्गुष्ठयोर्नाभि हृदयं तु तलेन वै। सर्वाभिश्च शिरः पश्चाद्बाहू चाप्रेण संस्पृशेत्' इति।

आपस्तम्बोऽपि– 'त्रिरोष्ठौ परिमृजेद्द्विरित्येके सकृदुपस्पृशेदित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेच्चक्षुषी नासिके श्रोत्रे चाथाप उपस्पृशेत्' इति। गौतमोऽपि— 'द्विः परिमृज्य पादौ चाभ्युक्षेत्खानि चोपस्पृशेच्छीर्षण्यानि मूर्धानि च दद्यात्' इति। आचमननिमित्तान्याह मनुः—'कृत्वा मूत्रं पुरीषं च खान्याचान्त उपस्पृशेत्। वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा' इति। आपस्तम्बोऽपि— 'मूत्रं कृत्वा पुरीषं वा मूत्रपुरीषलेपानन्नलेपानुच्छिष्टलेपान्रेतसश्च ये लेपास्तान्प्रक्षाल्य पाणी पादौ चाचम्य प्रयतो भवति' इति। स एवान्यत्र— 'स्वप्ने क्षवथौ शृङ्खाणिकाश्चालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं च गत्वामेध्यं चोपस्पृश्याप्रयतं च मनुष्यं नीवीं च परिधायाप उपस्पृशेत्' 'आर्द्रे वा शकृदोषधीर्भूमिं वा' इति। सुत्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः। रथ्यां श्मशानं चाक्रम्य आचामेत्प्रयतोऽपि सन्। बृहस्पतिस्तु 'अधो वायौ समुत्क्रान्ते आक्रन्दे क्रोधसंभवे। मार्जा-

रमूषिकस्पर्शे प्रहासेऽनृतभाषणे ॥ निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपस्पृशेत्' इति । यमोऽपि— 'उत्तीर्योदकमाचामेदवतीर्य तथैव च । एवं स्यात्तेजसा युक्तो वरुणोऽपि तु पूजितः' इति । आचमनासंभवे मार्कण्डेयः— 'सम्यगाचम्य तोयेन क्रियाः कुर्वीत वै शुचिः । देवतानामृषीणां च पितॄणां चैव यत्नतः ॥ कुर्वीतालम्भने चापि दक्षिणश्रवणस्य वा । यथा विभवतो ह्येतत्पूर्वाभावे ततः परम् ॥ न विद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यते' इति । बोधायनोऽपि— 'नीवीं विसृज्य परिधाय उपस्पृशेदार्द्रतृणं भूमिं गोमयं वा संस्पृशेत्' इति । पुनराचमननिमित्तमाह याज्ञवल्क्यः— 'स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेद्वासो विपरिधाय च' इति । कूर्मपुराणेऽपि 'प्रक्षाल्य पाणी पादौ च भुञ्जानो द्विरुपस्पृशेत् । शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥ ओष्ठावलोमकौ स्पृष्ट्वा वासो विपरिधाय च । रेतोमूत्रपुरीषाणामुत्सर्गेऽशुद्धभाषणे ॥ ष्ठीवित्वाध्ययनारम्भे कामश्वासागमे तथा । चत्वरं वा श्म-

शानं वा समागम्य द्विजोत्तमः। सन्ध्ययोरुभयोस्तद्व-दाचान्तोऽभ्याचमेत्ततः' इति। अशुद्धभाषणे निष्ठुर-भाषणे आचमनापवादमाह बोधायनः— 'दन्तवदन्तल-ग्नेषु धारणम्' इति। दन्तलग्नदन्तसक्थयोः निर्हार्यानि-र्हार्यरूपेण भेदः, अत एव देवलः— 'भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत्। दन्तलग्नमसंहार्यं लेपमन्ये तदन्त-वत्॥ न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः' इति। अथाचमनफलमाह व्याघ्रपादः— 'य एवं ब्राह्मणो नि-त्यमुपस्पर्शनमाचरेत्। ब्रह्मादिस्तम्बपर्यन्तं जगत्संपरितर्प-येत्' इति। अथ दन्तधावनम्। तत्रात्रिः— 'मुखे पर्युषिते नित्यं भवन्त्यप्रयता नराः। तदार्द्रकाष्ठं शुष्कं वा भक्ष-येद्दन्तधावने' इति। तत्र वृक्षविशेषमाह अङ्गिराः— 'आम्रपुन्नागबिल्वानामपामार्गशिरीषयोः। भक्षयेत्प्रात-रुत्थाय वाग्यतो दन्तधावनम्' इति। स्मृत्यर्थसारे तु— अङ्गुल्या धावयेद्दन्तान्वर्जयेत्तु प्रदेशिनीम्। मध्यमाना-मिकाङ्गुष्ठैर्दन्तदार्ढ्यं भवत्यपि'। वर्ज्यानाह उशनाः— अङ्गुलीभिर्दन्तान्प्रक्षालयेदिति रिक्तविषयम्। दक्षिणाभि-

मुखो भूत्वा नाद्यात्तिलकदम्बकम् ॥ तिन्दुकेङ्गुदिबन्धूका-मोचामरजबिल्वकम् । कर्पासं दन्तकाष्ठं च विष्णोरपि हरेरिच्छ्रियम् ॥ न भक्षयेत पालाशं कार्पासं शाङ्कमेव च । एतानि भक्षयेद्यस्तु क्षीणपुण्यः स जायते' इति । वर्ज्य-तिथीनाह विष्णुः—'प्रतिपद्दर्शषष्ठीषु चतुर्दशयष्टमीषु च । नवम्यां भानुवारे च दन्तकाष्ठं विवर्जयेत्' इति । यमोऽपि—'श्राद्धे जन्मदिने चैव विवाहे जीर्णदोषतः । व्रते चैवोपवासे च वर्जयेद्दन्तधावनम्' इति । स्मृत्यन्तरे—'तृणपर्णैः सदा कुर्यादम एकादशीं विना । तयोरपि च कुर्वीत जम्बूपल्लक्षरसालकैः' इति । अलाभे दन्तकाष्ठानां निषिद्धायां तिथौ तथा । अपां द्वादशगण्डूषैर्विदध्युर्दन्तधावनम्' इति । 'मुक्त्वा चानामिकाङ्गुष्ठौ वर्जयेद्दन्तधावनम्' इति च । अथ स्नानम्, तत्र कूर्मपुराणे—'प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा यथाविधि । आचम्य प्रयतो नित्यं प्रातः स्नानं समाचरेत्' इति । दक्षोऽपि—'अस्नात्वा नाचरेत्कर्म जपहोमादि किंचन । लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् ॥ अत्यन्तमलिनः कायो

नवच्छिद्रसमन्वितः। स्रवत्येव दिवारात्रं प्रातःस्नानं विशोधनम्॥ प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्। सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम्' इति। व्यासः— 'ऋषीणामृषिता नित्यं प्रातःस्नानान्न संशयः। अलक्ष्मीः कालकण्ठी च दुःस्वप्नदुर्विचिन्तनम्॥ प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः। अज्ञानाद्यदि वा मोहाद्रात्रौ दुश्चरितं कृतम्। प्रातःस्नानेन तत्सर्वं शोधयन्ति द्विजातयः' इति। स्नानप्रकारश्च चतुर्विंशतिधा दर्शितः। स्नानमब्दैवतैर्मन्त्रैर्वारुणैश्च मृदा सह। कुर्याद्व्याहृतिभिर्वाथ यत्किंचेदमृचापि वा॥ दन्तान्प्रक्षाल्य नद्यादौ गृहे चेदममन्त्रवत्। अमन्त्रवदिति मन्त्रसंश्लेषोऽभिहितः। प्रातः संक्षेपतः स्नानं होमलोपाविगर्हितः। कालनियममाह जाबालिः— 'सततं प्रातरुत्थाय दन्तधावनपूर्वकम्। आचरेदुषसि स्नानं तर्पयेद्देवमानुषम्' इति। तत्र स्नाने अघमर्षणमाह शौनकः— 'स्नात्वाचान्तो वारिमध्ये त्रिः पठेदघमर्षणम्' इति। स्नानानन्तरं वस्त्रनिष्पीडनं कर्तव्यम्। तत्राह भार-

द्वाजः— 'वस्त्रोदकमपेक्षन्ते ये मृता स्नानकर्मणि । तस्मात्सर्वं प्रयत्नेन जलं भूमौ निपातयेत्' । निष्पीडन-मन्त्रः— 'ये के चास्मत्कुले जाताः अपुत्रा गोत्रिणो मृताः । ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्' इति । अत्र उक्तस्नानं द्विविधम्; तथा च स्मृत्य-न्तरे— 'स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभे-दतः । तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् ॥ नित्यं नैमित्तिकं वाक्यं क्रियाङ्गं मलकर्षणम् । क्रिया-स्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम्' इति । एतेषां लक्षणमाह शङ्खः— 'अस्नातस्तु पुमान्नार्हो जप्याग्नि-हवनादिषु । प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्ति-तम् । चण्डालशवधूमादि स्पृष्ट्वा स्नातां रजस्वलाम् । स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तकं हि तत् ॥ पुष्पस्नानादिकं यत्तु दैवज्ञविधिचोदितम् । तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् ॥ मलापकर्षणं स्नानम-भ्यङ्गादिप्रपूर्वकम् । मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्य-था ॥ जपुकामः पवित्राणि ह्यर्चिष्मान्देवताः पितॄन् ।

स्नानं समाचरेद्यस्तु क्रियाङ्गं तत्प्रकीर्तितम् ॥ सरःसु देवखातेषु तीर्थेषु च नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया'; स्नानमेव क्रिया कार्यतया विहिता इत्यर्थः। अथ प्रसङ्गान्माध्याह्निकस्नानम्। तत्र बोधायनस्त्वाह— 'ततो मध्याह्नसमये पुनः स्नानं समाचरेत्। सूर्यस्य चाप्युपस्थानं जपहोमादिकं ततः'। तत्र विशेषमाह विष्णुः—'प्रातः स्नातोऽपि विधिवत्स्नानं मध्यंदिने चरेत्। शक्तश्चेदन्यथा रोगी शाट्या संमार्जनं चरेत्' इति। तत्राश्रमभेदेन व्यवस्थामह दक्षः— 'प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः। यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिणाम्' इति। स्मृत्यर्थसारे तु—'सर्वे वापि सकृत्कुर्युरशक्तौ चोदकं विना' इति। एतच्च मध्याह्नस्नानं सावकाशतया समन्त्रकं कर्तव्यम्। तत्र मन्त्रस्नानावश्यकतामाह व्यासः— 'मन्त्रपूतजलैः स्नानमाहुः स्नानफलप्रदम्। न वृथा वारिमध्यानां यादसामिव तत्फलम्' इति। विष्णुस्तु— 'ब्रह्मक्षत्रविशां चैव मन्त्रवत्स्नानमिष्यते। तूष्णीमेव तु शूद्रस्य

स्त्रीणां च कुरुनन्दन' इति। बोधायनोऽपि— 'अपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम्' 'मन्त्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते' इति। स्नानार्हजलमाह मनुः— 'नदीषु देवखातेषु तटाकेषु सरित्सु च। स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च' इति। वर्ज्यान्याह स एव— 'परकीयनिपानेषु स्नायाद्वै न कदाचन। पञ्चपिण्डान्समुद्धृत्य स्नायाद्वा संभवे पुनः' इति। समुद्रस्नानं प्रशस्तमित्युक्तं भारते— 'आजन्मशतसाहस्रं यत्पापं कुरुते क्वचित्। मुच्यते सर्वपापेभ्यः स्नात्वैव लवणाम्भसि' इति। अथ नैमित्तिकस्नानमाह मनुः— 'दिवाकीर्त्यमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति'। दिवाकीर्त्यः चण्डालः। गौतमोऽपि— 'पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचेल उदकोपस्पर्शनाच्छुध्येत्। शुनश्चेति पतितादिस्पृष्टिनं समारभ्य तृतीयस्य सचेलं स्नानं न चतुर्थस्य उदकोपस्पर्शनमेव। तथाह मरीचिः— 'उपस्पृशेच्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं भवेत्' इति। संग्रहकारस्त्वाह— 'अबुद्धिपूर्वसं-

स्पर्शे द्वयोः स्नानं विधीयते । त्रयाणां बुद्धिपूर्वं तु तत्स्पृष्टिन्यायकल्पना इति ॥ जलविशेषमाह नैमित्तिकस्नाने गर्गः— 'कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च । नित्यं यादृच्छिकं चैव यथारुचि समाचरेत्' इति । काम्यस्नानमाह पुलस्त्यः— 'पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ । अमायां च नदीस्नानं पुनात्यासप्तमं कुलम्' इति । अथ क्रियाङ्गस्नानं कूर्मपुराणे— 'धर्मक्रियां कर्तुमनाः पूर्वं स्नानं समाचरेत् । क्रियाङ्गं तत्समुद्दिष्टं स्नानं वेदपरैर्द्विजैः' इति । मलापकर्षणस्नानमभ्यङ्गस्नानम्, तच्च भास्करादिवारेषु क्रमेण गुणदोषा उक्ताः, ज्योतिषिके— 'संतापः कान्तिरल्पायुर्धनं निर्धनता तथा । अनारोग्यं सर्वकामः अभ्यङ्गाद्भास्करादिषु' । तिथिविशेषे मनुरपि— 'पक्षे च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ । तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां विहीयते' इति । गर्गोऽपि— 'पञ्चदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे । द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत्' । निषिद्धकालेऽपि तैलविशेषमनुजानाति प्रचेताः— 'सार्षपं गन्धतैलं

च यत्तैलं पुष्पवासितम्। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन' इति। उक्तसर्वविधस्नानमपि उष्णोदकेन न कर्तव्यम्। तथा च शङ्खः— 'स्नातस्य वह्नितप्तेन तथैव परवारिणा। शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवेत्' इति। याज्ञवल्क्योऽपि— 'वृथा तूष्णोदकस्नानं वृथा जप्यमवैदिकम्। वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकम्'। अशक्तानामुष्णोदकस्नानमनुजानाति यमः—'आदित्यस्य करैः पूतं पुनः पूतं च वह्निना। आम्नातमातुरस्नाने प्रशस्तं तु श्रृतोदकम्' इति। स्मृत्यर्थसारेऽपि— 'वाप्यां कूपे तटाके च पारक्ये चोष्णवारिणि। प्रातः स्नानं नरः कुर्यादुष्णेनैव सदातुरः' इति। 'अशक्तौ शोभनगृहे शोभनाहे च सर्वथा। न शीतलजलस्नानं कार्यं चैवोष्णसेचनम्' इति च। नद्याद्यभावे अनातुरस्यापि स एवाह— 'नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम्। तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः' इति। तत्र विशेषमाह व्यासः— 'शीतास्वप्सु निषिच्योष्णा मन्त्रसंभारसंभृताः। गेहेषु शस्यते स्नानं तद्धीनमफलं बहिः'

इति। एतच्च स्नानं रात्रौ नद्यादिषु न कर्तव्यम्। तथा च स्मृत्यर्थसारे— 'क्रियास्नानं च काम्यं च पारक्यो-ष्णेषु वर्जयेत्। नद्यां नास्तमिते स्नायाद्विशेषान्मध्यया-मयोः॥ अग्निं प्रज्वाल्य वा स्नायाद्वाप्यादिषु महा-जले। राहुदर्शनसंक्रान्तिविवाहोत्क्रान्तिवृद्धिषु॥ स्नान-दानादिकं कार्यं निशि काम्यव्रतेषु च। अस्पृश्यस्पर्शनं स्नानं निश्युष्णेन जलेन च' इति। उक्तस्नानस्यापवा-दमाह स एव— 'न स्नायादुत्सवेऽतीते माङ्गल्यं विनि-वर्त्य च। अनुव्रज्य सुहृद्बन्धूनर्चयित्वेष्टदेवताः' इति। केषांचिदशिरस्कं स्नानमाह स एव— 'यत्र पुंसः सचेलं स्यात्स्नानं तत्र सुवासिनी। कुर्वीतैवाशिरः स्नानं शिरो-रोगी जटी तथा' इति। गौणस्नानान्याह व्यासः— 'अशक्तावशिरस्कं वा स्नानमात्रं विधीयते। आर्द्रेण वाससा वाङ्गमार्जनं कापिलं स्मृतम्॥ अप्रायत्ये समुत्पन्ने स्नानमेव समाचरेत्। ब्राह्मादीन्यथ वाशक्तौ स्ना-नान्याहुर्मनीषिणः॥ ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दि-व्यमेव च। वारुणं यौगिकं चैव षोढा स्नानं प्र-

कीर्तितम् ॥ ब्राह्मं तु मार्जनं मन्त्रैः कुशैः सोदक-बिन्दुभिः । आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥ यत्तु सातपवर्षेण तत्स्नानं दिव्यमुच्यते । वारुणं चावगाहं च मानसं चात्मवेदनम् ॥ यौगिकं स्नानमाख्यातं योगो यद्विष्णुचिन्तनम् । आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः' इति । गौतमस्तु— 'भस्मोद्धूलनमित्युक्तं प्रथमं मन्त्रसंयुतम् । वारुणं मानसं मन्त्रं भौमं स्नानं तु पञ्चमम् ॥ षष्ठं दिव्यं च वायव्यमष्टमं च कुशोदकम् । गोमूत्रं नवमं ज्ञेयं विप्रपादोदकं दश' इति । तत्रैव 'गुणा दशस्नानपरस्य पुंसो रूपं च तेजश्च बलं च शौर्यम् । आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च तपश्च मेधाः ॥ स्नाने मनःप्रसादः स्यादेवा अभिमुखाः सुधीः । सौभाग्यं श्रीः सुखं पुष्टिः पुण्यं विद्या यशो धृतिः ॥ महापापान्यलक्ष्मीश्च दुरितं दुर्विचिन्तनम् । शोकदुःस्वादिहरणं प्रातःस्नानं विशेषतः' इति । ततो वस्त्रधारणम्; तथा च मत्स्यपुराणे— 'एवं स्नात्वा ततः

कुर्यादाचम्य च विधानतः। उत्थाय वाससी शुक्ले शुद्धेति परिधाय च' इति। कुर्यादित्यत्र कर्मेति शेषः। वस्त्रविषये गौतमः— 'सति विभवे न जीर्णमलवद्वासाः स्यात्' 'न रक्तमुल्बणमन्यधृतं वा वासो बिभृयात्' इति। आपस्तम्बोऽपि— 'सर्वान्रागान्वाससि वर्जयेत्कृष्णं च स्वाभाविकमनूद्वासि वासो वसीत प्रतिकृष्टं च शक्तिविषये' इति। अनूद्वासि अबहुमूल्यमित्यर्थः। प्रतिकृष्टं निकृष्टं जीर्णं मलवत् स्थूलं च तद्विपरीतम्, अप्रतिकृष्टं तादृशं च वासो वसीत शक्तौ सत्यामित्यर्थः। योगयाज्ञवल्क्योऽपि— 'स्नात्वैवं वाससी धौते त्वच्छिद्रे परिधाय च' इति। तत्र विशेषमाह व्यासः— 'नोत्तरीयमधः कुर्यान्नोपर्याधस्यमम्बरम्। नान्तर्वासो विना जातु न वसेद्वसनं बुधः' इति। मार्कण्डेयपुराणे तु— 'अवमृज्याङ्गं च स्नातो गात्राण्यम्बरपाणिभिः। न च निर्धुनियात्केशान्वासश्चैव न निर्धुनुयात्' इति। वस्त्रलक्षणमाह— 'ईषद्धौतं नवं श्वेतं सदसंपन्नधारितम्।

अहतं तद्विजानीयात्सर्वकर्मसु पावनम्' इति । भृगुस्तु वर्णभेदेन वस्त्रविशेषमाह— 'ब्राह्मणस्य सितं वस्त्रं नृपे रक्तमनुल्बणम् । पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते ॥ क्षौमं वासः प्रशंसन्ति तर्पणे सदृशं तथा । काषायं धातुरक्तं वा नोल्बणं तत्त्व कर्हिचित्' इति । बोधायनस्तु— 'कर्तव्यमुत्तरं वासः पञ्चस्वेतेषु कर्मसु । स्वाध्यायोत्सर्गदानेषु भुक्त्वाचमनयोस्तथा' इति । एतच्च सर्वकर्मोपलक्षणार्थम्, अनुत्तरीयस्य कर्ममात्रनिषेधात् । तथा च विष्णुपुराणे— 'होमदेवार्चनाद्यासु क्रियासु पठने तथा । नैकवस्त्रः प्रवर्तेत द्विज आचमने जपे' इति । नग्नस्यानधिकारमाह भृगुः— 'विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च । श्रौतं स्मार्तं तथा कर्म न नग्नश्चिन्तयेदपि' इति । नग्नलक्षणमाह व्यास एव— 'नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटः स्मृतः । नग्नस्तु दग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा' इति । अलाभे गौणवस्त्रमाह भृगुः— 'अलाभे धौतवस्त्रस्य शाणाक्षौमाविकानि च । कुतपं योगपट्टं च विवासास्तु न वै भवेत्' इति । 'कुतपं

योगमर्कं च धारयेत्' इति शेषः ॥ ततः

पूर्वां संध्यामुपासीनो जजाप यतमानसः ।

अनेन काले प्राप्ते रामेण संध्योपासनात्सर्वैरपि काले प्राप्ते संध्योपासनं कर्तव्यमिति सूचितम् । संध्यायाः कालं स्वरूपमनुष्ठानप्रकारं च प्रश्नप्रतिवचनाभ्यां ताण्डिनः समामनन्ति— 'ब्रह्मवादिनो वदन्ति कस्माद्ब्राह्मणः सायमासीनः संध्यामुपास्ते कस्मात्प्रातस्तिष्ठन्, का च संध्या कश्च संध्यायाः कालः किं च संध्यायाः संध्यात्वं देवाश्च वासुराश्चास्पर्धन्त ते सुरा आदित्यमभिद्रवन् स आदित्योऽबिभेत्तस्य हृदयं कर्मरूपेणातितिष्ठत् । स प्रजापतिमुपाधावत् । तस्य प्रजापतिरेतद्वेषजमपश्यदृतं च सत्यं च ब्रह्म चोंकारं च त्रिपदां च गायत्रीं ब्राह्मणो मुखमपश्यत् । तस्माद्ब्राह्मणो रात्रस्य संयोगे संध्यामुपास्ते स ज्योतिष्याज्ज्योतिषो दर्शनात्सोऽस्य कालः, सा संध्या तत्संध्यायाः संध्यात्वं यत्सायमासीनः संध्यामुपास्ते तया वीरस्थानं जयति अथ यदपः प्रयुङ्क्ते ता विप्रुषो वज्रीभवन्ति ता कि-

प्रुषो वज्रीभूत्वासुरानषान्नन्ति ततो देवा अभवन्परासुरा भवति आत्मना परास्य भ्रातृव्यो भवति य एव वेद इति यत्सायमासीनः संध्यामुपास्ते तया वीरस्थानं वीरस्थानं च संततमविच्छिन्नं भवति य एवं वेद' इति । आश्वलायनोऽपि— 'नित्योदकः संध्यामुपासीत वाग्यतः सायमुत्तरमभिमुखः अन्वष्टयदेशमर्धास्तमिते मण्डलमा नक्षत्रदर्शनात् । एवं प्रातः प्राङ्मुखस्तिष्ठन्ना मण्डलदर्शनात्' इति । आपस्तम्बोऽपि— 'संध्योश्च बहिर्ग्रामादासनं वाग्यतश्च' इति । गौतमोऽपि— 'बहिः संध्यत्वं च तिष्ठेत्पूर्वमासीतोत्तराम्' इति । अत्र संध्योपासने संध्यायां देवताभिध्यानं तथा च तैत्तरीयश्रुतिः—'उद्यन्तमस्तं यन्तमादित्यमभिध्यायन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद' इति । अस्यार्थः— 'सव्याहृतिं सप्रणवामिति मन्वाद्युक्तप्रकारेण प्राणायामं कुर्वन्यथोक्तनामरूपविशिष्टं संध्याशब्दवाच्यमादित्यं ब्रह्मेति ध्यायन्नैहिकमामुष्मिकं च सकलं भद्रमश्नुते । य एवमु-

क्तध्यानेन शुद्धान्तःकरणो ब्रह्म साक्षात्करुते स पूर्वमपि ब्रह्मैव सन्नज्ञानाज्जीवत्वं प्राप्तः यथोक्तज्ञानेनाज्ञानापगमे सति ब्रह्मैवाप्नोति' इति। व्यासस्तु— 'न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह। सोऽहमस्मीत्युपासीत विधिना येन केनचित्' इति। तत्र संध्यास्वरूपमाह दक्षः— 'अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः। सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः' इति। तत्र भवा क्रिया वा संध्या, इयं च संध्या अहरहः कर्तव्या; तथा च श्रुतिः 'अहरहः संध्यामुपासीत' इति। योगयाज्ञवल्क्यस्तु—'संध्यो: संध्यामुपासीत नास्तमे नोदूते रवौ' इति। देवताभेदपूर्वकं संध्यात्रैविध्यमाह व्यासः— 'गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने। सरस्वती च सायाह्ने सैव संध्या त्रिधा मता' इति। एवं त्रिविधापि संध्या कर्तव्येत्याहात्रिः— 'संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा' इति। संध्यानुष्ठानप्रकारमाह योगयाज्ञवल्क्यः— 'प्राणानायम्य संप्रोक्ष्य त्रिचैनाब्दैवतेन तु' इति। बृहस्पतिरपि— 'बध्वासनं नियम्यास-

न्स्मृत्वाचार्यादिकं तथा । संनिमीलितदृङ्मौनी प्राणायामान् समभ्यसेत्' इति । प्राणायामलक्षणमाह मनुः— 'सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते' इति । प्राणायामसंख्या कूर्मपुराणे दर्शिता— 'प्राणायामत्रयं कृत्वा ध्यायेत्संध्यामिति श्रुतिः' इति । योगयाज्ञवल्क्यस्तु प्राणायामप्रकारमाह— 'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च । प्रत्योंकारसमायुक्तं तथा तत्सवितुः परम् ॥ ओमापो ज्योतिरित्येतच्छिरः पश्चात्प्रयोजयेत् । त्रिरावर्तनयोगात्तु प्राणायामस्तु शब्दितः' इति । ततो मार्जनमाह व्यासः — 'आपो हि ष्ठेत्यृचा कुर्यान्मार्जनं तु कुशोदकैः । प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे ॥ विप्रुषोऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय जित् । रजस्तमो मोहजाताञ्जाग्रत्स्वप्नसुषुप्तिजान् ॥ वाङ्मनःकायजान्दोषान्नवैतान्नवभिर्दहेत्' इति । प्रजापतिरपि— 'ऋगन्ते मार्जनं कुर्यात्पादान्ते वा समाहितः । अर्धर्चान्तेऽथ वा कुर्याच्छिष्टानामीदृशं समम्' इति । उक्तमार्जने तीर्थविशेषमाह व्यासः— 'मार्जना-

र्चनबलिकर्मभोजनानि देवतीर्थेन कुर्यात्' इति। मार्जनानन्तरं सूर्यश्चेत्याचमनं कर्तव्यम्। तथा च भारद्वाजः—'सायमग्निश्च मेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत्। आपः पुनन्तु मध्याह्ने ततश्चाचमनं चरेत्' इति। कात्यायनोऽपि 'शिरसो मार्जनं कुर्यात्कुशैः सोदकबिन्दुभिः। प्रणवो भूर्भुवः स्वर्वो गायत्री च तृतीयकम्॥ अब्दैवत्या ऋचश्चैव चतुर्थमिति मार्जनम्' इति। मार्जनानन्तरं कर्तव्यमाह प्रजापतिः—'जलपूर्णं तदा हस्तं नासिकाग्रे समर्पयेत्। ऋतं चेति पठित्वा तु तज्जलं तु क्षितौ क्षिपेत्' इति। एवं प्रोक्षणमन्त्राचमनादिना परिपूतेनार्घ्यप्रदानं कर्तव्यम्। अर्घ्यप्रदानप्रकारस्तैत्तिरीये— 'तानि ह वा एतानि रक्षाँसि गायत्र्याभिमन्त्रितेनाम्भसा शाम्यन्ति तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्रीभूत्वा तानि रक्षाँसि मन्देहारुणे द्वीपे प्रक्षिपन्ति' इति। व्यासोऽपि— 'कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम्। आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वमथ क्षिपे-

त्' इति। ततः प्रदक्षिणं कर्तव्यम्; तथा च तैत्तरीयश्रुतिः 'यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्ति' इति। प्रदक्षिणानन्तरमुदकस्पर्शनमप्युक्तं पुराणे— 'सायं मन्त्रवदाचम्य प्रोक्ष्य सूर्याय चाञ्जलिम्। दत्त्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुध्यति' इति। ततो देवताभिध्यानं कर्तव्यम्। तथा च तैत्तरीयश्रुतिः— 'उद्यन्तमस्तं यन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति' इति। अर्घ्यप्रदानानन्तरं कर्तव्यमाह बोधायनः— 'दर्भेष्वासीनो दर्भान्धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेत्' 'प्राणायामशो वा शतकृत्वः' 'उभयतः प्रणवां ससप्तव्याहृतिकां मनसा वा दशकृत्वस्त्रिभिश्च प्राणायामैः' इति। जपभेदोऽभिहितः पुराणे— 'वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः। त्रयाणां जपयज्ञानां श्रेयान्स्यादुत्तरोत्तरम्' इति। तेषां च लक्षणानि 'यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः। मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः॥ शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ

प्रचालयेत्। अपरैरश्रुतं किंचित्स उपांशुजपः स्मृतः। ध्येया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्। शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः' इति। त्रयाणां तारतम्यमपि— 'उत्तमं मानसं जप्यमुपांशुर्मध्यमं स्मृतम्। अधमं वाचिकं प्राहुः सर्वमन्त्रेषु वै द्विजाः॥ वाचिकस्यैकमेकं स्यादुपांशोः शतमुच्यते। सहस्रं मानसे प्रोक्तः स चात्रिभृगुनारदैः'। जपे नियममाह शौनकः— 'कृत्वोत्तानौ करौ प्रातः सायं चाधोमुखौ करौ। मध्यस्तब्धकराभ्यां तु जप एवमुदाहृतः। जपसंपदमाह मनुः— 'मनःसंतोषणं शौचं मौनं मन्त्रार्थचिन्तनम्। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥ पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्। पश्चिमां तु समासीनः सम्यग्ऋक्षविभावनात्' इति। मध्याह्ने जपनियममाह— 'तथा मध्याह्नसंध्यायामासीनः प्राङ्मुखो जपेत्' इति। जपसमये वर्ज्यानाह— 'न चङ्क्रमन्न च हसन्न पार्श्वमवलोकयेत्। नापश्रितो न जल्पंश्च नाप्रावृतशिरास्तथा॥ न पदा पादमाक्रम्य न चैव हि तथा करौ। न चासमा-

हितमना न च संश्रावयञ्जपेत्' इति। बोधायनोऽपि— 'नाभेरधः संस्पर्शनं कर्मयुक्तो वर्जयेत्' इति। व्यासोऽपि— 'जपकाले न भाषेत व्रतहोमादिकेषु च' इति। वाग्यमलोपे प्रायश्चित्तमाह योगयाज्ञवल्क्यः— 'यदि वाग्यमलोपः स्याज्जपादिषु कदाचन। व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम्'। संवर्तोऽपि— 'लोकवार्तादिकं श्रुत्वा दृष्ट्वा स्पृष्ट्वा च दूषितम्। संख्यां विना च यज्जप्यं तत्सर्वं निष्फलं भवेत्॥ क्रोधं मान्द्यं क्षुधां निद्रां निष्ठीवनं विजृम्भणम्। दर्शनं च श्वनीचानां वर्जयेज्जपकर्मणि॥ आचमेत्संभवे चैषां स्मरेद्विष्णुं सुरार्चितम्' इति। 'ज्योतींषि च प्रपश्येद्वा कुर्याच्च प्राणसंयमम्। ज्वलनं गाश्च विप्रांश्च यतिनोऽपि विशुद्धये' इति। देशनियममाह मनुः—'अपां समीपे नियतो नैत्यकं विधिमास्थितः। सावित्रीमप्यधीयीत गत्वारण्यं समाहितः॥ याज्ञवल्क्योऽपि— 'अग्न्यगारे जलान्ते वा जपेद्देवालयेऽपि वा। पुण्यतीर्थे गवां गोष्ठे द्विजक्षेत्रेऽथ वा गृहे' इति। शङ्खोऽपि— 'गृहे त्वेकगुणं

जप्यं नद्यादौ द्विगुणं स्मृतम्। गवां गोष्ठे शतगुणमन्यगारे शताधिकम्॥ सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च संनिधौ। सहस्रशतकोटीनामनन्तं विष्णुसंनिधौ'। कूर्मपुराणेऽपि— 'गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभं यतः। एकान्ते तु शुभे देशे तस्माज्जप्यं समाचरेत्'। जपसंख्यामाह मनुः— 'सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः। महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते' इति। आश्रमभेदेन संख्याभेदमाह योगयाज्ञवल्क्यः— 'ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्' इति। यतिः कुटीचकबहूदकावित्यर्थः। यमोऽपि— 'सहस्रपरमां देवीं शतमध्यां दशावराम्। गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशिनीम्' इति। बोधायनोऽपि— 'दर्भेष्वासीनो दर्भान्धारयमाणः सोदकेन पाणिना प्राङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वोपरिमितकृत्वो वा दशावरम्' इति। तत उपस्थानम्; तथा च बोधायनः— 'वारुणीभ्यां रात्रिमुपतिष्ठते इमं मे वरुण तत्त्वायामीति द्वाभ्याम्। एवं प्रातः

प्राणसंश्लिष्टन्मैत्रीभ्यामहरुपतिष्ठते– मित्रश्च चर्षणी धृतः मित्रो जनान्यातयतीति द्वाभ्याम् इति । तस्य फलमाह— 'यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत् । बाहुभ्यां मनसा वापि वाचा वा यत्कृतं भवेत् । सायंसंध्यामुपस्थाय तेन तस्मात्प्रमुच्यते' । रात्र्या चापि संधीयते न चैनं वरुणो गृह्णाति । एवमेव प्रातरुपस्थाय रात्रिकृतात्पापात्प्रमुच्यते । अह्ना चापि संधीयते मित्रश्चैनं गोपायति आदित्यश्चैनं स्वर्गं लोकमुन्नयति एवमेवाहरहोरात्रयोश्च संधिषूपतिष्ठमानो ब्रह्मपूतो ब्रह्मभूतो ब्राह्मणः शाश्वतमनुवर्तमानो ब्रह्मलोकमभिजयतीति विज्ञायते । एवमुपस्थानस्य फलप्रतिपादनादिदमेव प्रधानमिति केचित् । अत एव च भारते— ते तथैव महाराज दंशिता रणमूर्धणि । संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ' इति । इतरत्सर्वं परित्यज्य उपस्थानमेव कृतमिति प्रतिपादितम् । वस्तुतस्तु उपस्थानवत्संध्याशब्दवाच्यादित्योद्देश्यकार्घ्यप्रदानादित्याभिध्यानादित्यप्रतिपादकगायत्रीजपानां संध्योपासनरूपत्वेन फलत्वेन च अकरणे प्रत्यवायजनकत्वेन च प्राधान्यं वक्तुमु-

चितमिति चतुष्टयमपि प्रधानमेव । 'ते तथैवेत्यादि' भारतवचनं तु असंभवत्क्रियाणां तत्करणमन्त्रजप एव । संभवन्तीनां तु स्वरूपेणानुष्ठानमिति । आपत्कालीनानुकल्पाभिप्रायम् । अत एव क्रियाया असंभवे तन्मन्त्रजपउक्तो बोधायनधर्मे—'प्राणाग्निहोत्रमन्त्रांस्तु निरुद्धे भोजने जपेत् । त्रेताग्निहोत्राणां द्रव्यालाभे यथा जपे' इति । अत एव आपदि अर्घ्याद्यसंभवे अर्घ्योपस्थानादिकरणैः सर्वैरपि मन्त्रैरुपस्थानमेव कुर्यादित्याह व्यासः—'देशक्षोभे महापातौ मार्जनार्घ्याद्यसंभवे । संध्यागतं सहस्रांशुं मन्त्रैः कुर्यादुपस्थितम्' इति । तस्माच्चतुर्णामपि प्राधान्ये न कोऽपि विरोधः । ननु अर्घ्यप्रदानाभिध्यानगायत्रीजपोपस्थानात्मकं मार्जनादिसर्वाङ्गोपेतं संध्यावन्दनं रामेण कृतमित्युक्तम् । तन्न संभवति ।

अग्निष्टोमादिभिर्यज्ञैरिष्टवानात्मदक्षिणैः ॥

इति युद्धकाण्डस्थसीतावचनपर्यालोचनया रामस्य आहिताग्नित्वावगमेन संध्यावन्दनस्याग्निहोत्रस्य च एककालत्वेन तस्मिन्काले श्रौतस्याग्निहोत्रस्य कर्तव्यत्वेन

संध्यावन्दनस्य कर्तुमशक्यत्वात्। संध्याकालेऽग्निहोत्रञ्च कर्तव्यत्वे आश्वलायनः— 'अपराह्णे गार्हपत्यं प्रज्वाल्येत्युपक्रम्य अस्तमिते होम इत्येवं प्रातर्व्युष्टायामिति प्रातरुद्धरणमुक्त्वा एवं प्रातरुपोदयं व्युषित उदिते वा' इति। बोधायनोऽपि— 'पुरादित्यस्यास्तमयात् गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्याहवनीयमुद्धरति तथा पुरादित्यस्योदयाद्गार्हपत्यम्' इति। कात्यायनोऽपि— 'गार्हपत्यादाहवनीयस्य उद्धरणमनस्तमितानुदितयोः' इति। भारद्वाजोऽपि— 'अस्तमित आदित्ये नक्षत्रं दृष्ट्वा प्रदोषे वा सायमग्निहोत्रं जुहोति व्युष्टायामुषसि वा प्रातरग्निहोत्रमुपोदयमुदिते समयाविषिते वार्वाक् प्रवदेत्तर्हि होतव्यमित्येकेषाम्' इति। आपस्तम्बोऽपि— 'अधिवृक्षसूर्य अविः सूर्ये वेत्युपक्रम्य नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायम् उपस्युपोदयं समयाविषित उदिते वा प्रातः' इति। तस्मात्सर्वो होतव्यमिति च। अनुदितादीनां लक्षणमाह व्यासः— 'रात्रेस्तु षोडशे भागे ग्रह-

नक्षत्रभूषिते। काले त्वनुदितं प्राहुर्होमं कुर्याद्विचक्षणः॥ ततः प्रभातसमये नष्टनक्षत्रमण्डले। रविर्यावन्न दृश्येत समया विषितस्तु सः॥ रेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः। उदितं तद्विजानीयात्तत्र होमं प्रकल्पयेत्' इति। एवमादिवचनैः संध्याकालस्यैवाग्निहोत्रकालत्वावगमात् संध्यावन्दनकाल एव प्रणयनेनाग्निहोत्रस्य प्रक्रमे सति श्रौतेनाग्निहोत्रेण बाधात्संध्यावन्दनं कर्तुमशक्यमेवेति चेत्, न। 'प्रदोषान्तो होमकालः सङ्गवान्तः प्रातर्नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायं यर्हि वाक्प्रवदेत् वै तर्हि होतव्यम्' इत्यादिवचनैः अग्निहोत्रस्य कालान्तरावगमेन सावकाशत्वात् संध्यावन्दनस्य च सकलस्मृतिपर्यालोचनया कालान्तरभावेन निरवकाशत्वात् 'सावकाशनिरवकाशयोर्निरवकाशं बलीयः' इति न्यायेन स्वकाल एव संध्यावन्दनं कर्तव्यम्। अग्निहोत्रहोमस्तु पुरस्तात्परस्ताद्वा कर्तुं शक्य एव। नन्वेवमपि 'अपराह्णे गार्हपत्यं प्रज्वलयेत्' इति सूत्रपर्यालोचनया संध्यावन्दनात्पूर्वं प्रणयनस्य कर्तव्यत्वावगमेन 'यस्याग्निमनुद्धृतं सूर्यो-

ऽभिनिम्लोचति' इत्यादितैत्तरीयश्रुत्या 'तदाहुर्यस्याग्निहोत्रमनुद्धृत्यमादित्योऽभ्युदियाद्वाभ्यस्तमियाद्वा' इत्यादि ऐतरेयब्राह्मणेन 'अथैकेषां यस्याग्निमनुद्धृतं सूर्योऽभिनिम्लोचेदभ्युदियाद्वा' इत्यापस्तम्बसूत्रेण 'यद्याहवनीयमप्रणीतमभ्यस्तमित्याद्याश्वलायनसूत्रेण च उदयास्तमयाभ्यां पूर्वमनुद्धरणे प्रायश्चित्तात्राभिधानेन च, उदयात्प्रागेव प्रणयने अनुष्ठिते अत ऊर्ध्वमाहिताग्निव्रतचर्याहोमादनुदितहोमी चौदयादिसूत्रेण 'नो एवाभ्युदियान्नास्तमियाद्वा' इति सूत्रोक्तव्रितव्रतविधानेन आ होमाद्विहारं विहाय बहिर्गन्तुमशक्यत्वात्, ग्रामाद्बहिः कर्तव्या संध्या कथमनुष्ठातुं शक्येतेति चेत्, न। संध्यावन्दनाकरणे बहुशः प्रत्यवायश्रवणात् सर्वकर्मसु अधिकारसंपादकत्वादकृतसंध्यावन्दनस्य श्रौतस्मार्तकर्मानधिकाराच्च संध्यावन्दनं कर्तव्यमेव। तत्र बोधायनः— 'अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम्। संध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः'। स्मृत्यन्तरेऽपि 'एकाहं जपहीनस्तु संध्याहीनो दिनत्रयम्।

द्वादशाहमनग्निस्तु शूद्र एव न संशयः' 'सायं प्रातः सदा संध्यां ये विप्रा न उपासते। कामं तान्धार्मिको राजा शूद्रकर्मसु योजयेत्' इति। मनुरपि— 'नानुतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्। स शूद्रवद्बहिः कार्यः सर्वस्माद्विजकर्मणः' इति। विष्णुरपि— 'उपतिष्ठन्ति ये संध्यां ये न पूर्वां न पश्चिमाम्। व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप' इति। कूर्मपुराणेऽपि— 'योऽन्यत्र कुरुते यत्नं धर्मकार्ये द्विजोत्तमः। विहाय संध्याप्रणतिं स याति नरकायुतम्' इति। याज्ञवल्क्योऽपि— 'अनार्त्त उत्सृजेद्यस्तु स विप्रः शूद्रसंमतः। प्रायश्चित्ती भवेच्चैव लोके भवति निन्दितः' इति। अत्रिरपि— 'नोपतिष्ठन्ति ये संध्यां स्वस्थावस्थासु ते द्विजाः। हिंसन्ति वै सदा पापा भगवन्तं दिवाकरम्' इति। 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदिवाप्युरुते कर्म न तस्य फलभाग्भवेत्' इति। तथा च प्रत्यवायपरिहारार्थं कर्माधिकारसंपादनार्थं च स्मार्तेनापि संध्यावन्दनमवश्यं कार्यमेव, विदुषां तु व-

हिरवस्थानं कामं बाध्यताम् । एतदभिप्रायेणैव आपस्तम्बाचार्यैरुक्तम्— 'विप्रतिषेधे श्रुतिलक्षणं बलीयः' इति । ननु विरुद्धांशमपहायावशिष्टं संध्यावन्दनं कर्तव्यमित्युक्तं तन्न संभवति । उदाहृतवचनबलाच्छ्रुतिविरुद्धस्मार्तस्य स्वरूपतः परित्यागावगमादिति चेन्न, एवं वदता वक्तव्यं श्रौतं कर्म कुर्वता स्मार्तकर्ममात्रं न कर्तव्यम्, उत संध्यावन्दनमेव न कर्तव्यम्, आहोस्वित्संध्यावन्दनकरणे उक्तवचनयोर्विषयः क इति वा। न तावच्छ्रौतकर्म कुर्वता स्मार्तं कर्म न कर्तव्यमिति वक्तुं शक्यम्, तथा निषेधवचनाभावात्, प्रत्युत स्मार्तकर्मकरणस्याभ्यनुज्ञादर्शनात्। तथा चाथर्वणी श्रुतिः—'यस्याग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितमहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्तस्य लोकान्हिनस्ति' इति । बोधायनोऽपि—'ब्राह्मणं प्रतिपद्याभीयात्' इति। नापि संध्यावन्दनं न कर्तव्यमिति तद्वचनस्यार्थः, तद्वचने आहत्य संध्यावन्दननिषेधाभावात्, प्रत्युत 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' इत्यादिवचनैः अवश्यक-

र्तव्यत्वावगमात् तदकरणे प्रत्यवायश्रवणात्। तथा च स्मृत्यन्तरेऽपि 'एकाहं जपहीनस्तु संध्याहीनो दिनत्रयम्। द्वादशाहमनग्निस्तु शूद्र एव न संशयः' इति उक्तवचनयोर्विषयः क इति चेत्, यदंशे विरोधस्तदंशनिषेधविषयत्वेनाप्युपपत्तौ स्वरूपनिषेधस्य विषयत्वे मानाभावात्। न चैवम् 'न हि कर्मणि कर्मान्तरारम्भः' इति न्यायात्, श्रौताग्निहोत्रस्यान्तराले स्मार्तं संध्यावन्दनं न कर्तव्यमेवेति वाच्यम्, 'न हि कर्मणि—' इति न्यायस्य सावकाशकाम्यकर्मविषयत्वाच्छ्रौतकर्मणि स्मार्तस्याभ्यनुज्ञानाच्च। तथा च बोधायनः— 'प्राकृते तत्र प्राकृतं न्यायमनधिगच्छन् ग्रामन्यायं प्रतीयादयमिहार्हतां समारम्भः' इति वदञ्श्रौतकर्मणि नैमित्तिकं स्नानाचमनादि स्मार्तकर्म कर्तव्यमित्यनुज्ञातवान्। लौगाक्षिरपि— 'पक्षान्तं कर्म निर्वृत्य वैश्वदेवं तु साग्निकः। पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः' इति। बोधायनोऽपि— 'वेदं करोति। प्रागुत्तरात्परिग्रहादथापराह्णे पिण्डपितृयज्ञेन चरति' इति। एवं श्रौतकर्मणि प्रवृत्ते श्रौ-

तान्तरस्याप्यभ्यनुज्ञा । तथा च बोधायनः— 'अथ सायं हुतेऽग्निहोत्रे उत्तरेण गार्हपत्यं तृणानि संस्तीर्य' इति, 'अथ प्रातर्हुतेऽग्निहोत्रे हस्तौ संमृशेत' इति च । आपस्तम्बोऽपि— 'प्रणीते चेदग्निहोत्रे काल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्र विप्रक्रान्ते तन्त्रे' इति । तस्माद्विरुद्धबहिरवस्थानांशमपहाय अवशिष्टं संध्यावन्दनरूपमग्निहोत्रहोमे प्रक्रान्तेऽपि कर्तुं शक्यमिति यदुक्तं तदुक्तमेव । तत्रायं क्रमः— ब्राह्मे मुहूर्ते उत्थायेष्टदेवतां ध्यात्वा कृतशौचः नद्यादौ स्नातः, अर्घ्यं प्रदायादित्यमभिध्याय तत्रैव दशावरं कृतगायत्रीजपः गृहमभ्येत्य विहृत्याग्नीन्व्रतचारी यजमानायतन उपविश्य गायत्रीजपं ध्यानं वा कृत्वा उदित आदित्ये उपस्थायाग्निहोत्रं जुहुयादित्युदितहोमिनः । अनुदितहोमिनस्तु स्नानार्घ्यप्रदानाभिसंधानगायत्रीजपप्रणयनाग्निहोत्रहोमव्रताचरणगायत्रीजपोपस्थानानीति क्रमः । तत्र प्रमाणानि स्नानस्य सर्वकर्माधिकारसंपादकत्वात्संध्यायाः पूर्वमुषःकाले कर्तव्यत्वमाह जाबालिः— 'सततं प्रातरुत्थाय दन्तधावनपूर्वकम् । आचरेदु-

पासि स्नानं तर्पयेद्देवमानुषान्' इति। स्नानानन्तरं प्रातः संध्योपासनकालमाह दक्षः— 'रात्र्यन्तयामनाडी द्वे संध्यादिः काल उच्यते। दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः' इति। स्नानदेशे अर्घ्यप्रदानानन्तरं यथाशक्ति जपकरणमाह गौतमः— 'यस्मिन्देशे कृतं स्नानं तत्र संध्यां समाचरेत्। यत्र देशे कृता संध्या तत्रैव जपमाचरेत्। संध्याप्रदेशे तत्रैव यथाशक्ति जपेद्द्विजः' इति। तदनन्तरं व्युष्टायां प्रणयनमाहाश्वलायनः— 'एवं प्रातर्व्युष्टायाम्' इति। तदनन्तरमग्न्यगारे गायत्रीजपमाह याज्ञवल्क्यः— 'अग्न्यगारे जलान्ते वा जपेद्देवालयेऽपि वा। पुण्यतीर्थे गवां गोष्ठे द्विजक्षेत्रेऽथवा गृहे' इति। जपसंख्यामाह योगयाज्ञवल्क्यः— 'ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्' इति। उदयानन्तरमुपस्थानं कर्तव्यम्। तत्र पराशरः— 'ततः सूर्यमुपस्थाय सम्यगाचम्य च द्विजः' इति। संध्यावन्दनाग्निहोत्रहोमयोरुच्छेदे पौर्वापर्यमाह बोधायनः— 'कथमु खलु नित्या-

नामनुक्रमः' इति संध्योपासनमग्न्युपासनं नित्यस्वाध्याय-गृहकर्मस्नानादित्योपस्थानतर्पणजपयज्ञगृहदेवार्चनवैश्वदेवपञ्चमहायज्ञात्मयज्ञसंध्योपासनाग्निहोत्रात्मयज्ञसंवेशनानीत्येतान्युदितहोमिनोऽजस्राग्निहोत्रिणोऽनुदितहोमिनोऽग्निहोत्रं संध्योपासनमिति क्रम एतानि नित्यान्युपर्युषमारभ्या संवेशनात्सिद्धम्' इति । दक्षोऽपि—'संध्याकर्मावसाने तु स्वयं होमो विधीयते' इति । यदि तीर्थस्य दूरतया बहिः संध्यावन्दनकरणे अग्निहोत्रप्रणयनादिकालातिक्रमो भवेत्तदा गृह एव संध्यावन्दनद्वयं कर्तव्यम् । तथा च अत्रिः—'संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । उभे संध्ये तु कर्तव्ये ब्राह्मणैश्च गृहेष्वपि' इति । अयं क्रमः अनाहिताग्नेर्गृहस्थस्यापि तुल्यः । आश्वलायनाचार्यैः 'तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ हौम्यं च मांसवर्जम्' इति । औपासने अग्निहोत्रद्रव्यकालातिदेशात् । खादिरगृह्येऽपि 'प्रागस्तमयोदयाभ्यां प्रादुष्कृत्वास्तमिते होम उदिते चानुदिते वा' इति अग्निहोत्रकालस्यैव औपासनकालत्वेन

विधानात्। स्मृत्यर्थसारेऽपि– 'य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु' इति अग्निहोत्रिधर्मस्यातिदेशात्। एवं च संध्ययोश्च बहिर्ग्रामादित्यादि सूत्रं स्नातकनिरग्निकवानप्रस्थकुटीचकप्रवासिविच्छिन्नोत्सृष्टाग्नियायावरविधुरादिविषयं द्रष्टव्यमिति। एवं कृतपौर्वाह्णिकक्रियो दाशरथिः

तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम्।
विमलक्षौमसंवीतो वासयामास च द्विजान्॥

तेषां पुण्याहघोषोऽभूद्गम्भीरमधुरस्वरः।
अयोध्यां पूरयामास तूर्यघोषानुनादितः॥

अनेनाचारप्राप्तकर्माङ्गस्वस्तिपुण्याहवाचनं कृतमिति सूचितम्। ततश्च रामाभिषेकमाकर्ण्य हर्षभरमेदुरैः पौरैरलंकृतेषु रथ्याचत्वरराजमार्गेषु पौरजानपदाः

कथयन्तो मिथस्तत्र प्रशशंसुर्नराधिपम्॥

अहो महात्मा राजायमिक्ष्वाकुकुलवर्धनः।
ज्ञात्वा यो वृद्धमात्मानं रामं राज्येऽभिषेक्ष्यति॥

सर्वे ह्यनुगृहीताः स्मो यन्नो रामो महीपतिः ।
चिराय भविता गोप्ता दृष्टलोकपरावरः ।

अनुद्धतमना विद्वान्धर्मात्मा मातृवत्सलः ॥
यथा च भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः ।

चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ॥
यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयम् ॥

इति । सप्तमे—ततश्च यदृच्छया सुधाधवलमत्युन्नतं प्रासादमारुह्य रथ्याचत्वरराजमर्गालंकरणसमुत्सुकपौरजनावलोकनेन संजातविस्मयया मन्थरया किमिदमतिमात्रहर्षकारणमकाण्डे इति पृष्ट्वा धात्रीः 'श्वः पुष्येण दशरथो राघवं यौवराज्येऽभिषेक्ष्यति तन्निमित्तश्चायं पौरजनप्रमोदः' इत्यवादीत् । ततो मन्थरा सरभसं भवने शयानां कैकेयीमभ्येत्य

उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ।
उपप्लुतमघौघेन किमात्मानं न बुध्यसे ॥

अक्षव्यं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् ।
रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥

धर्मवादी शठो भर्ता श्लक्ष्णवादी च राघवः ।
शुद्धभावे न जानीषे तेनैवमतिसंधिता ।

शत्रुः प्रतिप्रवादेन मात्रेव हितकाम्यया ॥
आशीविष इवाङ्केन बाले परिधृतस्त्वया ।

यथा हि कुर्यात्सर्पो वा शत्रुर्वा प्रत्युपेक्षितः ॥
राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ।

सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव ।
आयस्व पुत्रमात्मानं मां च विस्मयदर्शने ॥

इत्यवादीत् । एवं पापदर्शिन्या कुब्जया सामर्षमभिहिताप्यकलुषितहृदया कैकेयी रामाभिषेकश्रवणसंजातहर्षप्रकर्षा तस्यै स्वहस्ताभरणं प्रदाय

न मे परं किंचिदितस्त्वया पुनः
प्रियं प्रियार्हे सुवचं वचोवरम् ।

तथा ह्युवोचस्त्वमतः प्रियोत्तमं
परं वरं ते प्रददामि तं वृणु ॥

इत्यवादीत् । अष्टमे– ततः स्वकृतपारितोषिकप्रदान-मसंमतं मन्वानां समुदञ्चितकोपमुत्सृष्टाभरणां वाक्शरैः पुनः पुनर्मर्माणि विदारयन्तीं मन्थरां पुनरप्यवलोक्य राम-गुणाकृष्टहृदया कैकेयी तमेव भूयो भूयः प्रशशंस—

धर्मज्ञो गुरुभिर्दान्तः कृतज्ञः सत्यवाक्शुचिः ।
रामो राज्ञः सुतो ज्येष्ठो यौवराज्यमतोऽर्हति ॥

भ्रातॄन्भृत्यांश्च दीर्घायुः पितृवत्पालयिष्यति ।
संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम् ॥

भरतस्यापि रामस्य ध्रुवं वर्षशतात्परम् ।
पितृपैतामहं राज्यमवाप्य पुरुषर्षभः ॥

यथा मे भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौसल्या तोऽतिरिक्तं च स तु शुश्रूषते हि माम् ॥

राज्यं यदि हि रामस्य भरतस्यापि तत्तथा ।
मन्यते हि यथात्मानं तथा भ्रातृंश्च राघवः ॥

इति । ततश्च मन्थरा सरलतरं कैकेयीवचनमाकर्ण्य

भविता राघवो राजा राघवस्य तु यः सुतः ।
राजवंशात्तु भरतः कैकेयि परिहास्यते ॥

न हि राजसुताः सर्वे राज्ये तिष्ठन्ति भामिनि ।
स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥

तस्माज्ज्येष्ठे हि कैकेयि राज्यतन्त्राणि पार्थिवाः ।
स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि ॥

यदा हि रामः पृथिवीमवाप्स्यति
ध्रुवं प्रणष्टो भरतो भविष्यति ।
अतो हि संचिन्तय राज्यमात्मजे
परस्य चाद्यैव विवासकारणम् ॥

इत्येवमादिभिर्वचनैः पुनरपि कैकेयीमनः क्षोभया-

मास इति। नवमे— ततः तत्क्षणप्रसरदक्षिकषायभाव-विशदीकृतकोपया कैकेय्या भरताभिषेकरामवनवासयोः कमुपायं पश्यसीति पृष्टा मन्थरा समभाषत 'पुरा खलु देवदानवसंग्रामे देवराजसाहाय्यमाचरन्दशरथः तिमिध्वजासुरेण सह कृते शस्त्राशस्त्रिसंप्रहारे संजातमूर्च्छापनोदकेन त्वत्कृतोपचारेण संतुष्टः सन्वरद्वयं प्रादात्।

तौ वरौ याच भर्तारं भरतस्याभिषेचनम्।
प्रव्राजनं च रामस्य वर्षाणि नव पञ्च च॥

चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम्।
रूढश्च कृतमूलश्च शेषं स्थास्यति ते सुतः॥

एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति।
भरतश्च हतामित्रस्तव राजा भविष्यति।

येन कालेन रामश्च वनात्प्रत्यागमिष्यति।
तेन कालेन पुत्रस्ते कृतमूलो भविष्यति॥

अत्र चिरेण संजातप्रकृतिस्नेहस्य राज्ञो भरतस्य

स्थिरराज्यत्वकथनात्प्रकृतिष्वरूढमूलो राजा अचिरेण उच्छेत्तुं सुकर इति सूचितम्। तथा च संभवपर्वणि धृतराष्ट्रं प्रति दुर्योधनवचनम्— 'एतत्कृत्यतमं राजन्नस्माकं भरतर्षभ। अयं हि शकुनिर्वेद स विद्यामक्षसंपदम्॥ दृढमूला वयं राज्ये मित्राणि परिगृह्य च। सारवद्विपुलं सैन्यं सत्कृत्य च दुरासदम्॥ ते च त्रयोदशे वर्षे पारयिष्यन्ति तद्व्रतम्। जेष्यामस्तान्वयं राजन्रोचतां ते परंतप' इति। कालिदासोऽपि 'अचिराधिष्ठितराज्यः शत्रुं प्रकृतिष्वरूढमूलत्वात्। न च संरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुम्' इति।

तथातिविद्धा महिषीति कुञ्जया
स्वमाहता वाग्विषुभिर्मुहुर्मुहुः।
निधाय हस्तौ हृदयेऽतिविस्मिता
शशास कुञ्जां कुपिता पुनः पुनः॥

अहं हि नवास्तरणेऽपि न स्वजो
न चन्दनं नाञ्जनपानभोजनम्।

न किंचिदिच्छामि न चेह जीवितं
न चेदितो गच्छति राघवो वनम् ॥

इत्यभिधाय कनकमयान्यभरणानि दिव्यानि च वासांसि सुरभीणि च माल्यान्यपनीय मलिनवासाः क्रोधागारं विवेश । अत्र अशनवसनादिना दशरथकृतपरिपालनमनालोच्य पतिदूषणपूर्वकमकारणादेव रामाभिषेकमसहमानया मन्थरयाधर्मोपचितैस्तैस्तैर्हेतुवादैः कैकेयीचित्तकालुष्यकरणात् मन्थरातिदुष्टा इति । तत्सहवासेन चोत्तमकुलोत्पन्नाया अपि कैकेय्या अमार्गप्रवृत्त्या अनर्थावायको दुष्टसहवासः सर्वथा परित्याज्य इत्यप्युक्तं भवति । तथा च भारते वनपर्वणि– 'एकशीलश्च मित्रत्वं भजते पापकर्मणः । स तेन दुःखमाप्नोति प्रत्र च विपद्यते' । आदिपर्वणि— 'अन्याय्यमवदन्साधुर्यथा हि परितप्यते । तदा परिवदन्न्याय्यं तुष्टो भवति दुर्जनः ॥ अभिवाद्य यथा वृद्धान्सन्तो गच्छन्ति निर्वृतिम् । एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः । यत्र वाच्यां परैः सन्तः

परानाहुस्तथाविधान् ॥ अतो हास्यतरं लोके किंचिदन्यन्न विद्यते । यत्र दुर्जन इत्याह दुर्जनः सज्जनं स्वयम्' इति । कामन्दकेऽपि— 'दीयते स्वस्थहृदयैः पिण्डो येनैव पाणिना । मार्जार इव दुर्वृत्तस्तमेव हि विलुम्पति । असाध्यं साधुमन्त्राणां तीव्रं वाग्विषमुद्वमन् । द्विजिह्वं वदनं धत्ते दुष्टो दुर्जनपन्नगः' इति । प्राचीना अपि 'विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः । यदयं न-कुलद्वेषी स कुलद्वेषी पुनः पिशुनः' इति । तथा दुष्टसंगमपरित्यागे आदिपर्वणि– 'सत्यधर्मच्युतात्पुंसः क्रुद्धयदाशीविषादिव । अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः ॥ तस्माद्दुर्जनसंसर्गः परित्याज्यो मनीषिभिः' इति । वनपर्वण्यपि युधिष्ठिरं प्रति पौरववचनम्— 'वस्त्रमापस्तिलान्भूमिं गन्धो वासयते यथा । पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ॥ मोहजालस्य योनिर्हि मूढैरेव समागमः । असतां दर्शनात्स्पर्शात्संजल्पाच्च प्रहासनात् ॥ धर्माचाराः प्रहीयन्ते सिध्यन्ति न च मानवाः । बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ।

शुष्केणार्द्रं दह्यते मिश्रभावात्तस्मात्पापैः सह सन्धिं न कुर्यात्' इति । कामन्दकेऽपि 'तिलाश्चम्पकसंश्लेषात्प्राप्नुवन्त्यधिवासताम् । रसो न भक्षास्तद्गन्धं सर्वे साङ्कामिका गुणाः ॥ अपां प्रवाहो गाङ्गोऽपि समुद्रं प्राप्य तद्रसः । भवत्यपेयस्तद्विद्वान्न श्रियेदशुभात्मकम् ॥ ग्रीष्मसूर्यांशुसंतप्तमुद्वेजनमनाश्रयम् । मरुस्थलमिवोद्यमं त्यजेद्दुर्जनसंगतम् ॥ सतः शीलोपसंपन्नानकस्मादेव दुर्जनः । अन्तः प्रविश्य दहति शुष्कान्वृक्षानिवानलः ॥ विश्वासोद्गीर्णहुतभुग्धूमधूम्रीकृताननैः । वरमाशीविषैः सङ्गं कुर्यान्न त्वेव दुर्जनैः' इति ॥

दशमैकादशयोः— ततः अस्तंगते सवितरि संजातकामो दशरथो रत्यर्थं कैकेयीभवनमागत्य तत्र तामपश्यन् केदानीं मत्प्रियेति पृष्ट्या प्रतिहार्या निवेदितदेवीक्रोधागारप्रवेशस्तद्भवनमागत्य

स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ।
अपापः पापसंकल्पां ददर्श धरणीतले ॥

ततस्तद्दर्शनसमुज्जृम्भितसंभ्रमः करेण तां परिमृश्य ससान्त्वमेवमवादीत्— देवि नाहमपराधमात्मकृतं कंचित्पश्यामि, केन वा विमानितानि कस्य वाप्रियं कार्यम्,

**करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥**

इति सरलहृदयेन दशरथेन सादरमुदीरितं वचनमाकर्ण्य कुटिलहृदया कैकेयी तद्वचनं द्रढीकर्तुकामा 'प्रतिज्ञां प्रतिजानीष्व' इति व्याजहार।

**तमुवाच महाराजः कैकेयीमीषदुत्स्मितः।**
**अवलिप्ते न जानीषे त्वत्तः प्रियतमो मम ॥**

**मनुजौ मनुजव्याघ्राद्रामादन्यो न विद्यते।**
**तेनाजय्येन मुख्येन राघवेण महात्मना ॥**

**शपे ते जीवनार्हेण ब्रूहि यन्मनसेच्छसि।**
**यं मुहूर्तमपश्यंस्तु न जीवेयमहं ध्रुवम् ॥**

**तेन रामेण कैकेयि शपे ते वचनक्रियाम्।**
**आत्मना चात्मजैश्चान्यैर्वृणे यं मनुजर्षभम् ॥**

तेन रामेण कैकेयि शपे ते वचनक्रियाम् ।
बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ।

इति । ततो दशरथकृतशपथसान्त्वनशतैरप्यसंभृतविस्रम्भा केकेयी ससंभ्रममुत्थाय

यथाक्रमेण शपसि वरं मम ददासि च ।
तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः साग्निपुरोगमाः ॥

इति सर्वानपि देवान्साक्षीकृत्य काममोहितं राजानमेवमवोचत् ।

वरौ यौ मे त्वया दत्तौ तदा देव महीपते ।
तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ॥

योऽभिषेकसमारम्भो राघवस्योपकल्पितः ।
अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ॥

यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ।
तदा दैवासुरे युद्धे तस्य कालोऽयमागतः ॥

**नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।**
**चीराजिनजटाधारी रामो भवतु तापसः ॥**

इति । अत्र निकामकामासक्तदशरथेन शपथं कारयित्वा सर्वदेवतासाक्षीकरणपूर्वकवरद्वयं प्रार्थितवतीति कथनात् स्त्रियोऽत्यन्तकामासक्तान्पुरुषान्वशमानीय सङ्कटे पातयन्ति । अतः तासु अतिस्नेहद्वेषविश्रम्भादिकं न कर्तव्यमिति सूचितम् । तथा च मनुः— 'अविद्वांसमलं लोके विद्वांसमपि वा पुनः । प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्' इति । कामन्दकेऽपि– 'निकामासक्तमनसां कान्तामुखविलोकने । गलन्ति गलदश्रूणां यौवनेन सह स्त्रियः । नामापि स्त्रीति संह्लादि विकरोत्येव मानसम् । किं पुनर्दर्शनं तस्या विलासोल्लासितभ्रुवः । रहःप्रचारकुशला मृदुगद्गदभाषिणी ॥ कं नु नारी न कुरुते रक्तं रक्तान्तलोचना । मुनेरपि मनोऽवश्यं सरागं कुरुतेऽङ्गना ॥ प्रसन्नकान्तिजननं संध्येव शशिमण्डलम् । मनः प्रह्लादयन्तीभिर्मन्दं यान्तीभिरप्यलम् ॥ महान्तोऽपि हि भिद्यन्ते स्त्रीभिरद्रिरिवाचलाः' इति । प्रा-

चीना अपि— 'स्मितेन रागेण च लज्जया भिया परा-ङ्मुखैरर्धकटाक्षवीक्षणैः । वचोभिरीर्ष्याकलहेन लीलया समस्तभावैः खलु बन्धनं स्त्रियः ॥ सन्तु विलोकनभा-षणविलासपरिहासकेलिपरिरम्भाः । स्मरणमपि कामि-नीनामलमिह मनसो विकाराय' इति । आनुशासने विपुलोपाख्यानेऽपि— 'नासां स्नेहो नरैः कार्यस्तथैवे-र्ष्या जनेश्वर । खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव ह ॥ निहन्यादन्यथा कुर्वन्नरः कौरवनन्दन' इति । कामन्दकेऽपि— 'अत्यन्तवल्लभोऽस्मीति विस्रम्भं स्त्रीषु न व्रजेत् । देवी तु काशिराजानं निजघान रहोगतम् ॥ विषाक्तेन च सौवीरं मेखलामणिना नृपम् । नूपुरेण च वैरासं जालमार्षं दर्पणेन च ॥ वेण्यां शस्त्रं समाधाय तथा चापि विदूरथम्' इति ॥

द्वादशे— ततः स राजा व्याघ्रीदर्शनसंत्रस्तो मृग इव क्षुभितान्तःकरणः कैकेयीमेवमवोचत्—

नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥

सदा ते जननीतुल्यां वृत्तिं वहति राघवः ।
तस्यैव त्वमनर्थाय किं निमित्तमिहोद्यता ॥

कौसल्यां वा सुमित्रां वा त्यजेऽहमपि वा श्रियम् ।
जीवितं वत्स नो रामं न त्वेव पितृवत्सलम् ॥

तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥

न हि किंचिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधाम्यहम् ।

अनृतैर्बत मां सान्त्वैः सान्त्वयन्ती स्म भाषसे ॥
गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ।

अत्र— कैकेयी स्वपुत्रस्य राज्यप्राप्तिरूपवरलाभावधि पत्युर्विप्रियं कृतवतीति कथनात्स्त्रियः स्वभावतः अतिक्रूराः तासां पत्यौ स्नेहः स्वप्रयोजनायैव, न तु स्वारसिक इति सूचितम् । तथा च शाकलसंहितायां पूरूरवसा प्रार्थ्यमाना ऊर्वशी तमाह— 'न वै स्त्रै-

णानि सरूयानि सन्ति सालावृकाणां हृदयान्येताः' इति। बृहदारण्यके मैत्रेयीब्राह्मणेऽपि 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति' इति। अस्य भाष्यम्— नवाशब्दः प्रसिद्धस्मरणार्थः प्रसिद्धमेतल्लोके पत्युर्भर्तुः कामाय प्रयोजनायैव भार्यायाः पतिः प्रियो भवति' इति। भाष्यदीपिकायामपि 'मैत्रेयि जाया न हिता न पत्यौ मुदं विधत्ते पतिकामसिद्धये। किं त्वात्ममोदाय मुधा हिताभिर्लीलाभिरानन्दयति स्म कान्तम्॥ तावत्प्रियः स्यात्पतिरङ्गनानां सिध्यन्ति यावन्निखिलाः स्वकामाः। पूर्णेषु पूर्णेषु च तेषु योषा विगर्हयन्त्येनमथ द्विषन्ति॥ यः प्रीणयेदन्वहमात्मजायां विलेपनालंकरणादिदानैः। न लभ्नमस्या हृदयं यदि स्यादयं तृणायापि तया न गण्यः' इति। आनुशासनिके विपुलोपाख्यानेऽपि 'असाध्याश्चापि दुर्वृत्ताः कुलघ्न्यः पापनिश्चयाः। विज्ञेया लक्षणैर्दुष्टैः स्वगात्रसहजैर्नृप॥ एता हि मनुजव्याघ्रतीक्ष्णास्तीक्ष्णपराक्रमाः। एताः कृत्याः स्वकार्याश्च कृताश्च भरतर्षभ' इति।

रोचयस्यभिरामस्य रामस्य प्रियदर्शने ।
तव शुश्रूषमाणस्य किमर्थं विप्रवासनम् ॥

शुश्रूषां गौरवं चैव प्रणामं वचनक्रियाम् ।
कस्ते भूयस्तरां कुर्यादन्यत्र मनुजर्षभात् ॥

बहूनां स्त्रीसहस्राणां बहूनां चोपजीविनाम् ।
परिवादोऽपवादो वा राघवे नोपपद्यते ॥

सत्येन लोकाञ्जयति दीनान्दानेन राघवः ।
गुरूञ्शुश्रूषया वीरो धनुषा युधि शात्रवान् ॥

सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥

क्षमा यस्मिन्दमस्त्यागः सत्यं धर्मः कृतज्ञता ।
अविहिंसा च भूतानां तमृते का गतिर्मम ॥

तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥

मम वृद्धस्य दीनस्य गतान्तस्य तपस्विनः ।
दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ॥

अञ्जलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते ।
शरणं भव रामस्य माधर्मो मामिह स्पृशेत् ॥

इति दुःखाभिसंतप्तं विलपन्तमचेतनम् ।
घूर्णमानं महाराजं शोकेनाभिपरिप्लुतम् ॥

परं शोकार्णवस्याशु प्रार्थयन्तं पुनः पुनः ।
प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ॥

यदि दत्त्वा वरौ राजन्पुनः प्रत्यनुतप्यसे ।
धार्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥

यदा समेता बहवस्त्वया राजर्षयः सह ।
कथयिष्यन्ति धर्मज्ञास्तत्र किं प्रतिवक्ष्यसि ॥

किल्बिषत्वं नरेन्द्राणां करिष्यसि नराधिप ।
यो दत्त्वा वरमद्यैव पुनरन्यानि भाषसे ॥

सत्यं धर्मं परित्यज्य रामं राज्येऽभिषिच्य च ।
सह कौसल्यया नित्यं रन्तुमिच्छसि दुर्मते ॥

भवत्वधर्मो धर्मो वा सत्यं वा यदि वानृतम् ।
यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥

स्वप्राणविप्रयोगनिदानभूतरामविप्रवासनाद्विरमेति दशरथेनासकृत्सकरुणमभियाचितापि परुषतराणि वचनानि श्रावयन्ती कैकेयी भर्तृप्राणत्यागमविगणय्य भरतस्य राज्याभिषेकः रामस्य च प्रव्राजनमिति वरद्वयं प्रार्थितवती इति कथनात् स्त्रीणां भर्त्रपेक्षया पुत्रेषु स्नेहातिशयः सूचितः । तथा चादिपर्वणि स्त्रियं जरितां प्रति मन्दपालवचनम्— 'न हि भार्येति विश्वासः कार्यः पुंसा कथंचन । न हि कार्यमनुध्याति नारी पुत्रवती सती' । तथा पुत्रोपरोधजनितकोपा देवी रहोगतं भर्तारं विलोभ्य एकभाजनस्थानविषयान् लाजान्स्वयं भक्षयन्ती विषमिश्रांल्लाजान्भोजयित्वा जघानेत्याह कामन्दकः— 'लाजान्विषेण संयोज्य मधुनेति विलोभ्य तम् । देवी तु

काशिराजेन्द्रं निजघान रहोगतम्' इति ।

अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥

एकाहमपि पश्येयं यद्यहं राममातरम् ।
अञ्जलिं प्रतिगृह्णन्ती श्रेयो ननु मृतिर्मम ॥

भरतेनात्मना चाहं शपेऽयं मनुजाधिप ॥
यथा नान्येन तुष्येयमृते रामविवासनात् ।

स्थाप्य राज्ये मम सुतं कृत्वा रामं वनेचरम् ॥
निःसपत्नां च मां कृत्वा कृतकृत्यो भविष्यसि ॥

एकाहमपि पौरजनाञ्जलीन्प्रतिगृह्णन्त्याः कौसल्याया दर्शनात्प्राणत्यागो वरमिति रामप्रव्राजनपूर्वकं भरतराज्याभिषेकेण निःसपत्नां मां कुर्विति कैकेयीवचसा स्त्रीणां सपत्नीवृद्धिरतिदुःसहेति सूचितम् । तथा च भारते आदिपर्वणि पाण्डुना माद्र्या पुत्रार्थं पुनः प्रचोदिता कुन्ती तमाह— 'उत्कासकुह्वन्द्रुमेषा लभे तेनास्मि

वञ्चिता । बिभेम्यस्या ह्यभिभवात्कुलीणां गतिरीदृशी ॥ नाज्ञासिषमहं मूढा द्वन्द्वाह्वाने फलद्वयम् । तस्मान्नाहं तु वक्तव्या त्वयैषोऽस्तु वरो मम' इति । आदिपर्वणि तत्रैव सुभद्राविवाहानन्तरमर्जुनं प्रति द्रौपदीवाक्यम्— 'तत्रैव गच्छ कौन्तेय यत्र सा सात्त्वतात्मजा । सुबद्धस्यापि भारस्य पूर्वबन्धः श्रुथायते' इति । तत्रैव खाण्डवदाहे जरितां द्वितीयभार्यां प्रति मन्दपालः— 'न स्त्रीणां विद्यते किंचिदमुत्र पुरुषान्तरात् । सापत्नकमृते लोके नान्यदर्थविनाशनम् ॥ वैराग्निदीपनं चैव भृशमुद्वेगकारि च । सुव्रता चापि कल्याणि सर्वभूतेषु विश्रुता ॥ अरुन्धती महात्मानं वसिष्ठं पर्यशङ्कत । विशुद्धभावमत्यन्तं सदा प्रियहिते रतम् ॥ सप्तर्षिमध्यगं वीरमवमेने च तं मुनिम् । अपथ्यानेन सा तेन धूमारुणसमप्रभा । लक्ष्मलक्ष्या नाभिरूपा निमित्तमिह पश्यती ॥ अपत्यहेतोः संप्राप्तं तथा त्वमपि मामिह । इष्टमेवं गते हि त्वं सा तथैवाद्य वर्तते' इति । पाण्डुं प्रति माद्रीवचनम् 'गान्धार्यां चैव नृपते जातं पुत्र-

शतं तथा । श्रुत्वा न मे तथा दुःखमभवत्कुरुनन्दन ॥
इदं तु मे महद्दुःखं तुल्यतायामपुत्रता' इति ॥

भूतोपहतचित्तेव ब्रुवन्ती मां न लज्जसे ।
शीलव्यसनमेतत्ते नाभिजानाम्यहं पुरः ॥

बालायास्तत्त्विदानीं ते लक्षये विपरीतवत् ।
नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि ॥

यदा यदा हि कौसल्या दासीवच्च सखीव च ।
भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठते ॥

सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ।
न मया सत्कृता देवी सत्कारार्हा कृते तव ।

अत्र कौसल्याकृतशुश्रूषासंतुष्टेन दशरथेन दासीवत्सखीवद्भार्यावद्भगिनीवन्मातृवच्चोपतिष्ठत इति परोक्षे गुणकथनात्स्त्रीणामेवमादिभिः पतिसंतोषणं परमो धर्म इति ।

न मया सत्कृता देवी सत्कारार्हा कृते तव ।

इति वचनेन सपत्नीप्रीत्यर्थं भर्त्रा कृतमसत्कारमविगणय्य भर्तृशुश्रूषणमेव कृतवत्याः कौसल्यायाः सत्कारकरणस्य दोषत्वावगमात्पतिव्रतानां सत्कारपूर्वकं भरणं भर्तुर्धर्म इति सूचितम् । तथा च पतिव्रतानां धर्मजातं पूज्यत्वं च प्रतिपादितं धर्मशास्त्रेषु— तत्र पारिजाते आश्वलायनः— 'शूद्राणां द्विजशुश्रूषा विहिता ब्रह्मणा यथा । स्त्रीणां स्वभर्तृशुश्रूषा तथैव विहिता सदा ॥ अप्रियेष्वप्रिया भर्तुः सुप्रियेषु प्रिया सती । भवेत्स मे समा नित्यं प्रत्यक्षे वा परोक्षके ॥ स्नेहं पुत्रेष्वपि त्यक्त्वा स्वदेहे चाङ्गना सती । भर्तृचित्तानुगा नित्यं भवेद्भर्तृहिते रता ॥ अशनादि च यत्पथ्यं भर्त्रा यच्च विवर्जितम् । स्वात्मनश्च तथा च स्याच्छयने चासने तथा ॥ न स्याज्जपतपोहोमदानव्रतमखादिकम् । स्त्रीणां पतिपराणां तु पत्या जीवति किंचन ॥ तदाज्ञया तु कर्तव्यमकार्यमपि नेच्छया । स्वश्रूश्वशुरयोश्चैतत्कार्यं भर्तृवदादरात् ॥ भर्ता यद्यप्यनुज्ञाता पित्रोस्तस्याङ्गना सती । शक्त्यां

कुर्यात्परोक्षेऽपि हितान्यप्रिययोरपि ॥ जडं वा बधिरं पङ्गुं काणमन्धं कुणिं तथा। कुष्ठिनं च कृशं वाढ्यं प्रियं वाप्रियमेव च ॥ सुरूपं वा विरूपं वा युवानं वृद्धमेव च ॥ प्रत्यक्षदेववत्साध्वी भर्तारं पूजयेत्सदा ॥ कुणिर्हस्तरहितः। गृहार्चनपरा नित्यं सम्यङ्निर्निक्तभाजना। निर्मलालंकृता चैव शुश्रूषेत्पतिमीश्वरम् ॥ नेक्षेत दुष्टचित्तानां दुःस्त्रीणां पापचेतसाम्। तस्मात्संकल्प्य चात्मानमनन्या स्यात्सदा सती ॥ परसक्ताः स्त्रियो याश्च वञ्चयित्वा स्वकं पतिम्। निन्द्याः स्युः सर्वलोकैस्ता निरये च मृताश्चिरम् ॥ बाल्ये पितृवशा नारी दत्ता भर्तृवशा भवेत्। वृद्धा पुत्रवशा नारी न स्त्री स्वातन्त्र्यमर्हति ॥ भर्तुरप्यवलिप्तस्य कार्याकार्यमजानतः। पत्न्याथ कार्या तस्याज्ञा पतिस्तस्याश्च सर्वदा' इति। विज्ञानेश्वरः—'स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः सनातनः। अशुद्धे संप्रतीक्ष्यो हि महापातकदूषितः ॥ संयतोऽमस्करा दक्षादुष्टा व्ययपराङ्मुखी। कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा ॥ पतिप्रियहिते युक्ता स्वाचारविजिते-

न्द्रियं । सेह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्' इति । स्कान्दे— 'पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्' इति । दक्षिणाभिमुखा या तु या विदिक्संमुखापि वा । केशान्संस्कुरुते नारी धननाशं सुविन्दति । शङ्खः—'अनुक्तान्नानुग्रहान्नानुगच्छेन्नानुगच्छेन्नानुत्तरीयान्न त्वरितं व्रजेत न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवैद्यविद्येभ्यो न नाभिं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदपावृतं भर्तारं तद्वन्धूंवा न द्विष्यात् न गणिकाधूर्त्ताभिसारिणी प्रव्रजिता प्रेक्षणिकानायाकुहकारिकारिकादुःशीलाभिः सहैकत्र वसेत्संसर्गेण चारित्रं दुष्यति' इति । मनुः— 'भर्तारं लङ्घयेद्या तु जातु स्त्री गुणदर्पिता । तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते' इति । ब्रह्मपुराणे— 'परित्याज्या च या भार्या भर्तुर्वचनलङ्घिनी । तत्र दोषो न चास्तीति त्वं हि वेत्थ यथातथम् ॥ सर्वलक्षणयुक्तापि या तु भर्तुर्व्यतिक्रमम् । करोति सा परित्याज्या एष धर्मः सनातनः' इति ।

व्यासः– 'कुरूपो वा कुवृत्तो वा दुःखभावेऽपि वा पतिः । रोगान्वितः पिशाचो वा मद्यपः क्रोधनोऽपि वा ॥ वृद्धो वाथ विदग्धो वा मूको वा बधिरोऽपि वा । आढ्यो वाथ दरिद्रो वा कदर्यः कुत्सितोऽपि वा ॥ कातरः कितवो वापि ललनालम्पटोऽपि वा । सततं देववत्पूज्यो मनोवाक्कायकर्मभिः ॥ लोभितोऽपि परेणार्थैः सा सती लोकभूषणा । दैन्येन प्रार्थिता वापि बलेन विधृतापि वा ॥ वस्त्राद्यैर्वासिता वापि नैवान्यं भजते सती । वीक्षिता वीक्षते नान्यं हसिता न हसत्यपि । भाषिता भाषते नैव सा साध्वी साधुलक्षणा ॥ रूपयौवनयुक्तापि गीतनृत्येऽपि कोविदा । स्वानुरूपं चापि दृष्ट्वा न याति विकृतिं सती ॥ सुरूपं तरुणं रम्यं कामिनीनां च वल्लभम् । या नेच्छति परं कामं विज्ञेया सा महासती । भुक्ते भुङ्क्ते च या पत्यौ दुःखिते दुःखिता च या । मुदिते मुदितात्यर्थं प्रोषिते मलिनाम्बरा ॥ सुप्ते च स्वेच्छया शेते पूर्वमेव प्रबुध्यते । नान्यं कामयते चित्ते सा विज्ञेया पतिव्रता ॥ भक्तिं श्वशुरयोः कुर्यात्पत्युश्चापि

विशेषतः । धर्मकार्येऽनुकूलत्वमधर्मकार्येऽपि संयमम् ॥ प्रागल्भ्यं कामकार्येषु शुचित्वं निजविग्रहे । मङ्गलं सततं पत्युः सततं प्रियभाषणम् । भाव्यं मङ्गलकारिण्या कृतमङ्गलशीलया ॥ गृहोपस्करसंस्काररतया प्रतिवासरम् । क्षेत्राद्वनाद्वा ग्रामाद्वा भर्तारं गृहमागतम् ॥ अभ्युत्थानाभिवादाभ्यामासनेनोदकेन वा । प्रसन्नभाण्डा मृष्टान्ना काले भोजनदायिनी । गुरूणां पुत्रमित्राणां बन्धूनां कर्मकारिणाम् ॥ आश्रितानां च भृत्यानां दासीदासजनस्य च । अतिथ्यभ्यागतानां च भिक्षुकाणां च लिङ्गिनाम् ॥ भोजनासनदानाद्यैर्वस्त्रैश्च प्रियभाषणैः । तत्तद्गुणानुसारेण प्राप्ते काले यथोचितम् ॥ दक्षया सर्वदा भाव्यं भार्यया गृहमुख्यया । दानार्थमपि यद्द्रव्यं लोकात्किंचिच्च साधयेत् ॥ भर्तुराज्ञां विना नैव स्वबन्धुभ्यो दिशेद्धनम् । यच्च भर्ता न पिबति यच्च भर्ता न खादति । यच्च भर्ता न चाश्नाति सर्वं तद्वर्जयेत्सती ॥ मार्जनं चैव दन्तानामलकानां प्रसाधनम् । तैलाभ्यङ्गं तथा स्नानं शरीरोद्वर्तनक्रियाम् ॥ भोजनं वसनं निद्रां परिधानं च

वाससाम् । आरम्भं मण्डनानां च न कुर्यात्पश्यति प्रिये ॥ हरिद्रां कज्जलं चैव सिन्दूरं कुङ्कुमं तथा । कूर्पासकं च ताम्बूलं माल्यमाभरणं शुभम् ॥ केशसंस्कारकबरीकर-कर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रता ॥ आर्द्रपादा शयाना स्त्री पतिसङ्गं समाचरेत् । आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् । कच्चुकेन समं नारी भर्तुः सङ्गं समाचरेत् । त्रिभिर्वर्षैश्च मध्ये वा विधवा भवति ध्रुवम् ॥ तालपत्रगलत्कर्णा दयिता मैथुनं व्रजेत् । पञ्चमे सप्तमे वर्षे वैधव्यमिह जायते ॥ पादलग्नतनुश्चैव ह्युच्छिष्टं ताडनं तथा । कोपं क्रोधं च निर्भर्त्सं संयोगेषु न दोषकृत् ॥ ऋतुस्नाता तु या नारी पतिं नैवोपविन्दति । शुनी वृकी शृगाली स्यात्सूकरी च पुनः पुनः ॥ कुङ्कुमं चाञ्जनं चैव तथा हारिद्रचन्दने । धौतवस्त्रं च ताम्बूलं संयोगं च शुभावहम् ॥ पादौ भर्तुर्नमस्कृत्य पश्चाच्छय्यां समाविशेत् । प्रीतिमाह्लादसंयुक्तं कृत्वा संयोगमाचरेत्' इति । स्कान्दे लोपामुद्राप्रशंसाव्याजेन बृहस्पतिः—'पतिव्रतेयं कल्याणी लोपामुद्रा सध-

र्मिणी । तवाङ्गच्छायया तुल्या यत्कथा पुण्यकारिणी ॥ पतिव्रतास्वरुन्धत्या सावित्र्या ह्यनसूयया । शाण्डिल्यया च सत्या च लक्ष्म्या च शतरूपया । मेनया च सुनीत्या च संज्ञया स्वाहया तथा । यथैषा वर्ण्यते श्रेष्ठा न तथान्येति निश्चितम् ॥ मुक्ते मुङ्क्ते त्वयि मुने तिष्ठति त्वयि तिष्ठति । विनिद्रिते च निद्राति प्रथमं प्रतिबुध्यति ॥ अनलंकृतमात्मानं तव नो दर्शयेत्कचित् । कार्यार्थं प्रोषिते क्वापि सर्वमण्डनवर्जिता ॥ न च ते नाम गृह्णाति तवायुष्याभिवृद्धये । पुरुषान्तरनामापि न गृह्णाति कदाचन ॥ समाकुष्टापि नाक्रोशेत् ताडितापि प्रसीदति । इदं कुरु कृतं स्वामिन्मन्यतामिति चक्ति च ॥ आहूता गृहकार्याणि त्यक्त्वागच्छति सादरा । किमर्थमाहूता नाथ सुप्रसादो विधीयताम् ॥ न चिरं तिष्ठति द्वारि न द्वारमुपसेवते । अदापितं त्वया किंचित्कस्मैचिन्न ददात्यपि ॥ पूजोपकरणं सर्वमनुक्ता साधयेत्स्वयम् । नियमोदकबर्हींषि यज्ञ पुष्पाक्षतादिकम् ॥ प्रतीक्षमाणावसरं यथाकालोचितं हि तत् । तदुपस्थापयेत्सर्वमनुद्विग्नातिहृष्टवत् ॥ सेवते भर्तुरुच्चिष्ट-

मन्नपानफलादिकम्। महाप्रसाद इत्युक्ता पतिदत्तं प्रतीच्छति ॥ अविभज्य च नाश्नीयाद्देवपित्रतिथिष्वपि। परिचारकवर्गेषु गोषु भिक्षुकुलेषु च ॥ संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी। कुर्यात्स्वयाननुज्ञाता नोपवासव्रतादिकम् ॥ दूरतो वर्जयेदेषा समाजोत्सवदर्शनम्। नगच्छेत्तीर्थयात्रादिविवाहप्रेक्षणादिषु ॥ सुखसुप्तं सुखासीनं रममाणं यथेच्छया। आन्तरेष्वपि कार्येषु पतिं नोत्थापयेत्कचित् ॥ स्त्रीधर्मिणी स्त्रिरात्रं तु स्वमुखं नैव दर्शयेत्। स्ववाक्यं श्रावयेन्नापि यावत्स्नाता न शुध्यति ॥ सुस्नाता भर्तृवदनमीक्षतेऽन्यस्य नो कचित्। अथ वा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा। कूर्पासकं च ताम्बूलं मङ्गल्याभरणं शुभम् ॥ केशसंस्कारकबरीकरकर्णविभूषणम्। भर्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रता। न रजक्या न हेतुक्या तथा श्रमणया न च ॥ न च दुर्भगया कापि साक्षित्वं कुरुते सती। भर्तृविद्वेषिणीं नारीं नैषा संभाषते कचित्। नैकाकिनी कचिद्भूयान्न नग्ना स्नाति

वै क्वचित् । विना व्यवायसमयं प्रागल्भ्यं न क्वचिच्चरेत् ॥ यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा । इदमेव व्रतं स्त्रीणामयमेव वृषः परः ॥ इयमेका देवपूज्या भर्तुर्वाक्यं न लङ्घयेत् ॥ क्लीबं वा दुःखसंस्थं वा व्याधितं वृद्धमेव वा ॥ सुस्थितं दुस्थितं वापि पतिमेकं न लङ्घयेत् । हृष्टा हृष्टे विषण्णा स्याद्विषण्णास्त्वे प्रिये सदा ॥ एकरूपा भवेत्पुण्या संपत्सु च विपत्सु च । सर्पिर्लवणतैलादिश्चयेऽपि च पतिव्रता ॥ पतिं नास्तीति नो ब्रूयादायासेषु न योजयेत् । तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् ॥ शंकरादपि विष्णोर्वा पतिरेको-ऽधिकः स्त्रियाः ॥ व्रतोपवासनियमं पतिमुल्लङ्घ्य याचरेत् । आयुष्यं हरते भर्तुर्मृता निरयमृच्छति ॥ उक्ता प्रत्युत्तरं दद्याद्या नारी क्रोधमूर्च्छिता । जायते सूकरी ग्रामे सृगाली निर्जने वने ॥ स्त्रीणां हि परमश्चैको नियमः समुदाहृतः । अभ्यर्च्य चरणौ भर्तुर्भोक्तव्यं कृतनिश्चयम् ॥ उच्चासनं न सेवेत न व्रजेत्परवेश्मनि । न ह्यपाकरवाक्यानि वक्तव्यानि कदाचन । अपवादो न वक्तव्यः कलहं दूरतस्त्य-

जेत् । गुरूणां संनिधौ कापि नोच्चैर्ब्रूयान्न वा हसेत् ॥ या भर्तारं परित्यज्य रहश्चरति दुर्मतिः । उलूकी जायते क्रूरा वृक्षकोटरवासिनी ॥ ताडिता ताडितुं चेच्छेत्सा नारी वृकदंशिका । कटाक्षयति यान्यं वै केकराक्षी तु सा भवेत् ॥ या भर्तारं परित्यज्य मृष्टमश्नाति केवलम् । ग्रामे सा सूकरी भूयाद्वल्गुली वा स्वविड्भुजा ॥ या हुंकृत्य प्रियं ब्रूते सा मूका जायते खलु । या सपत्नीः सदेर्ष्येत दुर्भगा सा पुनः पुनः ॥ दृष्टिं विलुप्य भर्तुर्या कंचिदन्यं समीक्षते । काणापि विमुखी चापि कुरूपा चापि जायते । बाह्यादायान्तमालोक्य त्वरिता च जलाशनैः । ताम्बूलैर्व्यजनैश्चैव पादसंवाहनादिभिः । तथैव चाटुवचनैः खेदसंनोदनैः परैः । या प्रियं प्रीणयेत्प्रीत्या त्रिलोकी प्रीणिता तया ॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः । अमितस्य हि दातारं भर्तारं का न पूजयेत् । भर्ता देवो गुरुर्भर्ता धर्मस्तीर्थव्रतानि च । तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत् ॥ पितृवंश्या मातृवंश्या पतिवंश्याश्चयश्चयः । पतिव्र-

ताया: पुण्येन स्वर्गसौख्यानि भुञ्जते ॥ शीलभङ्गेन दुर्वृत्ता: पातयन्ति कुलत्रयम् । पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिता: ॥ पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद्भुवम् । तत्रेति भूमिर्मन्येत नात्र भारोऽस्ति पावनी ॥ बिभ्यत्पतिव्रतास्पर्शं कुरुते भानुमानपि । सोमो गन्धवहश्चापि स्वपावित्र्याय नान्यथा ॥ आप: पतिव्रतास्पर्शमभिलष्यन्ति सर्वदा । अद्य जाड्यविनाशो नो जातास्त्वद्व्यातिपावना: ॥ गृहे गृहे न किं नार्यो रूपलावण्यगर्विता: । परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता ॥ भार्या मूलं गृहस्थस्य भार्या मूलं सुखस्य च । भार्या धर्मफलावाप्त्यै भार्या संतानवृद्धये ॥ परलोकस्त्वयं लोको जीयते भार्यया द्वयम् । देवपित्र्यातिथीज्यादि नाभार्य: कर्म चार्हति ॥ गृहस्थ: स हि विज्ञेयो यस्य गेहे पतिव्रता । ग्रस्यतेऽन्य: प्रतिपदं राक्षस्या जरयाथ वा ॥ यथा गङ्गावगाहेन शरीरं पावनं भवेत् । तथा पतिव्रतादृष्ट्या शुभया पावनं भवेत् । न गङ्गायास्तया भेदो या नारी पतिदेवता । उमा शिवसमा साक्षात्तस्मात्तां पूजयेद्बुध: ।' इति । आदिपर्वण्यपिदुष्यन्तं प्रति

शकुन्तलावचनम्—'सा भार्या या गृहे दक्षा, सा भार्या या प्रजावती। सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः। भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः। पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै। यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ॥ संसरन्तमपि प्रेतं विषमेष्वेकपातिनम्। भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥ प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते। पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति' इति। भारते आपद्धर्मे कपोतीलुब्धकीये— 'मितं ददाति हि पिता मितं भ्राता मितं सुतः। अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ नास्ति भर्तृसमो नाथो नास्ति भर्तृसमं सुखम्। विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः ॥' तत्रैव कपोतवाक्यम्—'अथ वृक्षस्य शाखायां विहङ्गः ससुहृज्जनः। दीर्घकालोषितो राजंस्तत्र चित्रतनूरुहः ॥ तस्य कल्यगता

भार्या चरितुं नाभ्यवर्तत। किं नु तत्कारणं येन साद्यापि न निवर्तते ॥ अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने। तया विरहितं हीदं शून्यमद्य गृहं मम ॥ पुत्रपौत्रवधूभृत्यैराकीर्णमपि सर्वतः। भार्याहीनं गृहस्थस्य शून्यमेव गृहं भवेत् ॥ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। गृहं तु गृहिणीहीनमरण्यसदृशं मतम् ॥ न भुङ्क्ते मय्यभुक्ते या न स्नाते स्नाति सुव्रता। तिष्ठत्युपतिष्ठते न शेतेऽशायिते मयि ॥ हृष्टे भवति सा हृष्टा दुःखिते मयि दुःखिता। प्रोषिते दीनवदना क्रुद्धे च प्रियवादिनी ॥ पतिप्रिया पतिप्राणा पतिप्रियहिते रता। यस्य स्यात्तादृशी भार्या धन्यः स पुरुषो भुवि ॥ सा हि श्रान्तं क्षुधार्तं च जानीते मां तपस्विनी। अनुरक्ता स्थिरा चेह भक्ता स्निग्धा यशस्विनी ॥ वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद्गृहम्। प्रासादोऽपि तया हीनः कान्तारमिति निश्चयः ॥ धर्मार्थकामकालेषु भार्या पुंसः सहायिनी। तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ॥ नास्ति भा-

र्यासमं किंचिन्नरस्यार्त्तस्य भेषजम् । नास्ति भार्या-समो बन्धुर्नास्ति भार्यासमा गतिः ॥ नास्ति भार्या-समो लोके सहायो धर्मसंग्रहे । यस्य भार्या गृहे नास्ति साध्वी च प्रियवादिनी । अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्' इति । आनुशासनिके महेश्वरं प्रति उमा-वचनम्— 'स्त्रीधर्मः पूर्व एवायं विवाहे बन्धुभिः कृतः । सहधर्मचरी भर्तुर्भवत्यग्निसमीपतः ॥ सुखभावा सुवचना सुवृत्ता सुखदर्शना । अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी ॥ सा भवेद्धर्मपरमा सा भवेद्धर्मभागिनी । देववत्सततं साध्वी भर्तारं प्रतिपश्यती ॥ शुश्रूषां परिचर्यां च देवतुल्यं प्रकुर्वती । नान्यभावा ह्यविमनाः सुव्रता सु-खदर्शना ॥ या साध्वी नियताहारा सा भवेद्धर्मचारिणी । परुषाण्यपि चोक्ता या दृष्टा दुष्टेन चक्षुषा ॥ सुप्रसन्नमुखी भर्तुर्या नारी सा पतिव्रता । न चन्द्रसूर्यौ नतरं पुन्नाम्नो या निरीक्षते ॥ भर्तृपूज्य वरारोहा सा भवेद्धर्मभागिनी । दरिद्रं व्याधितं दीनमध्वना परिकर्शितम् ॥ पतिं पुत्रमि-वोपास्ते सा नारी धर्मभागिनी । न कामेषु न भोगेषु नै-

श्वर्ये न सुखे तथा। स्पृहा यस्या यथा पत्यौ सा नारी धर्म-भागिनी। या नारी प्रयता दक्षा या नारी पुत्रिणां भवेत्॥ पतिप्रिया पतिप्रीणा सा नारी धर्मभागिनी। अग्नि-कार्यपरा नित्यं सदा पुष्पबलिप्रदा॥ देवतातिथिभृत्यानां निर्वाप्य पतिना सह। शेषान्नमुपभुञ्जाना यथान्यायं यथाविधि॥ तुष्टपुष्टजना नित्यं नारी धर्मेण युज्यते। श्वश्रूश्वशुरयोः पादौ तोषयन्ती गुणान्विता॥ माता-पितृपरा नित्यं या नारी सा तपोधना। ब्राह्मणान्दुर्बला-नार्तान्दीनान्धकृपणांस्तथा॥ बिभर्त्यन्नेन या नारी सा पतिव्रतभागिनी। व्रतं चरति या नित्यं दुश्चरं लघु-सत्त्वया॥ पतिचित्ता पतिहिता सा पतिव्रतभागिनी॥ पुण्यमेतत्तपश्चैव स्वर्गश्चैव सनातनः। या नारी भर्तृपरमा भवेद्भर्तृव्रता सती॥ पतिर्हि देवो नारीणां पतिर्बन्धुः पतिर्गतिः। पत्या समा गतिर्नास्ति दैवतं वा यथा पतिः॥ पतिः प्रसादः स्वर्गे वा तुल्यो नार्या न वा भवेत्। यद्य-कार्यमधर्मं वा यदि वा प्राणनाशनम्। प्रातिब्रूयाद्दरिद्रो वा व्याधितो वा कथंचन॥ आपन्नो रिपुसंस्थो वा

ब्रह्मशापार्दितोऽपि वा । आपद्धर्ममनुप्रेक्ष्य तत्कार्यमविशङ्कया ॥ एष देव मया प्रोक्तः स्त्रीधर्मो वचनात्तव । या त्वेवंभाविनी नारी सा पतिव्रतभागिनी' इति । तत्रैव स्थलान्तरे युधिष्ठिरः—'सत्स्त्रीणां समुदाचारं सर्वं धर्मविदां वर। श्रोतुमिच्छाम्यहं त्वत्तस्तन्मे ब्रूहि पितामह' ॥ भीष्मः—'सर्वज्ञा सर्वतत्त्वज्ञा देवलोके मनस्विनी। कैकेयी सुमना नाम शाण्डिलीं पर्यपृच्छत। केन वृत्तेन कल्याणि समाचारेण केन वा॥ इमं लोकमनुप्राप्ता त्वं हि तत्त्वं वदस्व मे इति। पृष्टा सुमनया मधुरं चारुहासिनी। शाण्डिली निभृतं वाक्यं सुमनामिदमब्रवीत् ॥ नाहं काषायवसना नास्मि वल्कलधारिणी। न च मुण्डा न जटिला भूत्वा देवत्वमागता। अहितानि च वाक्यानि सर्वाणि परुषाणि च। अप्रमत्ता च भर्तारं कदाचिन्नाहमब्रुवम् ॥ देवतानां पितॄणां च ब्राह्मणानां च पूजने। अप्रमत्ता सदा युक्ता श्वश्रूश्वशुरवर्तिनी ॥ पैशुन्ये न प्रवर्तामि न ममैतन्मनोगतम् । पुनर्द्वारि न तिष्ठामि चिरं न कथयामि च ॥ असद्वा हसितं किंचिदहितं वापि

कर्मणा । रहस्यमरहस्यं वा न प्रवर्तामि सर्वथा ॥ कार्यार्थं निर्गतं चापि भर्तारं गृहमागतम् । आसनेनोपसंयोज्य पूजयामि समाहिता । यदन्नं नाभिजानाति यद्भोज्यं नाभिनन्दति ॥ भक्ष्यं वा यदि वा लेह्यं तत्सर्वं वर्जयाम्यहम् । कुटुम्बार्थं समानीतं यत्किंचित्कार्यमेव तु । प्रातरुत्थाय तत्सर्वं कारयामि करोमि च ॥ नोत्थापयामि भर्तारं सुखसुप्तमहं सदा । आतरेष्वपि कार्येषु तेन तुष्यति मे मनः । नायासयामि भर्तारं कुटुम्बार्थे च सर्वदा । गुप्तगुह्या सदा चास्मि सुसंमृष्टनिवेशना ॥ इमं धर्मपथं या हि पालयत्यखिलं सदा । अरुन्धतीव नारीणां स्वर्गलोके महीयते' । भीष्मः—'एतदाख्याय सादेवी सुमनायै तपस्विनी । पतिधर्मं महाभागा जगामादर्शनं तदा ॥' इति । वनपर्वणि सत्यभामां प्रति द्रौपदीवचनम्—'वर्तामि अहं तु यां वृत्तिं पाण्डवेषु महात्मसु । तां सर्वां शृणु मे सत्यां सत्यभामे यशस्विनि' ॥ अहंकारं विहायाहं कामक्रोधौ च सर्वदा । सादरा पाण्डवान्नित्यं प्रयतोपचराम्यहम् ॥ प्रणयं प्रतिसंहृत्य निधायात्मानमात्मनि । शुश्रूषु-

निरभीमाना पतीनां चित्तरक्षिणी । दुर्व्याहृताच्छङ्कमाना दुश्चित्तादुरवेक्षितात् ॥ दुरासितादुर्व्रजितादिङ्गिताध्यासितादपि । सूर्यवैश्वानरसमान्सोमकल्पान्महारथान् । सेवे चक्षुर्हणः पार्थानुग्रवीर्यप्रतापिनः ॥ देवो मनुष्यो गन्धर्वो युवा चापि स्वलंकृतः । द्रव्यवानभिरूपो वा न मेऽन्यः पुरुषो मतः ॥ नाभुक्तवति नास्नाते नासंविष्टे च भर्तरि । न संविशामि नाश्नामि सदा कर्मकरेष्वपि ॥ क्षेत्राद्वनाद्वा ग्रामाद्वा भर्तारं गृहमागतम् । अभ्युत्थायाभिनन्दामि आसनेनोदकेन च ॥ प्रमृष्टभाण्डा मृष्टान्नकाले भोजनदायिनी । संयता गुप्तधान्या च सुसंमृष्टा निवेशना । अतिरस्कृतसंभाषा दुःस्त्रियो नानुसेवती । अनुकूलवती नित्यं भवाम्यनलसा सदा । अनर्म चापि हसितं द्वारस्थानमभीक्ष्णशः ॥ अवस्करे चिरं स्थानं निष्कुटेषु च वर्जयेत् । निरताहं सदा सत्ये भर्तृणामुपसेवने ॥ सर्वथा भर्तृरहितं न ममेष्टं कथंचन । यदा प्रवसते भर्ता कुटुम्बार्थं न केनचित् । सुमनोवर्णकापेता भवामि व्रतचारिणी ॥ यच्च भर्ता न पिबति यच्च भर्ता न खा-

दति। यच्च नाश्नाति मे भर्ता सर्वं तद्भूर्जयाम्यहम्॥
यथोपदेशं नियता वर्तमाना वराङ्गने। स्वलंकृता सुप्रयता भर्तुः प्रियहिते रता॥ ये च धर्माः कुटुम्बेषु श्वश्वा मे कथिताः पुरा। भिक्षा बलिः श्राद्धमिति स्थालीपाकाश्च पर्वसु॥ मान्यानां मानसत्कारा ये चान्ये विदिता मम। तान्सर्वाननुवर्तामि दिवारात्रमतन्द्रिता॥ विनयान्नियमाच्चैव सर्वात्मानं सदाश्रिता। मृदून्सतः सत्यशीलान्सत्यधर्मानुपालिनः। आशीविषानिव क्रुद्धान्पतीन्परिचराम्यहम्। पत्याश्रयो हि मे धर्मो मतः स्त्रीणां सनातनः॥ स देवः सा गतिर्नान्या तस्य का विप्रियं चरेत्। अहं पतिं नातिशये नात्यश्ने नातिभूषये। नापि परिवदे श्वश्रूं सर्वदा परियन्त्रिता। अवधानेन सुभगे नित्योत्थिता तथैव च॥ भर्तारो वशगा मह्यं गुरुशुश्रूषयैव च। नित्यमार्यामहं कुन्तीं वीरसूं सत्यवादिनीम्। स्वयं परिचराम्येतां पानाच्छादनभोजनैः। नैतामतिशये जातु वस्त्रभूषणभोजनैः॥ नाहं परिवदे वादं तां पृथां पृथिवीसमाम्। अष्टावग्रे ब्राह्म-

णानां सहस्राणि स्म नित्यदा। भुञ्जते रुक्मपात्रीषु युधिष्ठिरनिवेशने ॥ अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः। त्रिंशद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः ॥ दशान्यानि सहस्राणि येषामन्नं सुसंस्कृतम्। क्रियते रुक्मपात्रीभिर्यतीनामूर्ध्वरेतसाम्॥ तान्सर्वानग्रहारेण ब्राह्मणान्वेदवादिनः। यथार्हं पूजयामि स्म पानाच्छादनभोजनैः ॥ शतं दासीसहस्राणि कौन्तेयस्य महात्मनः। कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलंकृताः ॥ महार्हमाल्याभरणाः सुवर्णाश्चन्दनोक्षिताः । मणीन्हेम च बिभ्रत्यो नृत्तगीतविशारदाः। तासां नाम च रूपं च भोजनाच्छादनानि च । सर्वासामेव वेदाहं कर्म चैव कृताकृतम्। शतं दासीसहस्राणि दश नागायुतानि च। युधिष्ठिरस्यानुयात्रमिन्द्रप्रस्थनिवासिनः ॥ एवमासीत्तदा राज्ञो यन्महीं पर्यपालयन्। येषां संख्याविधिं चैव प्रदिशामि शृणोमि च। अन्तःपुराणां सर्वेषां भृत्यानां चैव सर्वशः ॥ आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम्। सर्वं राज्ञः समुदयमायं च व्ययमेव च ॥ एकाहं वेद्मि

कल्याणि पाण्डवानां यशस्विनी। मयि सर्वे समासज्य कुटुम्बं भरतर्षभाः॥ उपासनरताः सर्वे घटन्ति स्म वरानने। तमहं भारमासक्तमनाधृष्यं दुरात्मभिः॥ सुखं सर्वे परित्यज्य राज्यहानि घटामि वै। अधृष्यं करुणस्येव निधिपूर्णमिवोदधिम्॥ एकाहं वेद्मि कोशं वै पतीनां धर्मचारिणाम्। अनिशायां निशायां च सहाया क्षुत्पिपासयोः॥ आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे। प्रथमं प्रतिबुध्यामि चरमं संविशामि च॥ नित्यकालमहं सत्ये एतत्संवननं मम। एतज्ज्ञानाम्यहं कर्तुं भर्तृसंवननं महत्॥ असत्स्त्रीणां 'समाचारं नाहं कुर्यां न कामये'। वैशम्पायनः— 'तच्छ्रुत्वा धर्मसहितं व्याहृतं कृष्णया तदा। उवाच सत्या सत्कृत्य पाञ्चालीं धर्मचारिणीम्॥ अभिपन्नास्मि पाञ्चालि याज्ञसेनि क्षमस्व मे। कामकारः सखीनां हि सोपहासं प्रभाषितम्'॥ द्रौपद्युवाच— 'इदं तु ते मार्गमपेतमोहं वक्ष्यामि चित्तग्रहणाय भर्तुः। अस्मिन्यथावत्सखिवर्तमाना भर्तारमाच्छेत्स्यसि कामिनीभ्यः॥ नैतादृशं दैवतमस्ति सत्ये सर्वेषु लोकेषु

सदैवकेषु । यथा पतिस्तुष्यति सर्वकामा लभ्याः प्रमादात्कुपितश्च हन्यात् । तस्मादपथ्यं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि । वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्त्तिः ॥ सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि । सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च ॥ तथासनैश्चारुभिरग्र्यमाल्यैर्दाक्षिण्ययोगैर्विविधैश्च गन्धैः । अस्याः प्रियोऽस्मीति यथा विदित्वा त्वामेव संश्लिष्यति तद्विधत्स्व ॥ श्रुत्वा स्वरं द्वारगतस्य भर्तुः प्रत्युत्थिता तिष्ठ गृहस्य मध्ये । दृष्ट्वा प्रविष्टं त्वरितासनेन पाद्येन चैनं प्रतिपूजयस्व ॥ संप्रेषितायामथ चैव दास्यामुत्थाय सर्वं स्वयमेव कार्यम् । जानातु कृष्णस्तव भावमेतं सर्वात्मना मां भजतीति सत्ये ॥ त्वत्संनिधौ यत्कथयेत्पतिस्ते यद्यप्यगुह्यं परिरक्षितव्यम् । कच्चित्सपत्नी तव वासुदेवं प्रत्यादिशेत्ते न भवेद्विरागः ॥ प्रियांश्च रक्तांश्च हितांश्च भर्तुस्तान्भोजयेथा विविधैरुपायैः । द्वेष्यैरपक्षैरहितैश्च तस्य भिद्यस्व नित्यं कुहको-

द्यतैश्च ॥ मद्यं प्रमादं पुरुषेषु हित्वा संयच्छ भावं प्रतिगृह्य मौनम् । प्रद्युम्नसाम्बावपि ते कुमारौ नोपासितव्यौ रहिते कदाचित् ॥ महाकुलीनाभिरपापिकाभिः स्त्रीभिः सतीभिस्तव सख्यमस्तु । चण्डाश्च शौण्डाश्च महाशनाश्च चौराश्च दुष्टाश्चपलाश्च वर्ज्याः ॥ एतद्यशस्यं भगदैवतं च स्वर्ग्यं तथा शत्रुनिबर्हणं च । महार्हमाल्याभरणाङ्गरागा भर्तारमाराधय पुण्यगन्धा' इति । पतिशुश्रूषणादिकमेव परमो धर्मः । ताश्च भर्त्रा भरणीयाः सत्कार्याश्च इति सिद्धम् ॥

मां च पञ्चत्वमापन्नं रामं च वनमाश्रितम् ।
कृपणा बत वैदेही जीवितं परिहास्यति ॥

सा नूनं विधवा राज्यं सपुत्रा कारयिष्यसि ।
न हि प्रव्राजिते रामे देवि जीवितुमुत्सहे ॥

सतीं त्वामहमत्यन्तं व्यवस्याम्यसतीं सतीम् ।
रूपिणीं विषसंयुक्तां पीत्वेव मदिरां नरः ॥

अनृतैर्बत मां सान्त्वैः सान्त्वयन्ती स्म भाषसे ।
गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ॥

चिरं खलु मया पापे त्वं पापेनाभिरक्षिता ।
अज्ञानादुपसंपन्ना रज्जुरुद्बन्धिनी यथा ॥

रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये ।
बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ॥

कौसल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह ।
प्रक्षिप्य नरके सार्धं कैकेयि सुखिता भव ॥

प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥

हन्तानार्ये ममामित्रे सकामा भव कैकयि ।
मृते मयि गते रामे विधवा कारयिष्यसि ॥

धिगस्तु योषितो नाम शठाः स्वार्थपराः सदा ।
न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरम् ॥

अनर्थभावेऽर्थपरे नृशंसे
ममानुतापाय निविष्टभावे ।

विनाशकामामहितामिमित्रा-
मावासयन्मृत्युमिवात्मनस्त्वा ॥

चिरं बताङ्केन धृतासि सर्पो
महाविषा तेन हतोऽस्मि मोहात् ।
नृशंसवृत्ते व्यसनप्रहारिणि
प्रसह्य वाक्यं यदिहाद्य भाषसे ॥

न नाम ते केन मुखात्पतत्यधो
विशीर्यमाणा रसना सहस्रधा ।
स भूमिपालो विलपन्ननाथव-
त्स्त्रिया गृहीतो हृदयेऽतिमात्रया ॥

पपात देव्याश्चरणौ प्रसारिता-
वुभावसंस्पृश्य यथातुरस्तथा ।

त्रयोदशे— एवं सकरुणं विलप्य पादप्रणामपूर्वकमभिहितापि

अनर्थरूपासिद्धार्था ह्यभीता भयदर्शनी ।
पुनराकारयामास तमेव वरमङ्गना ॥

त्वं कथ्यसे महाराज सत्यवादी दृढव्रतः ।
मम चैह वरं कस्माद्विदारयितुमिच्छसि ॥
एवमुक्तो दशरथः पुनस्तामाह—
साधुवृत्तस्य दीनस्य त्वद्व्रतस्य गतायुषः ।
प्रसादः क्रियतां देवि मम राज्ञो विशेषतः ॥
इति ।

विशुद्धभावस्य सदुष्टभावा
ताम्रेक्षणस्याश्रुकलस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं विलापं
भर्तृर्नृशंसा न चकार वाक्यम् ॥

अत्र दशरथोक्तबहुविधसान्त्ववचनमनादृत्य परुषतरं ब्रुवाः कैकेय्या अतिदुष्टत्वावगमेन स्वभावतः स्त्रियोऽतिदुष्टा दुश्चरित्राश्च; अतस्तासु विश्वासो न कर्तव्य इति सूचितम् । तथा चान्यैव सीतां प्रति कौसल्यावचनम्—

असत्यः सर्वलोकेऽस्मिन्सततं सत्कृताः प्रियैः ।
भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः ॥

एष स्वभावो नारीणामनुभूय पुरा सुखम् ।
अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥

असत्यः शीलविकृता दुर्ग्राह्यहृदयाः सदा ।
युवत्यः पापसंकल्पाः क्षणमात्राद्विरागिणः ॥

न कुलं न कृतं विद्यां न दत्तं नापि संग्रहम् ।
स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥

तथैव दशरथवाक्यम्—

धिगस्तु योषितो नाम शठाः स्वार्थपराः सदा ।
न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरम् ॥

अत्रैवानसूयावचनम्—

कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ।
प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि ॥
अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥

तथा चारण्यकाण्डेऽगस्त्यवचनम्—

एषा हि प्रकृतिः स्त्रीणामा सृष्टे रघुनन्दन ।
समस्थमनुरुन्धन्ति विषमस्थं त्यजन्ति च ॥
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥

इति । तथा च मनुः—'पुंश्चल्यश्चलचित्ताश्च निःस्नेहाश्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥ शय्यासनमलंकारं कामं क्रोधमनार्यताम् । द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत्' । संवर्तोऽपि—'प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः । जलूकावत्स्त्रियः सर्वा भूषणाच्छादनासनैः ॥ सुपूजिताः सुखाद्वापि पुरुषं ह्यपकर्षति । जलूका रक्तमादत्ते केवलं सा तपस्विनः ॥ इतरा तु धनं चित्तं मांसं वीर्यं तथा बलम्' इति । आनुशासनिके अष्टावक्रसंवादे—'नैता जानन्ति पितरं न कुलं न च मातरम् । न भ्रातॄन्न च भर्तारं न च पुत्रान्न देवरान् ॥ लीलावत्यः कुलं घ्नन्ति कूलानीव सरिद्वरा' इति । आनुशासनिके नारदं प्रति पञ्चचूडावाक्यम्—'कुलीना रूपवत्यश्च नाथवत्यश्च योषितः । मर्यादासु न

तिष्ठन्ति स दोषः स्त्रीषु नारद । न स्त्रीभ्यः किंचिदन्यद्वै पापीयस्तरमस्ति वै ॥ स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ ह । समाज्ञातानृद्धिमतः पतिरूपान्वशे स्थितान् ॥ पतीनन्तरमासाद्य नालं नार्यः प्रतीक्षितुम् । असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो ॥ पापीयसो नरान्यद्वै लज्जां त्यक्त्वा भजामहे । स्त्रियं हि यः प्रार्थयते संनिकर्षं च गच्छति । ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च । मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ नासां कश्चिदगम्योऽस्ति नासां वयसि निश्चयः । विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन । न ज्ञातिकुलसंबद्धात्स्त्रियस्तिष्ठन्ति भर्तृषु ॥ यौवने वर्तमानानां मृष्टाभरणवाससाम् । नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः । याश्च शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः । अपि ताः संप्रसज्जन्ते कुब्जान्धजडवामनैः ॥ पङ्कुष्वथ च देवर्षे ये चान्ये कुत्सिता नराः । स्त्रीणाम-

गम्यो लोकेऽस्मिन्नास्ति कश्चिन्महामुने ॥ यदि पुंसां गतिर्ब्रह्मन्कथंचिन्नोपपद्यते । अप्यन्योन्यं प्रवर्तन्ते न हि तिष्ठन्ति भर्तृषु ॥ अलाभात्पुरुषाणां हि भयात्परिजनस्य च। वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः ॥ चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा । प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः ॥ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः । नान्तकः सर्वभूतानां न पुंसा वामलोचनाः ॥ इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम्। दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियाः ॥ कामानामपि दातारं कर्तारं मनसां प्रियम् । रक्षितारं न मृष्यन्ति स्वभर्तारमलं स्त्रियः ॥ न कामभोगान्विपुलान्नालंकारान्न संप्रयान् । तथैव बहु मन्यन्ते यथा रत्नामनुग्रहम् ॥ अन्तकः पवनो मृत्युः पातालं बडवामुखम् । क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥ यतश्च भूतानि महान्ति पञ्च यतश्च लोका विहिता विधात्रा । यतः पुमांसः प्रमदाश्च निर्मितास्तदैव दोषाः प्रमदासु नारद' इति । तत्रैव

भीष्मं प्रति धर्मराजप्रश्नः— 'एता हि रममाणास्तु वञ्चयन्तीह मानवान् । न चासां मुच्यते कश्चित्पुरुषो हस्तमागतः । गावो नवतृणानीव गृह्णन्त्येता नवं नवम् ॥ शम्बरस्य च या माया या माया नमुचेरपि । बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ॥ अप्रियं प्रियवाक्यैश्च गृह्णते कालयोगतः ॥ उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः । स्त्रीबुद्धया न विशिष्येते तास्तु रक्ष्याः कथं नरैः ॥ अनृतं सत्यमित्याहुः सत्यं चाप्यनृतं तथा । इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ॥ स्त्रीणां बुद्ध्यर्थनिष्कर्षादर्थाः शास्त्राणि शत्रुहन् । बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै ॥ संपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु । अपास्ताश्च तथा राजन्विकुर्वन्ति मनः स्त्रियः ॥ इमाः प्रजा महाबाहो धार्मिक्य इति नः श्रुतम् । सत्कृता असत्कृताश्चापि विकुर्वन्ति मनः सदा ॥ यदि जिह्वासहस्रं स्याज्जीवेच्च शरदां शतम् । अनन्यकर्मा स्त्री दोषाननुक्त्वा निधनं व्रजेत् ॥ मानवानां प्रमोहार्थं कृत्या

नार्योऽसृजत्प्रभुः। ताभ्यः कामान्यथाकामं प्रादाद्धि प्रपितामहः ॥ क्रोधं कामस्य देवेश साहाय्यं चासृजत्प्रभुः। न च स्त्रीणां क्रिया काचिदिति धर्मो व्यवस्थितः ॥ निरिन्द्रिया ह्यशास्त्राश्च स्त्रियोऽनृतमिति श्रुतिः' इति। एवमुक्तप्रकारेण स्त्रियः स्वाभावतोऽतिदुष्टाः; तस्मान्न विश्वसनीया इति।

यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः।
तं त्यजामि स्वयं वापि तव पुत्रं सह त्वया ॥

अनेन च दुष्टचरित्रा स्त्री परित्याज्येति सूचितं भवति। तथा च माधवीये पुराणवचनम्—'धर्मविघ्नकरीं भार्यामसतीं चातिकोपनाम्। त्यजेद्धर्मस्य रक्षार्थं सदैवाप्रियवादिनीम्' इति। ननु उदाहृतवचनावगतपरित्यागहेतूनां चतुर्णां मध्ये एकस्याप्यभावात्कैकेयीपरित्यागो नोपपद्यते। तथा हि—न तावद्धर्मविघ्नकरीत्वात्परित्यागः संभवति, पूर्वं भर्तृदत्तवरद्वयमात्रप्रार्थनेन धर्मविघातस्यानाचरणात्। नाप्यसतीति च परित्यागः, 'असती कुल-

टेत्वरी' इति नैघण्टुकव्यवहारात् व्यभिचारिण्या एवासतीत्वेन कैकेय्यां तत्प्रसक्त्यभावात्। नापि कोपनेति च, द्रौपद्या अपि भर्तृषु बहुकोपकरणेन तस्या अपि परित्यागापत्तेः। तथा हि भारते विराटपर्वणि— 'अभ्यभाषत पाञ्चाली भीमसेनमनिन्दिता। उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन मृतो यथा॥ नामृतस्य हि पापीयान्भार्यामालभ्य जीवति। भ्रातरं च विगर्हस्व ज्येष्ठं दुर्द्यूतदेविनम्॥ यस्यास्मि कर्मणा प्राप्ता दुःखमेतदनन्तकम्' इति। नाप्यप्रियवादित्वात्त्यागः, सीताकौसल्यादीनां भर्तरि अप्रियवचनसत्त्वेऽपि परित्यागादर्शनात्। तथा हि अत्रैव रामं प्रति सीतावाक्यम्—

किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम्॥
अनृतं बत लोकोऽयमज्ञानाद्यद्धि वक्ष्यति।
तेजो नास्ति परं रामे तपतीव दिवाकरे॥
स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम्।
शैलूष इव मां राम परेभ्यो दातुमिच्छसि॥

इति। तत्रैव दशरथं प्रति कौसल्यावाक्यम्

हतं त्वया राज्यमिदं सराष्ट्रं
हतस्तथात्मा सह मन्त्रिभिश्च।
हता सपुत्रास्मि हताश्च पौराः
सुतश्च भार्या च तव प्रदुष्टा॥

इति। तस्मात्परित्यागहेतुभूतदोषचतुष्टयाभावात् 'अदुष्टां विनतां भार्यां यौवने यः परित्यजेत्। सप्तजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः' इति भार्यापरित्यागे दोषश्रवणाच्च कैकेयीपरित्यागो नोपपद्यते; न च कैकेय्या दुष्टत्वादिकमसिद्धमिति वाच्यम्,

न हि किंचिदयुक्तं वा विप्रियं वा पुरा मम।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधाम्यहम्॥

इत्यादि दशरथवचनेन अदुष्टात्वविनतात्वयोः

स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम्।
अपापः पापसंकल्पां ददर्श धरणीतले॥

इत्यनेन यौवनस्थाप्यवगमात् । न च

यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः ।
तं त्यजामि स्वयं चापि तव पुत्रं सह त्वया ॥

इति वचनं रामप्रव्राजनरूपवरयाचनविरमणार्थबिभीषिकापरमेव न परित्यागपरमिति वाच्यम् । रामप्रव्राजनप्राक्कालीनस्य 'यस्ते मन्त्रकृतः पाणिः' इति वचनस्य बिभीषिकार्थत्वेऽपि रामप्रव्राजनसमनन्तरम्

कैकेयि मा ममाङ्गानि प्राक्षीस्त्वं दुष्टचारिणी ।
न हि त्वां द्रष्टुमिच्छामि न भार्या न च बान्धवी ॥

ये च त्वामुपजीवन्ति नाहं तेषां न ते मम ।
केवलार्थपरां हि त्वां त्यक्त्वाधर्मां त्यजाम्यहम् ॥

अगृह्णां यच्च ते पाणिमग्निपर्ययणं च यत् ।
अनुजानामि तत्सर्वमस्मिँल्लोके परत्र च ॥

भरतश्चेत्प्रतीतः स्याद्राज्यं प्राप्येदमव्ययम् ।
यन्मे दद्यात्स तृप्त्यर्थं मा तद्दत्तमन्वगात् ॥

इत्यादिदशरथसमुदीरितवचनानां सिद्धे प्रयोजने, बिभीषिकायाः प्रयोजनाभावेन तादर्थ्यानुपपत्तेः । किं च युद्धकाण्डे रावणवधसमनन्तरम्

कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च ।
सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया ।
स शापः केकयीं घोरः सपुत्रां न स्पृशेत्प्रभो ॥

इति स्वसंदर्शनार्थमागतं दशरथं प्रति रामकृतप्रार्थनानुपपत्तेश्च । तस्मादुत्तरवाक्यपर्यालोचनया पूर्ववाक्यस्यापि बिभीषिकार्थत्वानुपपत्त्या परित्यागपरत्वमेव स्वीकर्तव्यम् । तच्च नोपपद्यते, परित्यागनिमित्तहेतुचतुष्टयाभावस्य पूर्वमेवोक्तत्वात् । अत्रोच्यते— पूर्वोक्तहेतूनां सत्त्वादेव परित्यागः संभवत्येव । तथा हि—

इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ।
स राघवाणां कुलधर्ममात्मनः
सनातनं नाद्य विहातुमर्हसि ॥

इति रामं प्रति वसिष्ठवचनावगतकुलपरंपरागतं ज्येष्ठ

पुत्रं राज्याभिषेकरूपधर्मविघाताचरणेन सगरः असमञ्जसमिव दशरथो रामभद्रं वने वासयत्विति वदन्तीं कैकेयीं प्रति

अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ।
निर्दहेदपि शक्रस्य द्युतिं धर्मनिरोधनात् ॥

इति महामात्रवचनात् अदुष्टस्य धार्मिकस्य रामस्य वनप्रेषणे धर्मनिरोधावगमेन च धर्मविघातकत्वसंभवात् । यदुक्तं वरद्वयाचरणमपि धर्म इति तत्रोच्यते— स्वमुख्यधर्माविरोधेनैव वरद्वयनिर्वाहसंभवे तद्बाधनस्यान्याय्यत्वात्, पत्यनुकूलाचरणस्यैव मुख्यधर्मत्वात् । तथा च भारते आपद्धर्मे लुब्धककपोतीये कपोतीवाक्यम्— 'न सा स्त्रीत्यभिमन्तव्या यस्यां भर्ता न तुष्यति । तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ अग्निसाक्षिकमित्येव भर्ता वै दैवतं परम् । दावाग्निनेव निर्दग्धा सपुष्पस्तबका लता ॥ भस्मीभवतु सा नारी यस्यां भर्ता न तुष्यति । विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः । न कार्यमिह मे नाथ जीवितेन त्वया विना ॥ मितं ददाति हि पिता

मित्रं भ्राता मितं सुतः । अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ नास्ति भर्तृसमो नाथो नास्ति भर्तृसमं सुखम् । विसृज्य धनसर्वस्वं भर्ता वै शरणं स्त्रियाः ॥ तत्रैव 'परुषाण्यपि चोक्ताया दृष्टा दुष्टेन चक्षुषा । सुप्रसन्नमुखी भर्तुर्या नारी सा पतिव्रता ॥ न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा । स्पृहा यस्या यथा पत्यौ सा नारी धर्मभागिनी ॥ पतिचित्ता पतिहिता सा पतिव्रतभागिनी । पतिप्रसादात्स्वर्गो वा तुल्यो नार्या न वा भवेत् ॥ यद्यकार्यमधर्मं वा यदि वा प्राणनाशनम् । प्रतिब्रूयाद्दरिद्रो वा व्याधितो वा कथंचन ॥ आपन्नो रिपुसंस्थो वा ब्रह्मशापार्दितोऽपि वा । आपद्धर्माननुप्रेक्ष्य तत्कार्यमविशङ्कया' इति । रागद्वेषादिना पत्यनुकूलाकरणे दोषः श्रूयते भारते— कामाद्द्वेषान्मत्सराद्वा भर्तारं यावमन्यते । सा सप्तजन्मकं यावन्नारकी स्यान्न संशयः ॥ जीवितेनापि नारी न भर्तारं वञ्चयेत्तथा । क्रिमियोनिशतं गत्वा पुल्कसी जायते ततः ॥ दरिद्रं व्याधितं मूर्खं भर्तारं यावमन्यते । सा मृता जायते स्त्री तु सूकरी च

पुनः पुनः' इति । बोधायनोऽपि— 'भर्तृहिते यतमानाः स्वर्गलोकं जयेरन् व्यतिक्रमे कृच्छ्रे' इति । तस्माद्धर्मविघ्नकरीत्वमस्ति । तथा—

**सतीं त्वामहमत्यन्तं व्यवस्याम्यसतीं सतीम् ।**

इति दशरथवचनेनैव असतीत्वमपि । न च 'असती कुलटेत्वरी' इति नैघण्टुकव्यवहारात् व्यभिचारिणीपर एव असतीशब्द इति वाच्यम्, भर्तुराज्ञया परपुरुषसंगतानां कुन्त्योघवत्यादीनां असतीत्वं नास्तीति प्रागेवाभिहितत्वात् । भर्तृत्वं च नोपरोधादिना परपुरुषसंगता असतीति वक्तव्यम् । एवं च नाद्याभावे तदाज्ञया करणे असतीत्वं नास्ति । उपरोधवञ्चनादिसत्त्वे असतीत्वमित्यन्वयव्यतिरेकाभ्यां भर्तुरुपरोधवञ्चनादिकमेवासतीत्वे नियामकम् । तथा च वनपर्वणि सत्यभामाद्रौपदीसंवादे— 'अथाब्रवीत्सत्यभामा कृष्णस्य महिषी प्रिया । साम्राजिती याज्ञसेनीं रहस्रीदं सुमध्यमा ॥ केन द्रौपदि वृत्तेन पाण्डवानधितिष्ठसि । लोकपालोपमान्वीरान्यूनः परमसंहतान् ॥ कथं च वशगास्तुभ्यं

न कुप्यन्ति च ते शुभे। तव वश्याश्च सततं पाण्डवाः प्रियदर्शने॥ सुखप्रेक्षाश्च ते सर्वे तत्त्वमेतद्ब्रवीहि मे। व्रतचर्या तपो वास्ति स्नानमन्त्रौषधानि वा। विद्यावीर्यं मूलवीर्यं जपहोमागदास्तथा॥ ममाद्याचक्ष्व पाञ्चालि यशस्यं भगदैवतम्। येन कृष्णे भवेन्नित्यं मम कृष्णो वशानुगः॥ एवमुक्त्वा सत्यभामा विरराम यशस्विनी। पतिव्रता महाभागा द्रौपदी प्रत्युवाच ताम्॥ असत्स्त्रीणां समाचारं सत्ये मामनुपृच्छसि। असदाचरिते मार्गे कथं स्यादनुकीर्तनम्॥ अनुप्रभः संशयो वा नैतत्त्वय्युपपद्यते। तथा ह्युपेता बुद्धया त्वं कृष्णस्य महिषी प्रिया॥ यदैव भर्ता जानीयान्मन्त्रमूलपरां स्त्रियम्। उद्विजेत तदैवास्याः सर्पाद्वेश्मगतादिव॥ उद्विग्नस्य कुतः शान्तिरशान्तस्य कुतः सुखम्। न जातु वशगो भर्ता स्त्रियाः स्यान्मन्त्रकर्मणा। अमित्रप्रहितांश्चापि गदान्परमदारुणान्। मूलप्रचारैर्हि विषं प्रयच्छन्ति जिघांसवः॥ जिह्वया यानि पुरुषस्त्वचा वाप्युपसेवते। तत्र चूर्णानि दत्तानि हन्युः क्षिप्रमसंशयम्॥ जलोदरसमायुक्ताः श्वि-

त्रिणः पतितास्तथा । अपुमांसः कृताः स्त्रीभिर्जडान्धबधिरास्तथा ॥ पापानुगास्तु पापास्ताः पतीनुपसृजन्त्युत' इति । तस्माद्भर्तृनिर्बन्धनादिरूपासन्मार्गप्रवृत्त्या असतीत्वमप्यस्ति । अत एव राजर्षिर्दशरथः असतीत्युक्तवान् । तथा

क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीम् ।
मम तां मातरं विद्धि नृशंसां पापनिश्चयाम् ॥

इति भरद्वाजं प्रति भरतवचनेन क्रोपनात्वमप्यस्ति । न च द्रौपद्यादिष्वपि कोपो दृश्यते इत्युक्तमेवेति वाच्यम्, द्रौपदीकृतकोपस्य कुलसंरक्षणाभिप्रायकत्वेन भर्त्रनिष्टपर्यवसायित्वाभावात् । अनिष्टपर्यवसितस्यैव कोपस्य परित्यागे हेतुत्वात्; अन्यथा प्रणयकोपस्य सर्वास्वपि संभवेन सर्वासां परित्यागापत्तेः । कुलसंरक्षणाभिप्रायकत्वे च विराटपर्वणि भीमं प्रति द्रौपदी— 'आर्तयैतन्मया भीम कृतं बाष्पप्रमोचनम् । अपारयन्त्या दुःखानि न राजानमुपालभे ॥ तद्धर्मे यतमानानां महान्धर्मो न शिष्यति । समयं रक्ष्यमाणायाः प्रजा भवति रक्षिता ॥

प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः ॥ किमुक्तेन व्यतीतेन भीमसेन महाबल। उपस्थितस्य कालस्य कार्यस्यानन्तरो भव' इति। तस्मात्परित्यागहेतुभूतकोपनात्वमप्यस्ति। तथा—

सत्यं धर्मं परित्यज्य रामं राज्येऽभिषिच्य च।
सह कौसल्यया नित्यं रन्तुमिच्छसि दुर्मते ॥

अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥

इत्यादिना अप्रियवादित्वमपि अस्याः स्पष्टम्। सीताकौसल्यादीनामप्रियवचनं तु भर्तुरनिष्टपर्यवसन्नं न भवत्येव। तथा हि— 'शैलूष इव मां राम' इति सीतावचनम्। त्वद्विनाकृतायाः मम अतिदुष्टकैकेयीसमीपे अवस्थानं पातिव्रत्यभङ्गकरमतिक्लेशकरं च। अतः अनन्यगतिकामवश्यसंरक्षणीयां मामपि गृहीत्वा सहैव वनं प्रविशेत्येवं धर्मसंरक्षणपरमेव। एवं पुत्रवियोगमसहमानायाः कौसल्यायाः शोकपारवश्यादुदीरितं हतं

त्वया राज्यमित्यादि वचनमपि न भर्तुरनिष्टापादकम्। अत एव च उत्तरत्र भर्तृनिन्दाजनितानुतापया कौसल्यया भर्तृप्रसादनं कृतम्॥ तथा हि—

प्रसीद शिरसा याचे भूमौ निपतितास्मि ते।
याचितास्मि त्वया देव क्षन्तव्याहं न हि त्वया॥

नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता।
उभयोर्लोकयोर्वीर प्रत्ययात्संप्रसाद्यते॥

जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनम्।
पुत्रशोकार्तया तत्तु मया किमपि भाषितम्॥

इति। इयं तु कैकेयी सप्रणामं सकरुणं भर्त्रा प्रसादितापि परुषभाषणपूर्वकमहितमेव कृतवतीति। तस्य वचनं भर्तुः पुत्रस्य कुलस्य धर्मस्य चानिष्टपर्यवसाय्येव। तथा च दशरथवाक्यम्—

एतद्वचो नेच्छसि पापवृत्ते
हितं न जानासि ममात्मनो वा।

आस्थाय मार्गं कृपणं कुचेष्टा
चेष्टा हि ते साधुपथादपेता ॥

इति । वसिष्ठवाक्यमपि—

अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपांसनि ।
वञ्चयित्वा तु राजानं न प्रमाणेऽवतिष्ठसे ॥

यद्यपि त्वं क्षितितलाद्भगनं चोत्पतिष्यसि ।
पितृवंशचरित्रज्ञः सोऽन्यथा न करिष्यति ॥
तत्त्वया पुत्रगर्द्धिन्या पुत्रस्य कृतमप्रियम् ।

इति । सुमन्त्रवाक्यम्—

यस्यास्तव पतिस्त्यक्तो राजा दशरथः स्वयम् ।
न ह्यकार्यतमं किंचित्तव देवीह विद्यते ॥

पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चान्ततः ।
मावमंस्था दशरथं भर्तारं वरदं प्रियम् ॥

भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते ।
यथावयो हि राज्यानि प्राप्नुवन्ति नृपक्षये ।

इक्ष्वाकुकुलनाथेऽस्मिंस्तल्लोपयितुमिच्छसि ॥
मा त्वं प्रोत्साहिता पापैर्देवराजसमप्रभम् ।
भर्तारं लोकभर्तारमसद्धर्ममुपारुधः ॥

इति । एवं च पूर्वोदाहृतैकैकनिमित्तमात्रेण परित्यागस्यावश्यकर्तव्यत्वे निमित्तचतुष्टयसत्त्वे परित्यागो युक्त एव । किं च— 'परित्याज्या त्वया भार्या भर्तृवचनलङ्घनी । तत्र दोषो न चास्तीति त्वं हि वेत्थ यथातथम् ॥ सर्वलक्षणयुक्तापि या तु भर्तृव्यतिक्रमम् । करोति सा परित्याज्या एष धर्मः सनातनः ॥ इति ब्राह्मपुराणवचनपर्यालोचनयापि भर्तृवचनोल्लङ्घनी इयं परित्याज्यैव । यच्चोक्तमदुष्टत्वादिगुणविशिष्टायाः परित्यागे दोषश्रवणादिति तन्नोपपद्यते । रामप्रव्राजनप्राक्कालीनचर्यया कैकेय्याः दुष्टत्वाद्यपरिस्फूर्तावपि समनन्तरचर्यया दुष्टत्वौद्धत्यादीनां स्फुटत्वात्; अत एव पूर्वोदाहृतवचने पुरा मम इत्युक्तम् । तस्मादशरथसमुदीरितकैकेयीपरित्यागवचनं युक्तमेव । चतुर्दशप्रभृति आसप्तदशपर्यन्तम्— ततः कैकेयी पुत्रशोकार्दितं राजानमेवमवदत्—

आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः ।
सत्यमाश्रित्य हि मया त्वं च धर्मे नियोजितः ॥

संश्रुत्य शैव्यः श्येनाय स्वां तनुं जगतीपतिः ।
प्रदाय पक्षिणे राजञ्जगाम गतिमुत्तमाम् ॥

तथा ह्यलर्कस्तेजस्वी ब्राह्मणे वेदपारगे ।
याचमाने स्वके नेत्रे उद्धृत्य सुमना ददौ ॥

सरितां तु पतिः स्वल्पां मर्यादां सत्यमन्वितः ।
सत्यानुरोधात्समये वेलां स्वां नातिवर्तते ॥

सत्यमेकं परं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।
सत्यमेवाक्षया वेदाः सत्येनैवाप्यते परम् ॥
सत्यं समनुवर्तस्व यदि धर्मे धृता मतिः ।
अत्र

आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः ॥

इत्यादि कैकेयीवचनेन सर्वधर्मापेक्षया सत्यमेव परमो धर्म इति सूचितम् । तथा च तैत्तरीयश्रुतिः— 'सत्ये

सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति'। मनुरपि— 'नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्। स्थितिश्च लोकधर्मश्च तस्मात्सत्यं विशिष्यते ॥ सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव' इति। आदिपर्वणि शकुन्तलोपाख्यानेऽपि— 'वरं कूपशताद्वापी वरं वापीशतात्क्रतुः। वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतम्। अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ सर्ववेदाधिगमनं सर्वतीर्थावगाहनम्। सत्यं च वचनं राजन्समं च स्यान्न वा समम् ॥ नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परम्। नास्ति तीव्रतरं किंचिदनृतादिह विद्यते ॥ राजन्सत्यं परं धर्मं सत्यं च समयः परः। मा स्राक्षीः समयं राजन्सत्यं संगतमस्तु ते' इति। आपद्धर्मेऽपि— 'सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः। सत्यमेव नमस्येत सत्यं हि परमा गतिः ॥ सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम्। सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम्' इति। आनुशासनिकेऽपि— 'सत्येन सूर्यस्तपति सत्ये-

नाग्निः प्रदीप्यते। सत्येन देवाः प्रीयन्ते पितरो ब्राह्मणास्तथा। सत्यमाहुः परो धर्मस्तस्मात्सत्यं न लङ्घयेत्॥ मुनयः सत्यनिरता मुनयः सत्यविक्रमाः। मुनयः सत्यशपथास्तस्मात्सत्यं विशिष्यते॥ सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ' इति। अत एवाग्रे चित्रकूटे भरतं प्रति श्रीरामवचनम्—

सत्यमेवानृशंस्यं च राजवृत्तं सनातनम्।
तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः॥

ऋषयश्चैव वेदाश्च सत्यमेव हि मेनिरे।
सत्यवादी हि लोकेऽस्मिन्परमं गच्छति क्षयम्॥

उद्विजन्ते यथा सर्पान्नरादनृतवादिनः।
धर्मः सत्यं परो लोके सत्यं पद्मा समाश्रिता॥
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्॥

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।
वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भव॥

इति। ततः सफलः स वरो मेऽस्तु रामाभिषेकसंभारैर्भरतं सत्वरमाभिषेच्य रामं च विपिनं प्रवेशय, अन्यथा तवाग्रतो जीवितं परित्यक्ष्यामीत्येवमादिभिः परुषतरैः कैकेयीवचनैरतिसंतप्तहृदयो राजा,

धर्मबन्धेन बद्धोऽस्मि नष्टा च मम चेतना।
ज्येष्ठं पुत्रं प्रियं रामं द्रष्टुमिच्छामि धार्मिकम्॥

इत्यवादीत्। नन्वत्र वनं गते रामे रामदर्शनं दुर्लभं मत्वा रामं द्रष्टुमिच्छामीति वदतो दशरथस्य कैकेयीप्रार्थितवरद्वयप्रदानं धर्मत्वेनाभिमतमित्यवगम्यते, तदनुपपन्नम्। पूर्वदिनप्रतिज्ञातज्येष्ठपुत्ररामाभिषेकरूपधर्मान्तरविरोधापत्तेरिति चेत्, न। उभयोर्धर्मत्वाविशेषेऽपि, आपत्संरक्षणसंजातसंतोषेण दत्तवरद्वयपरिपालनस्य 'कृतघ्ने नास्ति निष्कृतिः' इति धर्मशास्त्ररीत्या कृतघ्नतादोषपरिहारार्थत्वेन गरीयस्त्वात्; एवं च परमप्रेमास्पदज्येष्ठपुत्रप्रव्राजनमप्यङ्गीकृत्य धर्मपरिपालनात्, इतरैरपि स्त्रीपुत्रस्वप्राणादिपरित्यागेनापि धर्मसंरक्षणं कर्तव्यमिति सूचितम्। तथा च भारते— 'न जातु कामान्न भयान्न

लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः । नित्यो धर्मः सुख-दुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः' इति । मनुरपि— 'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत् ॥' इति । न च 'सत्यं समनुवर्तस्व' इति कैकेयीवचनस्य 'सत्यपाशेन बद्धोऽस्मि' इत्येव प्रतिवचनमुचितम्, न तु 'धर्मपाशेन बद्धोऽस्मि' इतीति वाच्यम्; सत्यधर्मयोरभेदात्। तथा च बृहदारण्यके 'यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तमाहुः सत्यं वदतीति'। एवं च श्रुतिस्मृतीतिहासपुराणादिषु सत्या-सत्यधर्मयोः पृथक्पृथक्प्रशंसनं सामान्यविशेषरूपत्वादुपपन्नम्। तथा च मनुः—'ब्राह्मणो वा मनुष्याणामादित्यस्तेजसामिव। शिरो वा सर्वगात्राणां धर्माणां सत्यमुत्तमम्' इति। अतस्तया कैकेय्या प्रार्थितं सत्यपरिपालनमेव धर्मत्वेन व्यवहृतवानिति न विरोध इति। ततः प्रभातायां रजन्यां कैकेयी वसिष्ठाभ्यनुज्ञया राजानं प्रबोधयितुकामं सुमन्त्रम्— 'निद्रावशो राजा न प्रबोधनीयः, इदैव

त्वरितं राममानय' इत्यवोचत् । ततः सुमन्त्रोऽपि तदाज्ञया अपरमिव महेन्द्रभवनं राममन्दिरमासाद्य 'कैकेयीसहितो राजा त्वां द्रष्टुमिच्छति' इति रामभद्रमवादीत् । तद्वचनश्रवणसंभृतहर्षेण रामेण 'देव्या कैकेय्या सह संमन्त्र्य मां यौवराज्येऽभिषेचयितुमाकारयति राजा, अतस्तं द्रष्टुमभिगच्छामि, त्वमपि सहैताभिः सखीभिः सुखं विहर' इत्यभिहिता सीता

**आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी ।**
**पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः ।**
**वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम् ॥**

अत्र भार्यया सीतया श्रीराममुद्दिश्य मङ्गलस्य कृतत्वात्, महाप्रयोजनं साधयितुं व्रजतः निकटस्थेन येन केनचिदवश्यं मङ्गलं कर्तव्यम्, महतामसंनिधाने भार्ययापि कर्तव्यमिति सूचितम् । यथा चानुशासनिके साम्बोत्पत्तौ कृष्णं प्रति जाम्बवती मङ्गलं कृतवतीति श्रूयते— 'यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः । तथा ममापि तनयं प्रयच्छ मधुसूदन ॥ इत्येवं

चोदितो देव्या तामवोचं सुमध्यमाम् । अनुजानीहि मां राज्ञि करिष्ये वचनं तव ॥ सा च मामब्रवीद्गच्छ शिवाय विजयाय च । ब्रह्मा शिवः काश्यपश्च नद्यो देवा मनोनुगाः ॥ क्षेत्रौषध्यो यज्ञभागाश्छन्दांस्यृषिगणा वरा । समुद्रा दक्षिणास्तोभौ ऋक्षाणि पितरो ग्रहाः ॥ देवपत्न्यो देवकन्या देवमातर एव च । मन्वन्तराणि गावश्च चन्द्रमाः सविता हरिः ॥ सावित्री ब्रह्मविद्या च ऋतवो वत्सरास्तथा । क्षणा लवा मुहूर्ताश्च निमेषा युगपर्ययाः ॥ रक्षन्तु सर्वत्रगतं त्वां यादवसुखाय च । अरिष्टं गच्छ पन्थानमप्रमत्तो भवानघ ॥ एवं कृतस्वस्त्ययनस्तयाहं ततोऽभ्यनुज्ञाय नरेन्द्रपुत्रीम्' इति । आरण्यपर्वण्यपि 'तौ परिष्वज्य बीभत्सुः कृष्णामामन्त्र्य चाप्युभौ । अभ्यवादयत प्रीतः तपस्विप्रवरानपि ॥ मनांस्यादाय सर्वेषां प्रयातः पुरुषर्षभः । तं सिंहमिव गच्छन्तं सिंहस्कन्धोरसं तथा ॥ प्राञ्जलिः पाण्डवं कृष्णा देवानां कुर्वती नमः । वाग्भिः परमशुक्लाभिर्मङ्गलाभिरभाषत ॥ नमो धात्रे च संधात्रे स्वस्ति गच्छ वनाद्वनम् । धर्मस्त्वां जुषतां पार्थ भास्करश्च

विभावसुः ॥ ब्रह्मा त्वां ब्राह्मणाश्चैव पालयन्तु धनंजय । ज्येष्ठाय चापि ज्येष्ठस्य भ्रातुर्वचनमास्थितः । प्रपद्येथा वसून्रुद्रानादित्यान्समरुद्गणान् ॥ विश्वेदेवांस्तथा साध्याञ्शान्त्यर्थं भरतर्षभ । स्वस्ति तेऽस्त्वन्तरिक्षेभ्यो दिव्येभ्यो भरतर्षभ ॥ पार्थिवेभ्यश्च सर्वेभ्यो ये केचित्परिपन्थिनः' इति । ततः सौमित्रिणा सह दिव्याश्ववयुक्तमलंकृतं रथवरमास्थाय सकलजनानन्दनो रघुनन्दनोऽम्बरचुम्बिनीः सौधमालाः पश्यन्

चतुष्पथान्देवपथांश्चैत्यान्यायतनानि च ।
प्रदक्षिणं परिहरन्नगाम नृपतेः सुतः ॥

अत्र देवायतनादीन्प्रदक्षिणं परिगत्य रामो गत इत्यनेन इतरैरप्येवं प्रदक्षिणीकृत्यैव गन्तव्यमिति सूचितम् । तथा च गौतमः— 'प्रशस्तमाङ्गल्यदेवायतनचतुष्पथान्प्रदक्षिणमावर्तयेत' इति । मनुरपि— 'मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् । प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्' इति । आनुशासनिकेऽपि— 'प्रदक्षिणं च कुर्वीत सर्वानेव वनस्पतीन् । चतुष्पथांश्च कुर्वीत सर्वानेव प्रदक्षि-

णम्' इति । अष्टादशे— ततो रामो राजभवनमभ्येत्य कैकेय्या सह समासीनं विषण्णवदनं राजानमवलोक्य चिन्ताकुलहृदयः, 'किंनिमित्तोऽयमभूतपूर्वो राज्ञो विकारः, किं वा कोपकारणम्, कुतो वा यथापूर्वं मां नाभिनन्दति,

अतोषयन्महाराजमकुर्वन्वा पितुर्वचः ।
मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे ॥

यतोमूलं नरः पश्येत्प्रादुर्भावमिहात्मनः ।
कथं तस्मिन्न वर्तेत प्रत्यक्षे सति दैवते ॥

नाहमात्मकृतमपराधं कंचित्पश्यामि तदाख्यातु भवती' इति कैकेयीमवदत् । अत्र, अतोषयन्नित्यादिश्लोकद्वयेन स्वोत्पत्तिकारणभूतत्वात् प्रत्यक्षदैवते पितरि कथं न वर्तेत, अतस्तत्संतोषणं तद्वचनपरिपालनं चाकृत्वा मुहूर्तमपि न जीवेयमिति प्रतिपादनेन इतरैरपि स्वोत्पत्तिकारणभूतानां मातापित्राचार्याणां त्रयाणां शुश्रूषणं तेषां वचनपरिपालनं संतोषणं च कर्तव्यम् । प्रत्यक्षे सति दैवते

इत्यनेन च, अतीन्द्रियदेवतोपासनायाः असुकरत्वात् तत्प्रसादस्य च अप्रत्यक्षत्वात् उपासनायामङ्गवैकल्यप्रयुक्तदोषस्य संभावितत्वाच्च इतरदेवतोपासनापेक्षया प्रत्यक्षदैवतीभूतानां मातापित्राचार्याणामुपासनमेव श्रेष्ठमिति सूचितम्। ननु मातापित्रोर्जनकत्वे सत्यपि, आचार्यस्य जनकत्वं नोपपद्यत इति चेन्न। मातापित्रोः शरीरजनकत्ववत् आचार्यस्यापि विद्यातः जनकत्वात्। तथा चापस्तम्बाचार्याः 'स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः' इति। तस्माज्जनकत्वाविशेषात् मातापित्राचार्याणां त्रयाणामपि शुश्रूषणादिकं कर्तव्यमिति यदुक्तं तद्युक्तमेव। तत्र तेषां शुश्रूषायां मनुः— 'यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्। तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः॥ सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः। अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः'॥ उशना अपि— 'यः सावित्रयति या सूते येन विद्योपदिश्यते। ज्येष्ठभ्राता च भर्ता च पञ्चैते गुरवस्तथा॥ आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः। पूज-

नीया विशेषेण पञ्चैते भूतिमिच्छता ॥ यावत्पिता च माता च द्वावेतौ जनिकारकौ । तावत्सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः' । अत्रैवाग्रे—

न सत्यं दानमानौ वा न यज्ञाश्चाप्तदक्षिणाः ।
तथा बलकराः सीते यथा सेवा पितुर्मता ॥

स्वर्गो धनं वा धान्यं वा विद्या पुत्राः सुखानि च ।
गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् ॥

देवगन्धर्वगोलोकान्ब्रह्मलोकांस्तथा नराः ।
प्राप्नुवन्ति महात्मानो मातापितृपरायणाः ॥

इति । वनपर्वणि पितरौ पूजनीयावित्यत्र ब्राह्मणं प्रति धर्मव्याधवचनम्— 'त्वया विनिकृता माता पिता च द्विजसत्तम । अनिसृष्टोऽसि निष्क्रान्तो गृहात्ताभ्यामनिन्दित ॥ तव शोकेन वृद्धौ तावन्धीभूतौ तपस्विनौ । तौ प्रसादयितुं गच्छ मां त्वं धर्मोऽतिगादयम् ॥ तपस्वी त्वं महात्मा च धर्मे च निरतः सदा । सर्वमेतदपार्थं ते क्षिप्रं तौ संप्रसादय ॥ श्रद्धत्स्व च मम ब्रह्मन्नान्यथा कर्तुमर्हसि ।

गन्यतामथ विप्रर्षे श्रेयस्ते कथयाम्यहम् ॥ अतन्द्रितः कुरु क्षिप्रं मातापित्रोर्हि पूजनम् । अतः परमहं धर्मं नान्यं पश्यामि कंचन' ॥ ब्राह्मणः—'पतमानोऽथ नरके भवतास्मि समुद्धृतः । राजा ययातिर्दौहित्रैः पतितस्तारितो यथा ॥ सद्भिः पुरुषशार्दूल तथाहं भवता त्विह । मातापितृभ्यां शुश्रूषां करिष्ये वचनात्तव ॥ नाकृतात्मा वेदयति धर्माधर्मविनिश्चयम्' । तत्रैव धर्मव्याधवचने शुश्रूषाविषये— 'एतदर्थं मम प्राणा भार्या पुत्रः सुहृज्जनाः । सपुत्रदारः शुश्रूषां नित्यमेवं करोम्यहम् ॥ स्वयं च स्नापयाम्येतौ तथा पादौ प्रधावये । आहारं संप्रयच्छामि स्वयं च द्विजसत्तम ॥ एतौ पुष्पैः फलैरन्नैस्तोषयामि सदा द्विज । अनुकूलं तथा वच्मि विप्रियं परिवर्जये ॥ अतन्द्रितः सदा विप्र शुश्रूषां वै करोम्यहम् । पञ्चैते गुरवो ब्रह्मन्पुरुषस्य बुभूषतः ॥ पिता माताग्निरात्मा च गुरुश्च द्विजसत्तम । एतेषु यस्तु वर्तेत सम्यगेव द्विजोत्तम ॥ भवेयुरन्नयस्तस्य परिचीर्णास्तु नित्यशः । गार्हस्थ्ये वर्तमानस्य एष धर्मः सनातनः' । पित्रादिवचनपरिपालने अत्रैव—

स मां पिता यथा शास्ति सत्यधर्मपथे स्थितः ।
तथा वर्तितुमिच्छामि स हि धर्मः सनातनः ॥

पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ।
सुसंश्रित्य पितुर्वाक्यं पितुर्वा ब्राह्मणस्य वा ॥

न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठताम् ।
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ॥

पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ।
पिता हि दैवतं तात दैवतानामपि स्मृतम् ॥
तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ।

भारते आनुशासनिके— 'मातुः पितुर्गुरूणां च कार्यमेवानुशासनम् । हितं वाप्यहितं वापि न विचार्यं नरर्षभ' इति । पित्रादिसंतोषकरणे मनुः— 'तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा । तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते' । उशना च— 'पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि । स पुत्रः सकलं कर्म प्राप्नुयात्तेन कर्मणा ॥ तयोर्नित्यं प्रियं कुर्यात्कर्मणा मनसा गिरा' । तेषां सकलदेवतास्वरूपत्वे मनुः— 'आचार्यो ब्रह्मणो मूर्तिः

पिता मूर्तिः प्रजापतेः । माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ॥ त एव हि त्रयो लोकास्त एव त्रय आश्रमाः । त एव हि त्रयो वेदास्त एवोक्ताख्रयोऽग्नयः ॥ पिता वै गार्हपत्योऽग्निर्माता वै दक्षिणः स्मृतः । गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ नास्ति मातृसमं दैवं नास्ति पित्रा समो गुरुः ' इति । वनपर्वणि पतिव्रतोपाख्याने कौशिक-धर्मव्याधसंवादे व्याधः— 'पिता माता च भगवानेतौ मे दैवतं परम् । यद्दैवतेभ्यः कर्तव्यं तदेवाभ्यां करोम्यहम् ॥ त्रयस्त्रिंशद्यथा देवाः सर्वे शक्रपुरोगमाः । संपूज्याः सर्व-लोकस्य तथा वृद्धाविमौ मम ॥ उपहारानाहरन्तो दैव-तानां यथा द्विजाः । कुर्वन्ति तद्वदेताभ्यां करोम्यहमत-न्द्रितः ॥ एतौ मे परमं ब्रह्मन्पिता माता च दैवतम् । एतावेवाग्नयो मह्यं यान्वदन्ति मनीषिणः ॥ यज्ञा वेदाश्च चत्वारः सर्वमेतौ मम द्विज । यावत्रयस्ते जीवेयुस्तावन्ना-न्यं समाचरेत् ॥ त्रिष्वप्रमाद्यन्नेतेषु ब्रह्मलोकं समश्नुते । तेषामनुपरोधेन पारक्यं यद्यदाचरेत् ॥ तत्तन्निवेदये-त्तेभ्यो मनोवाक्कायकर्मभिः । त्रिष्वेतेष्वितिकृत्यं हि

पुरुषस्य समाप्यते ॥ एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते । तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ॥ न ताभ्यामननुज्ञातो धर्ममन्यं समाचरेत्' इति । ततश्चायं वितथश्चायं विकारो न त्वदीयापराधेन नापि शरीरोपद्रवेणान्येन वा केनचिज्जनितः, किंतु त्वदनिष्टभूतमत्प्रार्थितवरद्वयनिर्बाहः कथं भवेत्, कथं वा प्रियार्हं त्वामप्रियं वक्तुं प्रभवामीति चिन्तासमुत्पन्नोऽयं विकारः, तद्भवाञ्शुभमशुभं वा राज्ञो मनोगतं यदि करिष्यति तदा तदाख्यास्यामीति कैकेय्या निर्लज्जमभिहितः श्रीरामभद्रस्तामेवमवोचत्—

अहं हि वचनाद्राज्ञः पतेयमपि पावके ।
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ॥

नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ।
तद्ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् ॥
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ।

इति । अत्र पित्राज्ञया परोपद्रवरूपावश्यवधादिकं क्रियत इत्यनुक्त्वा स्वोपद्रवमात्रपर्यवसन्नाग्निपतनविषभ-

ऋणार्णवमज्जनानि किंचन्त इत्युक्त्वा परोपद्रवः सर्वथा न चिन्तनीय इति सूचितम्। तथा च विष्णुपुराणे— 'अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा। तस्य पापागमस्तात हेत्वभावान्न विद्यते' इति। 'नियुक्तो गुरुणा पित्रा नृपेण च हितेन च' इत्यादिद्वितीयश्लोकेन गुरुपितृनृपहितकारिणां वचनं कर्तव्यमित्युक्तम्। तत्र गुरुपित्रोर्वचनकरणे प्राक्प्रमाणं प्रतिपादितम्। नृपवचनकरणे विष्णुपुराणे— 'ब्रह्मा जनार्दनः शंभुरिन्द्रो वायुर्यमो रविः। हुतभुग्वरुणो धाता पूषा भूमिर्निशाकरः॥ नृपस्यैते शरीरस्थाः सर्वदेवमयो नृपः। भर्तृशुश्रूषणं धर्मो यथा स्त्रीणां परो मतः॥ ममाज्ञापालनं धर्मो भवतां च तथा द्विजाः' इति वेनस्य राज्ञो वचनेन नृपवचनं कर्तव्यमेव। हितकारिणां वचनकरणे, आदिपर्वणि धृतराष्ट्रं प्रति विदुरवचनम्— 'प्रियं हितं च तद्वाक्यमुक्तवान्कुरुसत्तमः। भीष्मः शान्तनवो राजन्प्रतिगृह्णीष्व तच्च वै' इति। एवं पृथक् चतुर्णामपि वचनानां परिपालनीयत्वेन एक एव दशरथः, गुरुः, पिता, प्रियः, राजा, चेति,

तद्वचनमवश्यं परिपालनीयमेव। ततः एवं ब्रुवाणमतिसरलहृदयं राममवलोक्य— 'प्राक्प्रतिश्रुतवरद्वये एकेन त्वद्विवासनमन्येन च भरताय राज्यप्रदानं कुर्वित्यभिहितोऽयं राजा त्वयि स्नेहपारवश्येन वक्तुं न प्रभवति, तद्वरद्वयनिर्वहणेन सत्यप्रतिज्ञं राजानं कुरु' इत्यवोचत्। एकोनविंशे— ततः कठोरतरं कैकेयीवचनमाकर्ण्याप्यकलुषितहृदयेन रामभद्रेण 'प्रतिज्ञामनुपालयन् परिगृहीतमुनिवेषोऽहं वनं यास्यामि, मातुलकुलाद्भरतानयनायाद्यैव शीघ्रजवैर्हयैः प्रेष्यतां दूतवर्गः' इत्यभिहिता कैकेयी समभाषत—

एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः।
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनम्॥

यावत्त्वं न वनं यातः पुरादस्मादभित्वरन्।
पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा॥

इति। ततो हृदयशल्यभूतं कैकेयीवचनमाकर्ण्य मूर्छित्वा भूमौ निपतितं राजानं पुनरासन उपदेश्य कशयाभि-

हतो जात्यश्व इव कैकेयीवचसा वनगमने कृतत्वरो रामभद्रस्तामेवमवादीत् ।

नाहमर्थपरो देवि लोकमानस्तमुत्सहे ।
विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम् ॥

अत्र धर्म एव संपादनीयः, अर्थस्त्वप्रयोजक इत्युक्तं तदनुपपन्नम् । अर्थस्यापि धर्मसाधनत्वेनापेक्षणीयत्वात् । तथा च श्रुतिः बृहदारण्यके— 'अथ वित्तं मे स्यादथ कर्म कुर्वीयेति' इति । युद्धकाण्डे रामं प्रति लक्ष्मणवाक्यमपि—

धर्ममूलं त्वया च्छिन्नं राज्यमुत्सृजता तदा ।
अर्थेभ्योऽथ विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ॥

क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ।
अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः ॥

व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ।
सोऽयमर्थं परित्यज्य सुखकामः समेधितः ॥

पापमारभते कर्तुं ततो दोषः प्रवर्तते ।

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ॥

यस्यार्थाः स पुमान् लोके
यस्यार्थाः स च पण्डितः ।
यस्यार्थाः स च विक्रान्तो
यस्यार्थाः स च बुद्धिमान् ॥

यस्यार्थाः स महाभागो
यस्यार्थाः स गुणान्वितः ।
यदि धर्मो भवेद्भूतः
सत्यधर्मपराक्रमः ॥

अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया ।
यस्यार्था धर्मकामार्थास्तस्य सर्वे प्रदक्षिणाः ॥

हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः ।
अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥

येषां नश्यत्यथं लोकश्चरतां धर्मचारिणाम् ।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः ॥

इति । विष्णुपुराणे—'सोमसंस्था हविःसंस्थाः पाक-

संस्थाश्च संस्थिताः। धने यतो मनुष्याणां यतेतातो धनार्जने ॥ भारते आरण्यके पर्वणि युधिष्ठिरं प्रति भीष्मवचनम्—दानं यज्ञः सतां पूजा वेदधारणमार्जवम्। एष धर्मः परो राजन् बलवान् प्रेत्य चेह च। एष नार्थविहीनेन शक्यो राजन्निषेवितुम्॥ अखिलाः पुरुषव्याघ्र गुणाः स्युर्यद्यपीतरे। धर्ममूलं जगद्राजन् नान्यद्धर्मो विशिष्यते ॥ धर्मश्चार्थेन महता शक्यो राजन्निषेवितुम्। न चार्थो भैक्ष्यचर्येण नापि क्लैब्येन कर्हिचित्॥ वेत्तुं शक्यः सदा राजन् केवलं धर्मबुद्धिना'। तस्माद्धर्मसाधनत्वेन अर्थस्यापेक्षणीयत्वात् अर्थानपेक्षा कुत इति चेन्न। नाहमर्थपर इति वचनं धर्मविरुद्धार्थनिषेधपरम्। तथा च मनुः— 'परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ'। विष्णुपुराणेऽपि— 'परित्यजेदर्थकामौ धर्मपीडाकरौ नृप'। तत्रैव 'प्रबुद्धश्चिन्तयेद्धर्ममर्थं चाप्यविरोधिनम्। स्वधर्मस्याविरोधेन नरैर्लभ्यं धनं सदा'। आपस्तम्बोऽपि धर्मार्थसंनिपाते— 'अर्थग्राहिण एते देव'। अत्रैव

धर्मार्थकामाः खलु तात लोके
समीहिता धर्मफलोदयेषु।

ते तत्र सर्वे स्युरसंशयं मे
भार्येव वश्याभिमता सपुत्रा ॥
यस्मिंस्तु सर्वे स्युरसंनिविष्टा
धर्मो यतः स्यात्तदुपक्रमेत ।
द्वेष्यो भवत्यर्थपरो हि लोके
कामात्मना खल्वपि न प्रशस्ता ॥

इति । तस्मात् उक्तप्रकारेण धर्मविरुद्धार्थपरित्यागस्य युक्तत्वात् प्रकृते पितृवाक्यपरिपालनरूपधर्मविरुद्धस्य राज्यरूपार्थस्य धर्मज्ञेन रामेण कृतः परित्यागो युक्त एव ।

न नूनं मयि कैकेयि किंचिदाशंससे गुणम् ।
यद्राजानमवोचस्त्वं ममेश्वरतरा सती ॥

तदद्यैव त्वद्वचनाद्दण्डकान्प्रविशामीत्यभिधाय शोकवशेन सस्वनं प्ररुदन्तं पितरमभिवाद्य प्रदक्षिणीकृत्याभिषेकसंभारानापृच्छ्य च सुहृज्जनं परित्यज्य राज्यचिह्नानि विसृज्य च पौरजनान् स्वसुहृज्जनविपत्तिशङ्कया तत्समयसमुदितं सहजधैर्येण संनिगृह्य हर्षोत्कर्षमेव प्रकटीकुर्वन् अश्रुपूर्णनयनेन लक्ष्मणेनानुगम्यमानः मातुरनुज्ञां ग्रहीतुमन्तःपुरान्निर्जगाम ।

विंशे सर्गे—

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ ।
आर्तशब्दो महान् जज्ञे स्त्रीणामन्तःपुरे तदा ॥

रामस्तु भृशमायस्तो निःश्वसन्निव कुञ्जरः ।
जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥

ततो द्वारपालकावेदितरामागमनवृत्तान्तया व्रताचरणकर्शितया कौसल्यया संतोषातिशयेन प्रत्युद्गम्याशीर्भिरभिनन्द्य मणिमयमासनमिदमत्रास्यतामिदं च दिव्यमन्नमुपभुज्यतामिति समाज्ञप्तो रामभद्रः,

देवि नूनं न जानीषे महद्भयमुपस्थितम् ।
इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥

भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्ये विवासयति तापसम् ॥

स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने ।
आसेवमानो वन्यानि फलमूलैश्च वर्तयन् ॥

गमिष्ये दण्डकारण्यं किमनेनासनेन मे।
विष्टरासनयोग्यो हि कालोऽयं मामुपस्थितः ॥

इत्यवादीत् । ततश्च तद्वचनश्रवणमात्रेण परशुसंकृत्तां कदलीमिव भूमौ निपतितां पांसुरूषितसर्वाङ्गीं मातरं ससंभ्रमं स्वासने उपवेश्य तद्गात्रसंलग्नं पांसुनिकरं सुखसंस्पर्शेन पाणितलेन परिममर्श । तत्करतलस्पर्शमात्रेण लब्धसंज्ञा कौसल्या,

यदि पुत्र न जायेथा मम शोकाय राघव ।
मा स्म दुःखमतो भूयः पश्येयमहमप्रजाः ॥

न दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे ।
अपि पुत्रेऽपि पश्येयमिति रामास्थितं मया ॥

सा बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् ।
अहं श्रोष्ये सपत्नीनामवराणां वरा सती ॥

नित्यक्रोधतया तस्याः कथं नु खरवादि तत् ।
कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ॥

दश सप्त च वर्षाणि तव जातस्य राघव ।
आसितानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयम् ॥

इदं तु दुःखं यदनर्थकानि मे
व्रतानि दानानि च संयमाश्च हि ।

तपश्च तप्तं यदपत्यकारणा-
त्तन्निष्फलं बीजमिवोप्तमूषरे ॥

भृशमसुखममर्षिता तदा
बहु विललाप समीक्ष्य राघवम् ।
व्यसनमुपनिशाम्य सा मह-
त्सुतमिव बद्धमवेक्ष्य किन्नरी ॥

एकविंशे— ततो लक्ष्मणः सकरुणां विलपन्तीं कौसल्यां वनवासाय कृतनिश्चयं रामं चावेक्ष्य तत्काल-सदृशमेवमवादीत् । कैकेयीप्रेरणेन कार्याकार्यविवेक-विधुरस्य राज्ञो दशरथस्य वचनं न प्रमाणीकर्तुमर्हति भवान् ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥

अतो राजानं निगृह्य मदीयभुजबलनिरस्तारातिमण्डल-मखिलमपि महीमण्डलं पालयतु भवान् । को हि नाम ज्येष्ठातिलङ्घनेन कनिष्ठाय राज्यं प्रदास्यति । तदलं शो-

कावेगेनेत्यवोचत्। ततः लक्ष्मणवचनश्रवणमात्रेण निरस्तसमस्तशोका कौसल्या राममेवमेवावोचत्।

भ्रातुस्ते वदतः पुत्र लक्ष्मणस्य श्रुतं त्वया।
यदत्रानन्तरं कार्यं कुरुष्व यदि रोचते॥

धर्मज्ञ यदि धर्मिष्ठ धर्मं चरितुमिच्छसि।
शुश्रूष मामिहस्थस्त्वं चर धर्ममनुत्तमम्॥

शुश्रूषुर्जननीं पुत्र स्वगृहे नियतो वसन्।
परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः॥

यथैव राजा पूज्यस्ते गौरवेण तथास्म्यहम्।
त्वां नाहमनुजानामि न गन्तव्यमितो वनम्॥

इति। ततो रामभद्रः सकरुणं विलपन्तीं कौसल्यां सान्त्वनशतैः परिसान्त्व्य पार्श्वतो बद्धाञ्जलिं लक्ष्मणमवलोक्य मयि स्नेहवशेन मातुः क्लेशनिरसनाय च धर्मविरुद्धं वदति भवानपि धर्मस्वरूपाभिज्ञः।

धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।
धर्मसंश्रितमेतच्च पितुर्वचनमुत्तमम्॥

संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा ।
न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ॥

तथाचानुशासनिके—गुरूणां चैव निर्बन्धो न कर्तव्यः कदाचन । अनुमान्यः प्रसाद्यश्च गुरुः कुद्धो युधिष्ठिरः ॥ सम्यक् मिथ्याप्रवृत्तेऽपि वर्तितव्यं गुराविह । गुरुनिन्दा दहत्यायुर्मनुष्याणां नराधिप ॥ इति ।

तदेनां विसृजानार्यां क्षत्रधर्माश्रितां मतिम् ।
धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुमन्यताम् ॥

इति अभिधाय पुनरपि सप्रणामं कौसल्यामेवमवदत् ।

अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् ।
शापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ॥

वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ।
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ॥

पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ।
वनवासकृता बुद्धिर्मम धर्म्यानुवर्त्यताम् ॥

स मातरं चैव विसंज्ञकल्पा-
मार्तं च सौमित्रिममिप्रतप्तम् ।
धर्मे स्थितो धर्म्यमुवाच वाक्यं
यथा स एवार्हति तत्र वक्तुम् ॥

धर्मार्थकामाः किल तात लोके
समीक्षिता धर्मफलोदयेषु ।
ते तत्र सर्वे स्युरसंशयं मे
भार्येव वश्याभिमता सपुत्रा ॥

यस्मिंस्तु सर्वे स्युरसंनिविष्टा
धर्मो यतः स्यात्तदुपक्रमेत ।
द्वेष्यो भवत्यर्थपरो हि लोके
कामात्मता खल्वपि न प्रशस्ता ॥

गुरुश्च राजा च पिता च वृद्धः
क्रोधात्प्रहर्षाद्यदि वापि कामात् ।
यद्यादिशेत्कार्यमवेक्ष्य धर्मं
कस्तं न कुर्यादनृशंसवृत्तिः ॥

स वै न शक्नोमि पितुः प्रतिज्ञा-
मिमामकर्तुं सकलां यथावत् ।

स ह्यावयोस्तात गुरुर्नियोगे
देव्याश्च भर्ता स गतिः स धर्मः ॥

तस्मिन्पुनर्जीवति धर्मराजे
विशेषतः स्वे पथि वर्तमाने ।
देवी मया सार्धमितोऽपगच्छे-
त्कथं खिदन्ती विधवेव नारी ॥

अनेन स्त्रिया भर्तुर्यावदवस्थानं तावत्तत्समीपे अवस्थानं तत ऊर्ध्वं पुत्रस्य समीपे अवस्थानमिति सूचितम् । तथा च मनुः— 'बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने । पुत्राणां भर्तरि प्रेते न भजेत स्वतन्त्रताम् ॥' इति ।

सा मानुमन्यस्व वनं व्रजन्तं
कुरुष्व च स्वस्त्ययनानि देवि ।
यथा समाप्ते पुनरावजेयं
यथा हि सत्येन पुनर्ययातिः ॥

यशो ह्यहं केवलराज्यकारणा-
न्न पृष्ठतः कर्तुमलं महोदयम् ।

अदीर्घकाले न तु देवि जीविते
वृणेऽवरामद्य महीमधर्मतः ॥

द्वाविंशे—

निगृह्य रोषं शोकं च धैर्यमाश्रित्य केवलम् ।
अवमानं निरस्येमं गृहीत्वा हर्षमुत्तमम् ॥
उपकृतं हि यत्किंचिदभिषेकार्थमद्य मे ।
सर्वं विसर्जय क्षिप्रं कुरु कार्यं निरत्ययम् ॥
सौमित्रे योऽभिषेकार्थे मम संभारसंभ्रमः ।
अभिषेकनिवृत्त्यर्थे सोऽस्तु संभारसंभ्रमः ॥
यस्या मदभिषेकार्थे मानसं परितप्यते ।
माता मे सा यथा न स्यात्सविकारं तथा कुरु ॥
तस्याः शङ्कामयं दुःखं मुहूर्तमपि नोत्सहे ।
मनसि प्रतिसंजातं सौमित्रे मामुपेक्षितुम् ॥
न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन ।
मातॄणां वा पितुर्वाहं कृतमल्पं च विप्रियम् ॥
सत्यः सत्याभिसंधश्च नित्यं सत्यपराक्रमः ।
परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम ॥

तस्यापि हि भवेदस्मिन्कर्मण्यप्रतिसंहृते ।
सत्यं नेति मनस्तापस्तच्च तापस्तपेच्च माम् ॥
अभिषेकविधानं तु तस्मात्संहृत्य लक्ष्मण ।
अन्वगेवाहमिच्छामि वनं गन्तुमितः पुनः ॥

मम प्रव्राजनादद्य कृतकृत्या नृपात्मजा ।
सुतं भरतमव्यग्रमभिषेचयिता ततः ॥
मयि चीराजिनधरे जटामण्डलधारिणि ।
गतेऽरण्यं च कैकेय्या भविष्यति मनःसुखम् ॥

बुद्धिः प्रणीता येनेयं मनश्च सुसमाहितम् ।
तं तु नार्हामि संक्लेष्टुं प्रव्रजिष्यामि मा चिरम् ॥
कृतान्तस्त्वेव सौमित्रे द्रष्टव्यो मत्प्रवासने ।
राज्यस्य च वितीर्णस्य पुनरेव निवर्तने ॥

कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम पीडने ।
यदि भावो न दैवो हि कृतान्तविहितो भवेत् ॥
जानासि हि यथा सौम्य न मातृषु ममान्तरम् ।

अत्र रामः सर्वा अपि मातृः कौसल्यावत्पश्यतीत्यर्थः ।
अयमर्थोऽग्रे रामगमनसमये

कौसल्यायां महातेजा यथा मातरि वर्तते ।
तथा यो वर्ततेऽस्मासु स महात्मा क्व गच्छति ॥

इति राज्ञोऽवरोधजनसमुदीरितवचनेन

यथा मे भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौसल्यातोऽतिरिक्तं च सोऽनुशुश्रूषते हि माम् ॥

इति मन्थरां प्रति कैकेयीवचनेन

यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः ।
तामेव नृपनारीणामन्यासामपि वर्तते ॥

सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ।
मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ॥

इति अनसूयां प्रति सीतावचनेनापि स्पष्टः । तस्मादेवमितरैरपि सर्वाः पितृपत्न्यः जननीव द्रष्टव्या इत्युक्तं भवति । तथा च वनपर्वणि यक्षं प्रति युधिष्ठिरः—'यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः । मातृभ्यां सममिच्छामि नकुलो यत्न जीवतु ॥' इति ।

भूतपूर्वं विशेषं वा तस्या मयि सुतेऽपि वा ।

सोऽभिषेकनिवृत्त्यर्थैः प्रवासार्थैश्च दुर्वचैः ॥
उग्रैर्वाक्यैरहं तस्या नान्यद्दैवात्समर्थये ।
कथं प्रकृतिसंपन्ना राजपुत्री तथागुणा ॥
ब्रूयात्सा प्राकृतेव स्त्री मत्पीडां भर्तृसंनिधौ ।
यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते ।
व्यक्तं मयि च तस्यां च पतितो हि विपर्ययः ॥
कश्चिद्दैवेन सौमित्रे योद्धुमुत्सहते पुमान् ।
यस्य न ग्रहणं किंचित्कर्मणोऽन्यत्र दृश्यते ॥
सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ ।
यच्च किंचित्तथाभूतं न हि दैवस्य कर्म तत् ॥
ऋषयोऽप्युग्रतपसो दैवेनापि प्रपीडिताः ।
उत्सृज्य नियमांस्तीव्रान्भ्रंश्यन्ते काममन्युभिः ॥
असंकल्पितमेवेह यदकस्मात्प्रवर्तते ।
निवर्त्यारम्भमारब्धं ननु दैवस्य कर्म तत् ॥
एतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना ।
व्याहतेऽप्यभिषेके मे परितापो न विद्यते ॥
तस्मादपरितापः संस्त्वमप्यनुविधाय माम् ।
प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियाम् ॥

एभिरेव घटैः सर्वैरभिषेचनसंभृतैः।
मम लक्ष्मण तापस्य व्रतस्नानं भविष्यति॥
अथवा किं ममैतेन राजद्रव्यमयेन तु।
उद्धृतं मे स्वयं तोयं व्रतादेशं करिष्यति॥

मा च लक्ष्मण संतापं कार्षीर्लक्ष्म्या विपर्यये।
राज्यं वा वनवासो वा वनवासो महोदयः॥

न लक्ष्मणास्मिन्खलु कर्मविघ्ने
माता यवीयस्यतिशङ्कनीया।
दैवाभिपन्ना हि वदत्यनिष्टं
जानासि दैवं च तथाप्रभावम्॥

अत्र 'न लक्ष्मणास्मिन्खलु कर्मविघ्ने माता यवीयस्यतिशङ्कनीया' इति स्वोपद्रवकारिण्यपि यवीयसी माता न शङ्कनीया इति कथनेन निन्दा न कर्तव्या इति सूचितम्। तथा च मनुः— 'परीवादी खरो भवति श्वा वै भवति निन्दकः। परिभोक्ता कृमिर्भवति कीशो भवति मत्सरी' इति। 'दैवाभिपन्ना हि वदत्यनिष्टम्' इत्यनेन स्वस्य परैरुपद्रवसहस्रे सत्यपि स्वप्रारब्धाधीनं मत्वा

परस्मिन्दोषो नारोपणीय इति सूचितम् । तथा चारण्यके—

विषमां च गतिं प्राप्य देवान्गर्हति वै भृशम् ।
आत्मनः कर्मदोषाणि न विजानाति पण्डितः ॥

इति । युद्धकाण्डेऽपि ,

इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे ।
हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ॥

इति वदन्तम् ,

उवाच धर्मसहितं हनूमन्तं यशस्विनी ।
भाग्यवैषम्ययोगेन पुरा दुश्चरितेनच ॥

मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ।
प्राप्तव्यं तु दशायोगं मयैतदिति निश्चितम् ॥

न परः पापमादत्ते परेषां पापकर्मणाम् ।
समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥

इति । तथा चाभियुक्तवचनमपि— 'नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वारणः । इत्थं सर्वबलान्वितोऽपि बलभिद्भग्नः परैः संगरे तद्युक्तं ननु दैवमेव शरणं धिग्धिग्वृथा-

पौरुषम्' 'सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा । अहं करोमीति वृथाभिमानं स्वकर्मसूत्रग्रथितो हि लोकः' । अयोविंशे दैवबलात्स्वाभिषेकप्रतिबन्धं मन्वानं रामभद्रमतिकोपोग्रेणाक्ष्णा वीक्षमाणो मुहुश्च हस्ताग्रं विधुन्वल्लँक्ष्मणः सरभसमेवमवादीत्—

धर्मदोषप्रसङ्गेन लोकस्यानतिशङ्कया ।
कथं ह्येतदसंभ्रान्तस्त्वद्विधो वक्तुमर्हति ॥

यथा दैवमशौण्डीरं शौण्डीर क्षत्रियर्षभ ।
किं नाम कृपणं दैवमशक्तमभिशंससि ॥

विक्लवो वीर्यहीनो यः स दैवमनुवर्तते ।
वीराः संभावितात्मानो न दैवं पर्युपासते ॥

दैवं पुरुषकारेण यः समर्थः प्रबाधितुम् ।
न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति ॥

द्रक्ष्यन्ति त्वद्य दैवस्य पौरुषं पुरुषस्य च ।
दैवमानुषयोरद्य व्यक्ता व्यक्तिर्भविष्यति ॥

ब्रवीहि कोऽद्यैव मया वियुज्यतां
तवासुहृत्प्राणयशःसुहृज्जनैः ।

यथा तवेयं वसुधा वशे भवे-
त्तथैव मां शाधि तवास्मि किंकरः ॥

इति। अनेन च दैवापेक्षया पौरुषमेव प्रबलमिति प्रतिपादितम्। तथा च भारते—"कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः। प्रत्यक्षं दृश्यते लोके कृतस्याकृतस्य च ॥ शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा। कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् ॥ कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम्। अकृती लभते भ्रष्टः क्षते क्षारावसेचनम् ॥ तपसा रूपसौभाग्यं रत्नानि विविधानि च। प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना ॥ तथा स्वर्गश्च भोगाश्च निष्ठा या च मनीषिता। सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ॥ ज्योतींषि त्रिदशा नागाः यक्षाश्चन्द्रार्कमारुताः। सर्वे पुरुषकारेण मानुषा देवतां गताः ॥ अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम्। श्रीश्चापि दुर्लभा भोक्तुं तथैव कृतकर्मभिः ॥ स्वं चेत्कर्मफलं न स्यात्सर्वमेवाफलं भवेत्। लोको दैवं समालम्ब्य उदासीनो भवेन्न तु ॥ अकृत्वा मानुषं कर्म यो दैवमनुव-

र्तते । वृथा भ्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना ॥" इति । ननु

न लक्ष्मणास्मिन्खलु कर्मविघ्ने
माता यवीयस्यतिशङ्कनीया ।
दैवाभिपन्ना हि वदत्यनिष्टं
जानासि दैवं च तथाप्रभावम् ॥

इत्यादिवचनैः पुरुषकारापेक्षया दैवमेव प्रबलमिति प्रतिपादितम् ।

यथा दैवमशौण्डीरं शौण्डीर क्षत्रियर्षभ ।
किं नाम कृपणं दैवमशक्तमभिशंससि ॥

इत्यादिलक्ष्मणवाक्यैर्दैवापेक्षया पुरुषकार एव प्रबल इति प्रतीयते । एवं च परस्परविरुद्धत्वात् उभयोः प्राबल्यमसंगतमिति चेत्, सत्यम् । पुरुषकारेण विना दैवमेव कार्यसाधकम्, दैवेन विना पुरुषकारो वा इत्येवं परस्परानपेक्षत्वरूपं प्राबल्यमिह न विवक्षितम्, येन विरोधो भवेत् । किं तु दैवं पुरुषकारेण विना न कार्यक्षमम् । पुरुषकारोऽपि दैवं विना न कार्यक्षमः । अतः

कार्याय उभयमप्यवश्यापेक्षणीयमिति । एतदभिप्रायक-
मुभयप्राबल्यवचनम् । तथा च भारते—'नाबीजं जायते
किंचिन्न बीजेन विना फलम् । बीजाद्बीजं प्रभवति
बीजादेव फलं स्मृतम् ॥ यथा बीजं विना क्षेत्रमुप्तं
भवति निष्फलम् । तथा पुरुषकारेण विना दैवं न
सिध्यति ॥ क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् । क्षेत्र-
बीजसमायोगात्ततः सस्यं समृध्यते ॥ कृतः पुरुषकारस्तु
दैवमेवानुवर्तते । न दैवमकृते किंचित्कस्यचिद्दातुमर्हति ॥
यथाग्निः पवनोद्धूतः सूक्ष्मोऽपि सुमहान्भवेत् । तथा
कर्मसमायुक्तं दैवं साधु विवर्धते ॥' इति । न चैवमुभयो-
रावश्यिकत्वे श्रीरामेण लक्ष्मणोक्तपुरुषकारः किमिति
परित्यक्तः, तत्रापि दैवानुकूल्यसंभवादिति वाच्यम् ।
लक्ष्मणोक्तपुरुषकारस्य पितृवचनपरिपालनरूपधर्मविरु-
द्धतया परित्यागसंभवात् । वस्तुतस्तु दैवमेव प्रबलम् ।
तथा च विष्णुपुराणे—'न चिन्तयति को राज्यं को धनं
नाभिवाञ्छति । तथापि भाव्यमेवैतद्धितयं प्राप्यते नरैः ॥
सर्व एव महाभाग महत्त्वं प्रति सोद्यमः । तथा हि पुंसां

भाग्यानां नोद्यमा भूतिहेतवः ॥ जडानामविवेकानामशू-
राणामपि प्रभो । भाग्यभोग्यानि राज्यानि सत्यं नीति-
मतामपि ॥ तस्माद्यतेत पुण्येषु यदीच्छेन्महतीं श्रियम् ।'
इति । भारतेऽपि—'न दैवस्यातिभारोऽस्ति न चैवास्या
निवर्तनम् । इति चाप्यागमनं भूयो दैवस्य प्रतिपालये ॥
दैवेन किल यस्यार्थः सुनीतोऽपि विपद्यते । दैवस्य चागमे
यत्नः तेन कार्यो विजानता ॥' इति । चतुर्विंशे ततो
बाष्पपरिपूर्णनयना कौसल्या वनवासाय कृतोद्योगं राम-
भद्रमवलोक्यैवमवादीत्—

मयि जातो दशरथात्कथमुञ्छेन जीवति ।
क एतच्छ्रद्दधेच्छ्रुत्वा कस्य वा न भवेद्भयम् ॥

नूनं तु बलवाँल्लोके कृतान्तः सर्वमादिशन् ।
लोके रामाभिरामस्त्वं वन यत्र गमिष्यसि ॥

त्वया विहीनामिह मां शोकाग्निरतुलो महान् ।
प्रधक्ष्यति यथा कक्षं चित्रं भानुर्हिमात्यये ॥

कथं हि धेनुः स्वं वत्सं गच्छन्तं नानुगच्छति ।
अहं त्वानुगमिष्यामि यत्र पुत्र गमिष्यसि ॥

इति ।

तथा निगदितं मात्रा तद्वाक्यं पुरुषर्षभः ।
श्रुत्वा रामोऽब्रवीद्वाक्यं मातरं भृशदुःखिताम् ॥

कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते ।
भवत्या च परित्यक्तो न नूनं वर्तयिष्यति ॥

भर्तुः पुनः परित्यागो नृशंसः केवलं स्त्रियाः ।
स भवत्या न कर्तव्यो मनसापि विगर्हितः ॥

यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः ।
शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः ॥

मया चैव भवत्या च कर्तव्यं वचनं पितुः ।
राजा भर्ता गुरुः श्रेष्ठः सर्वेषामीश्वरः प्रभुः ॥

इमानि तु महारण्ये विहृत्य नव पञ्च च ।
वर्षाणि परमप्रीतः स्थास्यामि वचने तव ॥

जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च ।
भवत्या मम चैवाद्य राजा प्रभवति प्रभुः ॥

न ह्यनाथा वयं राज्ञा लोकनाथेन धीमता ।
यथा मयि तु निष्क्रान्ते पुत्रशोकेन पार्थिवः ॥

श्रमं नावाप्नुयात्किंचिदप्रमत्ता तथा कुरु ।
दारुणश्चाप्ययं शोको यथैनं न विनाशयेत् ॥

राज्ञो वृद्धस्य सततं हितं चर समाहिता ।
व्रतोपवासनिरता या नारी परमोत्तमा ॥

भर्तारं नानुवर्तेत तस्याः पापा गतिर्भवेत् ।
भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम् ॥

अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ।
शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता ॥

एष धर्मः पुरा दृष्टो लोके वेदे श्रुतः स्मृतः ।
अग्निकार्येषु च सदा सुमनोभिश्च देवताः ॥

पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सुव्रताः ।
एवं कालं प्रतीक्षस्व ममागमनकाङ्क्षिणी ॥

नियता नियताहारा भर्तुः शुश्रूषणे रता।
प्राप्स्यसे परमं कामं मयि प्रत्यागते सति ॥

तथा हि रामं वनवासनिश्चितं
समीक्ष्य देवी परमेण चेतसा।
उवाच रामं शुभलक्षणं वचो
बभूव च स्वस्त्ययनाभिकाङ्क्षिणी ॥

धर्मज्ञ यदि धर्मिष्ठो धर्मं चरितुमिच्छसि।
शुश्रूष मामिहस्थस्त्वं चर धर्ममनुत्तमम् ॥

शुश्रूषुर्जननीं पुत्रः स्वगृहे नियतो वसन्।
परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः ॥

यथैव राजा पूज्यस्ते गौरवेण तथास्म्यहम्।
त्वां नाहमनुजानामि न गन्तव्यमितो वनम् ॥

इति मात्रा कौसल्यया आज्ञप्तोऽपि धर्मज्ञः श्रीरामभद्रः तद्वचनमकुर्वन् पितृवाक्यानुरोधेन वनगमनकृतनिश्चयः,

शापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ।

इति प्रार्थितवान्, तदनुपपन्नम्, पितृवचनवन्मातृवचनस्यापि परिपालनीयत्वात् । तथाचानुशासनिके—'मातुः पितुर्गुरूणां च कार्यमेवानुशासनम् । हितं वाप्यहितं वापि न विचार्यं नरर्षभ ॥' वनपर्वण्यपि— 'माता-पित्रोर्गुरूणां च पूजा बहुमता मम । अत्र मुक्तो नरो लोकान्यशश्च महदश्नुते ॥ यश्च तेऽभ्यनुजानीयुः कर्म तात सुपूजिताः । धर्मं धर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिर ॥' इति । प्रत्युत पित्रपेक्षया मातुर्गरीयस्त्वेन तद्वचनपरिपालनस्यैवावश्यकर्तव्यत्वाच्च । तथा च मनुः— 'उपाध्यायादशाचार्य आचार्याणां शतं पिता । सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥ द्वौ गुरू पुरुषस्येह पिता माता च सर्वदा । पिता गुरुतरस्तावन्माता गुरुतमा भवेत् ॥' भारतेऽपि—'दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते । दशाचार्यानुपाध्यायः उपाध्यायान्पिता दश ॥ पितॄन्दश तु मातैका सर्वां वा पृथिवीमपि । गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ॥' इति । गौतमोऽपि—

'आचार्यः श्रेष्ठो गुरूणां मातेत्येके' इति । किं च

उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ।

इति अमार्गप्रवृत्तस्य पितुः शासनविधानाभावात्, प्रत्युत शुश्रूषैव विधीयते । तथाचापस्तम्बः— 'माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपि' इति । 'पतिता गुरवस्त्याज्या न तु माता कथंचन । गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥' इति । तस्मात् उक्तप्रकारेण मातुर्गरीयस्त्वात्, तद्वचनानादरोऽयुक्त इति चेत्, सत्यम् ।

स ह्यावयोस्तात गुरुर्नियोगो
दैव्याश्च भर्ता स गतिः स धर्मः ॥

इति रामवचनेन पितुरपि सर्वगुर्वपेक्षया गरीयस्त्वावगमात् । तथा च विष्णुपुराणे— 'मान्यः पिता समस्तानां गुरूणां परमो गुरुः ।' पुराणसमुच्चयेऽपि— 'तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् ।' भारते मोक्षधर्मे— 'पिता परं दैवतं मानवानां मातुर्विशिष्टं परमं वदन्ति' इति । न चैतावता मातृवचनाकरणे किमागतमिति वाच्य-

म्, उभयोर्गुरुत्वाविशेषेऽपि 'पिता रक्षति कौमारे भर्ता रक्षति यौवने। पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति' इति मनुवचनपर्यालोचनया अस्वतन्त्राया मातुराज्ञाकरणे सामर्थ्याभावेन भर्तृविरुद्धाज्ञाकरणं दूरापेतम्। अतस्तद्वचनपरिपालनमप्रसक्तमेव। न चैवं मातृगौरवप्रतिपादकवचनानां का गतिरिति वाच्यम्, सर्वप्रकारेण माता पोषणीयेत्येतदभिप्रायकत्वात्। अत एव तस्यां शुश्रूषा नित्येति आपस्तम्बवचनेऽपि शुश्रूषैव मुख्येति प्रतिपादितम्। भारतेऽपि—'मातुर्भरणमात्रेण प्रीतिः स्नेहः पितुः प्रजाः। पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम्' इति। पिता तु स्वतन्त्रत्वात् आज्ञाकरणे समर्थ एवेति तद्वचनमेव परिपालनीयम्। एतदभिप्रायेणैव राम आह—

नास्ति शक्तिःपितुर्वाक्यं समतिक्रमितुं मम।
ऋषिणा च पितुर्वाक्यं कुर्वता व्रतचारिणा।
गौर्हता जानता धर्मं कण्डुना च विपश्चिता॥
अस्माकं च कुले पूर्वं सगरस्याज्ञया पितुः।
खनद्भिः सागरैर्भूमिमवाप्तः सुमहान्वधः॥

जामदग्न्येन रामेण रेणुका जननी स्वयम् ।
कृत्ता परशुनारण्ये पितुर्वचनकारिणा ॥

नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्तये ।
पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥

तदेतत्तु मया कार्यं क्रियते भुवि नान्यथा ।
पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ॥

भारतेऽपि—'पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम् । अनवज्ञा पितुर्युक्ता धारणं मातृरक्षणम् ॥ पिता यदाह धर्मः स वेदेष्वपि सुनिश्चितः । शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ॥ तस्मात्पितुर्वचः कार्यं न विचार्यं कदाचन । पातकान्यपि पूयन्ते पितुः शासनकारिणः ॥' इति । तस्मान्मातावश्यं शुश्रूषणीया । मात्रादिवधप्रसक्तावपि पितृवचनपरिपालनमवश्यं कर्तव्यमिति सिद्धम् । अयमर्थो मोक्षधर्मे चिरकारिकोपाख्याने युधिष्ठिरं प्रति भीष्मः— 'व्यभिचारे तु कस्मिंश्चिद्व्यतिक्रम्यापरान्सुतान् । पित्रोक्तः कुपितेनाथ

जहीमां जननीमिति । स तथेति चिरेणोक्त्वा स्वभावाचिरकारिकः । विमृश्य चिरकारित्वाच्चिन्तयामास वै चिरम् ॥ पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथम् । कथं धर्मच्छले नास्मिन्निमज्जेयमसाधुवत् । पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणम् ॥ अस्वतन्त्रं च पुत्रत्वं किं नु मां नानुपीडयेत् । अनवज्ञा पितुर्युक्ता धारणं मातृरक्षणम् । युक्तक्षमावुभावेतौ नातिवर्तेत मां कथम् ॥ पिता ह्यात्मानमाधत्ते जायायां जञ्जिवानिति । शीलचारित्रगोत्रस्य धारणार्थं कुलस्य च ॥ सोऽहं मात्रा स्वयं पित्रा पुत्रत्वेन कृतः पुनः । विज्ञानं मे कथं नु स्याद्बुध्ये चात्मसंभवम् ॥ जातकर्मणि यत्प्राह पिता यच्चोपकर्मणि । पर्याप्तः स दृढीकारः पितुर्गौरवनिश्चये ॥ गुरुरग्र्यः परो धर्मः पोषणाध्यापनान्वितः । पिता यदाह धर्मः स वेदेष्वपि सुनिश्चितः ॥ प्रीतिमात्रं पितुः पुत्रः सर्वं पुत्रस्य वै पिता । शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ॥ तस्मात्पितुर्वचः कार्यं न विचार्यं कदाचन । पातकान्यपि पूयन्ते पितुः शासनकारिणः ॥ भोग्ये

भोज्ये प्रवचने सर्वलोकनिदर्शने । भर्त्रा चैव समायोगे सीमन्तोन्नयने तथा ॥ पिता धर्मः पिता स्वर्गः पिता हि परमं तपः । पितरि प्रीतिमापन्ने सर्वाः प्रीयन्ति देवताः ॥ आशिषस्ता भजन्त्येनं पुरुषं प्राह यत्पिता । निष्कृतिः सर्वपापानां पिता यच्चाभिनन्दति ॥ मुच्यते बन्धनात्पुष्पं फलं वृन्तात्प्रमुच्यते । क्लिश्यन्नपि सुतस्नेहैः पिता पुत्रं न मुञ्चति ॥ एतद्विचिन्तितं तावत्पुत्रस्य पितृगौरवम् । पिता नाल्पतरं स्थानं चिन्तयिष्यामि मातरम् ॥' इति । मातृगौरवं तत्रैव चिरकारिकोपाख्याने— 'अस्य मे जननी हेतुः पावकस्य यथारणिः । मातृदेहोऽरणिः पुंसां सर्वस्यार्तस्य निर्वृतिः ॥ मातृलाभे सनाथत्वमनाथत्वं विपर्यये । न च शोचति नाप्येनं स्थाविर्यमपकर्षति ॥ श्रिया हीनोऽपि यो गेहमम्बेति प्रतिपद्यते । पुत्रपौत्रोपपन्नोऽपि जननीं यः समाश्रितः ॥ अपि वर्षशतस्यान्ते स द्विहायनवच्चरेत् । समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा ॥ रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः । तदा स वृद्धो भवति तदा भवति दुःखितः ॥ तदा

शून्यं जगत्तस्य यदा मात्रा वियुज्यते । नास्ति मातृसमा च्छाया नास्ति मातृसमा गतिः ॥ नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया । कुक्षिसंधारणाद्धात्री जननाज्जननी स्मृता ॥ अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः । शिशोः शुश्रूषणाच्छुश्रूर्माता देहमनन्तरम् । चेतनावान्नरो हन्याद्यस्य नाशुषिरं शिरः ॥ दम्पत्योः प्राणसंश्लेषे योऽभिसंधिः कृतः किल । तं माता च पिता चेति भूतार्थो मातरि स्थितः ॥ माता जानाति यद्गोत्रं माता जानाति यस्य सः । मातुर्भरणमात्रेण प्रीतिः स्नेहः पितुः प्रजाः ॥ पाणिबन्धं स्वयं कृत्वा सहधर्ममुपेत्य च । यदि यास्यन्ति पुरुषाः स्त्रियो नार्हन्ति याच्यताम् ॥ मरणाद्धि स्त्रिया भर्ता पात्याचैव स्त्रियाः पतिः । गुणस्यास्य निवृत्तौ तु न भर्ता न पुनः पतिः ॥ एवं स्त्री नापराध्नोति नर एवापराध्यति । व्युच्चरंश्च महादोषं नर एवापराध्यति ॥ स्त्रिया हि परमो भर्ता दैवतं परमं स्मृतम् । तस्यात्मना तु सदृशमात्मानं परमं ददौ ॥ नापराधोऽस्ति नारीणां नर एवापराध्यति । सर्वकार्यापराध्यत्वान्नापरा-

ध्यन्ति चाङ्गनाः ॥ यश्च नोक्तोऽथ निर्देशः स्त्रिया मैथुनतृप्तये । तस्य स्मारयतो व्यक्तमधर्मो नास्ति संशयः ॥ एवं नारीं मातरं च गौरवे चाधिके स्थिताम् । अवध्यां तु विजानीयुः पशवोऽप्यविचक्षणाः ॥ देवतानां समावायमेकस्थं पितरं विदुः । मर्त्यानां देवतानां च स्नेहाद्भ्येति मातरम् ॥' इति । एवं च पूर्वोदाहृतमानवादिवचनजातेन एतदाख्यायिकया च पित्रोर्गौरवागमेऽपि शुश्रूषाविषये मातुः प्राबल्यम् । आज्ञाविषये तु पितुः प्राबल्यमित्यप्यवगम्यते । तस्मान्मातुः कौसल्यायाः वचनमनादृत्य श्रीरामेण पितुर्दशरथस्य वचनमनतिक्रमणीयमित्युक्तं युक्तमेव । एवं पितृवचनमाहात्म्यमितिहासपुराणादिषु बहुधा प्रतिपाद्यमानं कृत्स्नशो निरूपयितुमशक्यमिति विस्तरभियोपरम्यते । तस्मात्पितृवचनपरिपालनस्य सर्वोत्कृष्टधर्मत्वेन धर्मज्ञः श्रीरामभद्रो मातृवचनमकृत्वैव पितुर्वचनपरिपालनमेव कृतवानिति युक्तमेव । पञ्चविंशे—

सापनीय तमायासमुपस्पृश्य जलं शुचिः ।

चकार माता रामस्य मङ्गलानि मनस्विनी ॥

न शक्यसे वारयितुं गच्छेदानीं रघूत्तम ।
शीघ्रं च विनिवर्तस्व वर्तस्व च सतां क्रमे ॥

यं पालयसि धर्मं त्वं धृत्या च नियमेन च ।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥

येभ्यः प्रणमसे पुत्र चैत्येष्वायतनेषु च ।
ते च त्वामभिरक्षन्तु वने सह महर्षिभिः ॥

यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता ।
तानि त्वामभिरक्षन्तु गुणैः समुदितं सदा ॥

पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा ।
सत्येन च महाबाहो चिरं जीवाभिरक्षितः ॥

समित्कुशपवित्राणि वेद्यश्चायतनानि च ।
स्थण्डिलानि च चित्राणि शैला वृक्षाः क्षुपा ह्रदाः ॥

पतङ्गाः पन्नगाः सिंहास्त्वां रक्षन्तु नरोत्तम ।
स्वस्ति साध्याश्च विश्वे च मरुतश्च महर्षिभिः ॥

स्वस्ति धाता विधाता च स्वस्ति पूषा भगोऽर्यमा।
लोकपालाश्च यक्षाश्च मासाः संवत्सराः क्षणाः॥

दिनानि च मुहूर्ताश्च स्वस्ति कुर्वन्तु ते सदा।
स्मृतिर्धृतिश्च धर्मश्च पान्तु त्वां पुत्र सर्वतः॥

स्कन्दश्च भगवान्देवः सोमश्च स बृहस्पतिः।
सप्तर्षयो नारदश्च ते त्वा रक्षन्तु सर्वतः॥

ये चापि सर्वतः सिद्धा दिशश्च सदिगीश्वराः।
स्तुता मया वने तस्मिन्पान्तु त्वां पुत्र नित्यशः॥

शैलाः सर्वे समुद्राश्च राजा वरुण एव च।
द्यौरन्तरिक्षं पृथिवी नद्यः सर्वास्तथैव च॥

नक्षत्राणि च सर्वाणि ग्रहाश्च सर्वदेवताः।
अहोरात्रे तथा संध्ये पान्तु त्वां वनमाश्रितम्॥

ऋतवश्चैव षट् पुण्या मासाः संवत्सरास्तथा।
कलाश्च काष्ठाश्च तथा तव शर्म दिशन्तु ते॥

महावनानि चरतो निवेषस्य धीमतः।
तवादित्याश्च दैत्याश्च भवन्तु सुखदाः सदा॥

राक्षसानां पिशाचानां रौद्राणां क्रूरकर्मणाम्।
क्रव्यादानां च सर्वेषां मा भूत्पुत्रक ते भयम्॥

प्लवगा वृश्चिका दंशा मशकाश्चैव कानने।
सरीसृपाश्च कीटाश्च मा भूवन्गाहने तव॥

महाद्विपाश्च सिंहाश्च व्याघ्रा ऋक्षाश्च दंष्ट्रिणः।
महिषाः शृङ्गिणो रौद्रा न ते द्रुह्यन्तु पुत्रक॥

नृमांसभोजिनो रौद्रा ये चान्ये सत्त्वजातयः।
मा च त्वा हिंसिषुः पुत्र मया संपूजितास्त्विह॥

आगमास्ते शिवाः सन्तु सिध्यन्तु च पराक्रमाः।
सर्वसंपत्तये राम स्वस्तिमान्गच्छ पुत्रक॥

स्वस्ति तेऽस्त्वन्तरिक्षेभ्यः पार्थिवेभ्यः पुनः पुनः।
सर्वेभ्यश्चैव देवेभ्यो ये चैव परिपन्थिनः॥

शक्रः सोमश्च सूर्यश्च धनदोऽथ यमस्तथा ।
पान्तु त्वामर्चिता राम दण्डकारण्यमाश्रितम् ॥

अग्निर्वायुस्तथा धूमो मन्त्राश्चर्षिमुखाच्च्युताः ।
उपस्पर्शनकाले तु पान्तु त्वां रघुनन्दन ॥

सर्वलोकप्रभुर्ब्रह्मा भूतभर्ता तथर्षयः ।
ये च शेषाः सुरास्ते त्वां रक्षन्तु वनवासिनम् ॥

इति माल्यैः सुरगणान्गन्धैश्चापि यशस्विनी ।
स्तुतिभिश्चानुरूपाभिरानर्चायतलोचना ॥

ज्वलनं समुपाधाय ब्राह्मणेन महात्मना ।
हावयामास विधिवद्राममङ्गलकारणात् ॥

घृतं श्वेतानि माल्यानि समिधः श्वेतसर्षपान् ।
उपसंपादयामास कौसल्या परमाङ्गना ॥

उपाध्यायः स विधिना हुत्वा शान्तिमनामयम् ।
हुतहव्यावशेषेण बाह्यं बलिमकल्पयत् ॥

मधुदध्यक्षतघृतैः स्वस्तिवाच्यद्विजांस्ततः ।
वाचयामास रामस्य वने स्वस्त्ययनक्रियाम् ॥

ततस्तस्मै द्विजेन्द्राय राममाता यशस्विनी ।
दक्षिणां प्रददौ काम्यां राघवं चेदमब्रवीत् ॥

यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते ।
वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥

यन्मङ्गलं सुपर्णस्य विनताकल्पयत्पुरा ।
अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥

अमृतोत्पादने दैत्यान्मथतो वज्रधरस्य यत् ।
अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥

ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ते ।
मङ्गलानि महाबाहो दिशन्तु तव कानने ॥

इति पुत्रस्याशिषश्च कृत्वा शिरसि भामिनी ।
गन्धैश्चापि समालभ्य राममायतलोचना ॥

ओषधीं चापि सिद्धार्थां विशल्यकरणीं शुभाम् ।
चकार रक्षां कौसल्या मन्त्रैरपि जजाप च ॥

उवाचातिप्रहृष्टेव सा दुःखवशवर्तिनी ।
वाङ्मात्रेण न भावेन वाचा संसज्जमानया ॥

आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी ।
अवदत्पुत्र सिद्धार्थो गच्छ राम यथासुखम् ॥

अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतम् ।
पश्यामि त्वां सुखं वत्स सुस्थितं राजवर्त्मनि ॥

प्रणष्टदुःखसंकल्पा हर्षविद्योतिताननना ।
द्रक्ष्यामि त्वां वनात्प्राप्तं पूर्णचन्द्रमिवोदितम् ॥

भद्रासनागतं राम वनवासादिहागतम् ।
द्रक्ष्यामि त्वामहं पुत्र तीर्णवन्तं पितुर्वचः ॥

मङ्गलैरुपसंपन्नो वनवासादिहागतः ।
वध्वा मम च नित्यं त्वं कामान्संवर्धयाशु भोः ॥

मयार्चिता देवगणाः शिवादयो
महर्षयो भूतमहासुरोरगाः ।
अभिप्रयातस्य वनं चिराय ते
हितानि कुर्वन्तु दिशश्च राघव ॥

इतीव चाश्रुप्रतिपूर्णलोचना
समाप्य च स्वस्त्ययनं यथाविधि ।
प्रदक्षिणं चैव चकार राघवं
पुनः पुनश्चापि निपीड्य सस्वजे ॥

तया हि देव्या च कृतप्रदक्षिणो
निपीड्य मातुश्चरणौ पुनः पुनः ।
जगाम सीतानिलयं महायशाः
स राघवः प्रज्वलितः स्वया श्रिया ॥

षड्विंशे मात्रा कृतमङ्गलो रामभद्रो वैदेहीभवनमागत्य स्वमुखविकारदर्शनचकितहृदयां सीतामेवमवादीत् ।

चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया ।
पित्रा मे भरतश्चापि यौवराज्ये नियोजितः ॥

सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम् ।
भरतस्य समीपे तु नाहं कथ्यः कदाचन ॥
ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् ।

इति । अनेन श्रीमतां समीपे परस्तवो न कर्तव्य इति सूचितम्—

याते मयि च कल्याणि वनं मुनिनिषेवितम् ।
व्रतोपवासरतया भवितव्यं त्वयानघे ॥

अनेन प्रोषिते भर्तरि व्रतोपवासनिरतया स्थेयमिति सूचितम् । तथा च भारते आनुशासनिके शाण्डलीवचनम्— 'प्रवासं यदि मे याति भर्ता कार्येण केनचित् । मङ्गलैर्बहुभिर्युक्ता भवामि नियता तदा ॥ अञ्जनं रोचनां चैव स्नानमाल्यानुलेपनम् । प्रसाधनं च निष्क्रान्ते नाभिनन्दामि भर्तरि ॥' इति । तत्रापि द्रौपदीवचनम्— 'यदा प्रवसते भर्ता कुटुम्बार्थेन केनचित् । सुमनोवर्णकाक्षेता भवामि व्रतचारिणी ॥' इति ।

काल्यमुत्थाय देवानां कृत्वा पूजां यथाविधि ।

स्त्रीणामपि भर्त्रनुज्ञया देवतापूजनमस्तीति प्राक् प्रपञ्चितम् ।

वन्दितव्यो दशरथः पिता मम नरेश्वरः ॥

माता च मम कौसल्या वृद्धा संतापकर्शिता ।
धर्ममेवाग्रतः कृत्वा त्वत्तः संमानमर्हति ॥

विप्रियं च न कर्तव्यं भरतस्य कदाचन ।
स हि राजा प्रभुश्चैव देवस्य च कुलस्य च ॥

अनेन राजविप्रियं न कर्तव्यमिति सूचितम् । तथा च मनुः—'बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः । महती देवता ह्येषा नररूपेण तिष्ठति ॥ यन्तु तं द्वेष्टि संमोहात्स विनश्यत्यसंशयः । यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ॥ मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ।' इति ।

आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः ।
राजानः संप्रसीदन्ति कुप्यन्ति च विपर्यये ॥

अहं गमिष्यामि महावनं प्रिये
त्वया हि वस्तव्यमिहैव भामिनि ।

इति । सप्तविंशे— ततः स्वं विना वनगमने कृतनिश्चयं रामभद्रमवगत्य सकोपमेवमवादीत्—

आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥

भर्तुर्भाग्यं नायिका तु प्राप्नोति पुरुषर्षभ ।
न पिता नात्मजो नात्मा न माता न सखीजनः ॥

इह प्रेत्य च नारीणां पतिरेको गतिः सदा ।
प्रासादाग्रैर्विमानैर्वा वैहायसगतेन वा ॥

सर्वावस्थां गता भर्तुः पादच्छाया विशिष्यते ।
अनुशिष्टास्मि मात्रा च पित्रा च विविधाश्रयम् ॥

साहं रंस्ये त्वया वीर वनेषु मधुगन्धिषु ।
एवं वर्षसहस्राणां शतं वाहं त्वया सह ॥

व्यतिक्रमं न वत्स्यामि स्वर्गोऽपि हि न मे मतः ।

इति । अनेन भर्तुरतिक्लेशसमयेऽपि तं विहाय न स्थेयमिति सूचितम् । तथा च वनपर्वणि नलं प्रति दमयन्तीवचनम्—'हृतराज्यं हृतद्रव्यं विवस्त्रं तृट्श्रमान्वितम् । कथमुत्सृज्य गच्छेयमहं हि विजने वने ॥ श्रान्तस्य ते क्षुधार्तस्य चिन्तयानस्य तत्सुखम् । वने घोरे महाराज नाशयिष्यति मे क्लमम् ॥ न च भार्यासमं किंचिद्विद्यते भेषजं महत् । नित्यं हि सर्वदुःखेषु सत्यमेतद्ब्रवीमि ते ॥' इति । अष्टाविंशे—एवं ब्रुवाणामतिक्लेशेन बाष्पपरिपूर्णनयनां सीतामवलोक्य तां निवर्तयितुं ससान्त्वमेवमवादीत्—

इहाचर स्वधर्मं त्वं मा कृथा मनसोऽसुखम् ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते ॥

सुप्यते पर्णशय्यासु स्वयं भग्नासु भूतले ।
अहोरात्रं च संतोषः कर्तव्यो नियतात्मना ॥

फलैर्वृक्षात्प्रपतितैः सीते दुःखमतो वनम् ।
उपवासश्च कर्तव्यो यथाप्राणेन मैथिलि ॥

जटाधारश्च कर्तव्यो वल्कलाम्बरधारिणा ।
देवतानां पितॄणां च कर्तव्यं विधिपूर्वकम् ॥

प्राप्तानामविधीनां च नित्यशः प्रतिपूजनम् ।
कार्यस्त्रिरभिषेकश्च काले काले च नित्यशः ॥

उपहारश्च कर्तव्यः कुसुमैः स्वयमाहृतैः ।
आर्षेण विधिना वेद्यां बाले दुःखमतो वनम् ॥

यथालब्धेन कर्तव्यः संतोषस्तत्र मैथिलि ।
यताहारैर्वनचरैर्नित्यं दुःखमतो वनम् ॥

क्रोधलोभौ विमोक्तव्यौ कर्तव्या तपसे मतिः ।
न भेतव्यं च भेतव्ये नित्यं दुःखमतो वनम् ॥
तदलं ते वनं गत्वा क्षमं न हि वनं तव ।

अनेन वानप्रस्थधर्माः कथिताः । तथा च मनुः— 'वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा । जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥ यद्भक्षयेत्ततो दद्याद्बलिं भिक्षां च शक्तितः । अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतम् ॥' आपस्तम्बोऽपि— 'तस्यारण्यमाच्छादनं

विहितं ततो विहितैः फलैः पर्णैर्मूलैरिति वर्तयंश्चरेत् ।' गौतमोऽपि—'वैखानसो वने मूलफलाशी तपः शीलयेत्' इति । कूर्मपुराणे — 'ब्रह्मचारी भवेन्नित्यं न पत्नीं प्रति-संश्रयेत् । यस्तु पत्न्या समं गत्वा मैथुनं कामतश्चरेत् ॥ तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः ॥' मनुरपि— 'वर्जयेन्मधुमांसानि' इति । ननु गृहस्थेन सता रामेण कथं वानप्रस्थधर्मा अनुष्ठेया उच्यन्ते? नायं दोषः । रामस्य वनप्रस्थापनसमये जटावल्कलादीनां कैकेय्या प्रत्तत्वेन अपरित्यक्तगृहस्थधर्मस्यैव रामस्य वानप्रस्थधर्माः केचन अनुष्ठेयाः कथिताः । अन्यथा मधुमांसभक्षणस्त्र्युप-गमनपुनर्नगरप्रवेशराज्यपरिपालनादीनां दर्शनं विरुध्यते इति । एकोनत्रिंशे— तद्वचनश्रवणसंजातदुःखा सीता, स्वनिवर्तनपरं रामभद्रमेवमवादीत् । त्वद्रूपसंदर्शनसंजात-संत्रासेन पलायमानेषु भयहेतुभूतेषु हिंस्रमृगेषु त्वया सह निर्भयं वनं प्रविशामि । त्वदुदाहृतमखिलमपि दोषजातं गुण इत्येवमपि गुरुजनाज्ञया त्वया सह वनगमनमेव श्रेयः, त्वद्विना चाहं क्षणमपि जीवितुं न प्रभवामि ।

श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम् ।
इह लोके च पितृभिर्या स्त्री यस्य महामते ॥

अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्यसा ।
भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः ॥

नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम् ।
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥

इति सकरुणमभिदधानामपि सीतां निवर्तनैकमती रामभद्रः पुनरपि बहुप्रकारं सान्त्वयामास । त्रिंशे— ततः

सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा ।
प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् ॥

किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः ।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥
अनृतं बत लोकोऽयमज्ञानाद्यद्धि वक्ष्यति ।
तेजो नास्ति परं रामे तपतीव दिवाकरे ॥

किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ।
यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥

अत्र सीताकृतभर्त्रैधिक्षेपः प्रणयमूलत्वान्न दोषावहः । अत एव प्रणयाच्चाभिमानाच्चेत्युक्तम् । इदं तु प्रागेव प्रतिपादितम् ।

द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् ।
सावित्रीमिव मां विद्धि त्वमात्मवशवर्तिनीम् ॥

अत्र अन्यासु बह्वीषु पतिव्रतासु सतीषु सावित्र्या एव दृष्टान्तत्वेनोपादानं तस्या भर्त्रात्मपितृमातृश्वश्रूश्वशुरोद्धारकत्वेन सर्वापेक्षयातिशयितत्वात् । तथा च भारते, मद्रदेशाधिपतिः सुतार्थं सावित्रीं परिचर्य तत्प्रसादादनवद्यसर्वावयवां रूपिणीमिव श्रीदेवीं सावित्रीनाम्नीं कन्यकामवाप्य सदृशवरालाभभयभेदखिद्यमानमानसस्तामेव दुहितरमभिलषितवरान्वेषणाय प्रेषयमास । सा तु हैमं रथवरमास्थाय वृद्धैरमात्यैः सह नगरोपवनानि सर्वाणि च तीर्थानि सर्वानाश्रमानभिगम्य पुनरपि सभायां नारदेन सह तास्ताः कथाः कथयन्तं स्वपितरमासाद्य सविनयमिदमभाषत—'अस्ति खलु साल्वाधिपतिर्द्युमत्सेनो नाम नरपतिः । स चारातिपरिगृहीतराज्यो बालपुत्रया भार्यया

सह वनं प्रविश्य तपस्तप्यमानः कालेनान्धो बभूव; तत्पुत्रः सत्यवानखिलकलाकुशलः दर्शनमात्रेण हृदयानन्दकरो ममानुरूपो भर्तेति मनसा निश्चयमकरवम्' इति। ततः कोऽयं किमाचार इति राज्ञा पृष्टो देवर्षिर्नारदः समुदाजहार—'महेन्द्र इव वीरश्च वसुधेव क्षमान्वितः। सांकृते रन्तिदेवस्य स्वशक्त्या दानतः समः। ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा॥ ययातिरिव चोदारः सोमवत्प्रियदर्शनः। रूपेणान्यतमोऽश्विभ्यां युमत्सेनसुतो बली। एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति॥ संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति' इति। तद्वचनादन्यं वृणीष्व नायं तवानुकूलो वर इति वदन्तं स्वपितरं सावित्र्युवाच— 'सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददामीति त्रीण्येतानि सकृत्सकृत्॥ दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोऽपि वा। सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम्॥ मनसा निश्चयं कृत्वा ततो वाचाभिधीयते। क्रियते कर्मणा पश्चात्प्रमाणं मे मनस्ततः॥' इति। ततः स्थिरबुद्धिं दुहितरम-

वलोक्य सत्यवता पाणिं ग्राह्यामास। सावित्र्यपि, अपरमिव दैवतं भर्तारं परिचरन्ती नारदोक्तपतिमरणदिवसं संनिहितमेवावगत्य त्रिरात्रं व्रतमकरोत् । प्राप्ते च तस्मिन्दिवसे विधिवदग्निं प्रज्वाल्य हुत्वा चाहुतीः श्वशुरौ समीपवर्तिनौ ब्राह्मणांश्च प्रणम्य तेभ्यश्चावैधव्याशिषः परिगृह्य समिदाहरणाय वनमभिगच्छन्तं भर्तारमनुव्रज। सत्यवानपि काष्ठानयनजनितश्रमशिरोवेदनया तस्या उत्सङ्गे सुखं सुष्वाप। ततः सा नारदवचो विमृशन्ती तपस्विनी। तं मुहूर्तं क्षणं वेलां दिवसं च युयोज ह ॥ ततः सत्यवतः पार्श्वे पाशहस्तं यममवलोक्य 'किमागमनकृत्यं किंनिमित्तं वा न दूतान्प्रेषितवानसि' इति सावित्र्या पृष्टो यमः, 'त्वमपि पतिव्रतानामग्रगण्येति ब्रवीमि धर्मसंयुक्तः सत्यवान्नन्यैर्नेतुमशक्य इति स्वयमेवागतोऽस्मि' इत्यवादीत् । ततः सत्यवतः कायात्पाशबद्धं वशंगतम् । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् । अथ सत्यवन्तमादाय दक्षिणां दिशमभिगच्छन्तं यममनुसरन्ती सावित्री निवर्तस्वेति तेनोक्ता तमाह— 'यत्र मे नीयते भर्ता स्वयं वा यत्र

गच्छति । मया च तत्र गन्तव्यमेष धर्मः सनातनः ॥ तपसा गुरुभक्त्या च भर्तुः स्नेहाद्व्रतेन च । तव चैव प्रसादेन न मे प्रतिहता गतिः ॥ प्राहुः साम्नपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः । मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥' सावित्र्युवाच—'नानात्मवन्तस्तु वने चरन्ति धर्मं च वासं च परिश्रमं च । विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ एकस्य धर्मेण सतां मतेन सर्वे स्म तं मार्गमनुप्रपन्नाः । मा वै द्वितीयं मा तृतीयं च वाऽब्रूत्तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥' यमः—'निवर्त तुष्टोऽस्मि तवानघा गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया । वरं वृणीष्वेह विनास्य जीवितं ददानि ते सर्वमनिन्दिते वरम् ॥' सावित्र्युवाच—'च्युतः स्वराष्ट्राद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाश्रमे । स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ॥' यम उवाच— 'ददानि तेऽहं तमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा । तवाध्वना ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ॥' सावित्र्युवाच—

'श्रमः कुतो भर्तृसमीपतो हि मे यतो हि भर्ता मम सा गतिर्ध्रुवा । यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ॥ सतां सकृत्संगतमीप्सितं परं ततःपरं मित्रमिति प्रचक्षते । न चाफलं सत्पुरुषेण संगतं ततः सतां संनिविशेत्समागमे ॥' यम उवाच— 'मनोनुकूलं बुधबुद्धिवर्धनं त्वया यदुक्तं वचनं हिताश्रयम् । विना पुनः सत्यवतोऽस्य जीवितं वरं द्वितीयं वरयस्व भामिनि ॥' सावित्र्युवाच— 'हृतं पुरा मे श्वशुरस्य धीमतः तमेव राज्यं लभते स पार्थिवः । जह्यात्स्वधर्मान्न च मे गुरुर्यथा द्वितीयमेतं वरयामि ते वरम् ॥' यम उवाच—'स्वमेव राज्यं प्रतिपत्स्यतेऽचिरान्न च स्वधर्मात्परिहास्यते नृपः । कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व न ते श्रमो भवेत् ॥' सावित्र्युवाच— 'प्रजास्त्वयैतानि यमेन संयता नियम्य चैता नयसे निकामया ॥ ततो यम त्वं तव देवविश्रुतं निबोध चेमां गिरमीरितां मया । अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा । अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ एवंप्रायश्च

लोकोऽयं मनुष्या भक्तिपेशलाः । सन्तः स्वे बान्धवमित्रेषु दयां प्राप्तेषु कुर्वते ॥' यम उवाच— 'पिपासितस्येव भवेदथा पयस्तथा त्वया वाक्यमिदं समीरितम् । विना पुनः सत्यवतोऽस्य जीवितं वरं वृणीष्वेह शुभे यदिच्छसि ॥' सावित्र्युवाच— 'ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम् । कुलस्य संतानकरं च यद्भवेत्तृतीयमेतद्वरयामि ते वरम् ॥' यम उवाच— 'कुलस्य संतानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे । कृतेन कामेन नराधिपात्मजे निवर्त्त दूरं हि पथस्त्वमागता ॥' सावित्र्युवाच— 'न दूरमेतन्मम भर्तृसंनिधौ मनो हि मे दूरतरं प्रधावति । अथ व्रजन्नेव गिरं समुद्यतां मयोच्यमानां शृणु भूय एव च ॥ विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः । शमेन धर्मेण च रक्षिताः प्रजास्ततस्त्वेहेश्वर धर्मराजता ॥ आत्मन्यपि न विश्वासस्तथा भवति सत्सु यः । तस्मात्सत्सु विशेषेण सर्वैः प्रणयमिच्छति ॥ सौहृदात्सर्वभूतानां विश्वासो नाम जायते । तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ॥'

यम उवाच— 'उदाहृतं ते वचनं यदङ्गने श्रुतं न तादृक्त्वदृते श्रुतं मया । अनेन तुष्टोऽस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ॥' सावित्र्युवाच— 'ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत्कुलोद्वहम् । शतं सुतानां बलवीर्यशालिनामिदं चतुर्थं वरयामि ते वरम् ॥' यम उवाच— 'शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले । परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥' सावित्र्युवाच— 'सतां सदा शाश्वतधर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ति । सतां सद्भिर्नाफलः संगमोऽस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥ सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति । सन्तो गतिर्भूतभव्यस्य राजन्सतां मध्ये नावसीदन्ति सन्तः ॥ आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम् । सन्तः परार्थं कुर्वाणा नावेक्षन्ति परस्परम् ॥ न च प्रसादः सत्पुरुषेषु मोघो न चाप्यर्थो नश्यति नापि मानः । यस्मादेतन्नियतं सत्सु नित्यं तस्मात्सन्तो रक्षितारो भवन्ति ॥' यम उवाच—

'यथा यथा भाषसि धर्मसंहितं मनोनुकूलं सुपदं महार्थवत् । तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते ॥' सावित्र्युवाच— 'न तेऽपवर्गः सुकृतादृनाकृतस्तथा यथान्येषु वरेषु मानद । वरं वृणे जीवतु सत्यवानयं यथा मृता ह्येवमहं पतिं विना ॥ न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् । न कामये भर्तृविनाकृता श्रियं न भर्तृहीना व्यवसामि जीवितुम् ॥ वरातिसर्गः शतपुत्रता मम त्वयैव दत्तो ह्रियते च मे पतिः । वरं वृणे जीवतु सत्यवानयं तवैव सत्यं वचनं भविष्यति ॥' मार्कण्डेय उवाच— 'तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः । धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥' यम उवाच— 'एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि । अरोगस्तव नेयश्च सिद्धार्थः स भविष्यति ॥ त्वयि पुत्रशतं चैव सत्यवाञ्जनयिष्यति । ते चोप सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः । ख्यातास्त्वन्नामधेयाश्च भविष्यन्तीह शाश्वताः ॥ मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः । भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्रिदशोपमाः ।'

एवं तस्यै वरं दत्त्वा धर्मराजः प्रतापवान्। निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ॥ सावित्र्यपि वमे याते भर्तारं प्रतिलभ्य च। जगाम तत्र भर्त्रास्य भर्तुः श्यावं कलेवरम्॥ सा भूमौ प्रेक्ष्य भर्तारमुपसृत्योपगृह्य च। उत्सङ्गे शिर आरोप्य भूमावुपविवेश ह॥ संज्ञां च स पुनर्लब्ध्वा सावित्रीमभ्यभाषत। प्रोष्यागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै॥ सत्यवानुवाच—'सुचिरं बत सुप्तोऽस्मि किमर्थं नावबोधितः। क्व चासौ पुरुषः श्यामो योऽसौ मां संचकर्ष ह॥' ततो रजन्यां व्युष्टायामखिलेन यथावृत्तमाख्यास्यामि; त्वद्वियोगजनितखेदकलुषितान्तःकरणौ पितरौ जीवितसंशयमेष्यतः; तदधुनैव गच्छाव इति सावित्र्याभिहितः सत्यवांस्तया सह स्वमाश्रमं प्रायात्। अत्रान्तरे लब्धचक्षुर्द्युमत्सेनः चिरकालगतसुतपदवीमार्गणाय नदीनदाश्रमोपवनानि इतस्ततः सभार्यः संचरंस्तदसंदर्शनेन च परिमुषितमिवात्मानं मन्वानः हा पुत्र हा साध्वि क्वासि देहि मे प्रतिवचनमिति सकरुणं विलपन्यदृच्छया समागतैराश्रमवासिमुनिजनैः समाश्वस्य सकरुणमेवम-

भाणि। सुवर्चा उवाच— 'यथास्य भार्या सावित्री तपसा च दमेन च। आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥' भरद्वाजः—'यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः। अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान्।' दाल्भ्य उवाच— 'यथा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथातथम्। गताहारमकृत्वा च तथा जीवति सत्यवान् ॥' ततो मुहूर्तात्सावित्र्या सह सत्यवान्स्वमाश्रममागम्य पितरौ सर्वांश्चाश्रमवासिनो मुनीन् अभिवाद्य तैश्च किंनिमित्तं चिरादागमनं को वा प्रतिबन्धस्तवाभूदिति पृष्टः—काष्ठपाटनसंजातशिरोवेदनया चिरमहं सुप्तो न किमपि अवेदिषमित्यब्रवीत्। सावित्री तु तैश्चोद्यमाना सर्वमपि निजवृत्तान्तमाचचक्षे। तद्वचनश्रवणसंजातविस्मयैस्तदाश्रमवासिमुनिजनैः सादरमेवमभाणि। 'निमज्जमानं व्यसनैरभिद्रुतं कुलं नरेन्द्रस्य तमोमये ह्रदे। त्वया सुशीलव्रतपुण्यया कुलं समुद्धृतं साध्वि पुनः कुलीनया ॥' ततः प्रभातायां रजन्यामुदिते च दिनकरमण्डले कृताह्निकक्रियेषु तपोधनेषु द्युमत्सेनोऽपि स पुत्रकृतनित्यक्रियः सावि-

त्रीकथितां कथां पुनः पुनः कथयन्नमन्दानन्दह्रदयोऽभूत् । अत्रान्तरेऽमात्यनिहतारातिवर्गं निराबाधं जनपदं शासितुं प्रयाहि चातकालिर्जलदमिव त्वदभिगमनमभिकाङ्क्षति चतुरङ्गबलमध्यास्स्व च चिररात्राय पितृपैतामहपदमिति साल्वेभ्यः समागतानां प्रकृतीनां श्रवणसुखमञ्जननानि वचनानि श्रुत्वा तदैव समीपवर्तिनो मुनीनभिवाद्य रथगजतुरगपदादिचतुरङ्गबलपरिवृतो महता रथेन स्वनगरं जगाम । ततोऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ॥ पुत्रं चास्य महात्मानं यौवराज्येऽभ्यषेचयन् । ततः कालेन महता सावित्र्याः कीर्त्तिवर्धनम् ॥ तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् । भ्रातॄणां सोदराणां च तथैवास्याभवच्छतम् ॥ मद्राधिपस्याश्वपतेः मालव्यां सुमहद्बलम् । एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ॥ भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम् ।' इति ॥

न त्वहं मनसाप्यन्यं द्रष्टास्मि त्वदृतेऽनघ ।
त्वया राघव गच्छेयं यथान्या कुलपांसनी ॥
स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् ।
शैलूष इव मां राम परेभ्यो दातुमिच्छसि ॥

यच्च पथ्यं च रामात्थ यस्य चार्थेऽवरुध्यसे ।
त्वं तस्य भव वश्यश्च विधेयश्च सदानघ ॥

कुशकाशशरेषीका ये च कण्टकिनो द्रुमाः ।
तूलाजिनसमस्पर्शा मार्गे मम सह त्वया ॥

पत्रं मूलं फलं यत्त्वमल्पं वा यदि वा बहु ।
दास्यसि स्वयमाहृत्य तन्मेऽमृतरसोपमम् ॥

यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना ।
इति जानन्परां प्रीतिं गच्छ राम मया सह ॥

अनेन पतिव्रताधर्मा उक्ताः । प्रपञ्चितं चैतत्प्रागेव ।
इति सा शोकसंतप्ता विलप्य करुणं बहु ।
चुक्रोश भृशमायस्ता पतिमालिङ्ग्य सस्वरम् ॥

तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम् ।
उवाच वचनं रामः परिविश्वासयंस्तदा ॥

यत्सृष्टासि मया सार्धं वनवासाय मैथिलि ।
न विहातुं मया शक्या कीर्त्तिरात्मवता यथा ॥

एष धर्मश्च सुश्रोणि पितुर्मातुश्च वश्यता ।
अतश्चाहं व्यतिक्रम्य नाहं जीवितुमुत्सहे ॥

स्वाधीनं समतिक्रम्य पितरं मातरं गुरुम् ।
अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ॥

यत्र यत्र त्रयो लोकाः पवित्रं तत्समं भुवि ।
नान्यदस्ति शुभापाङ्गे तेनेदमभिराध्यते ॥

न सत्यं दानमानौ वा न यज्ञाश्चाप्तदक्षिणाः ।
तथा बलकराः सीते यथा सेवा पितुर्मम ॥

स मां पिता यथा शास्ति सत्यधर्मपथे स्थितः ।
तथा वर्तितुमिच्छामि स हि धर्मः सनातनः ॥

ममासन्ना मतिः सीते त्वां नेतुं दण्डकावनम् ।
आरभस्व शुभश्रोणि वनवासक्षमाः क्रियाः ॥

ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम् ।
देहि स्वभृत्यवर्गेभ्यो ब्राह्मणानामनन्तरम् ॥

एवमुक्ता सीता तद्वचनशीता तद्वचनश्रवणसंजातसंतोषेण धनानि दातुमुपचक्रमे । ननु वनगमनकारणं किमिति सीतया पृष्टोऽपि रामः,

स्वाधीनं समतिक्रम्य पितरं मातरं गुरुम् ।
अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ॥

इति किमर्थमुक्तवानिति चेन्न; कैकेयीदशरथसंनिधाने प्रत्यक्षदेवतात्ववचनमुपचारार्थमेवेति शङ्का स्यादिति तन्निवृत्त्यर्थं पित्रोरसंनिधानेऽपि पुनरपि स्वहृदयभूतां सीतां प्रत्युक्तवानिति न दोषः। नन्वेवमपि 'नाम्नां स्नेहो नरैः कार्यस्तथैवेर्ष्या जनेश्वर। खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव हि॥' इति, 'अत्यन्तबलभोऽसीति विस्रम्भः स्त्रीषु न व्रजेत्' इत्यादिवचनेन 'कश्चिन्न श्रद्दधत्यासां कश्चिद्गुह्यं न भाषते' इति धर्मपुत्रं प्रति विश्वासगुह्यभाषणनिषेधकनारदवचनेन, स्त्रीषु विस्रम्भो न कर्तव्यः। एवं सति,

वचनं तन्नयति मां पितुः सत्योपबृंहितम्।
एष धर्मश्च सुश्रोणि पितुर्मातुश्च वश्यता॥

इत्यादिधर्मरहस्यवचनं रामेण विस्रम्भपूर्वकं सीतां प्रति कथमुक्तमिति चेत्; न। स्त्रीणां विस्रम्भनिषेधस्तु असत्स्त्रीविषयः, अत एव रामोऽपि 'समस्थमनुरज्यन्ति विषमस्थं त्यजन्ति च' इत्यसत्स्त्रीस्वभावः सीतायामपि वर्तते वा न वेति शङ्कया विषमकाले तद्धृदयं ज्ञातुं वन-

दोषानुदाहृत्य त्वमत्रैव तिष्ठेति अभिहितवान् । ततः

यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना ।
इति जानन्परां प्रीतिं गच्छ राम मया सह ॥

इत्येवमादिवचनैर्विषमकालेऽपि स्वेन सह वनवासदृढनिश्चयाम्

तव सर्वमभिप्रायमविज्ञाय शुभानने ।
वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥

इत्यभिधानपूर्वकं स्वस्मिन्सीतानुरागं सौशील्यं च जानन्विस्रंभपूर्वकं 'वचनं तन्नयति मां पितुः सत्योपबृंहितम्' इत्यादिधर्मरहस्यवचनं स्वहृदयभूतां सतीं सीतां प्रत्युक्तवानिति न दोषः । अत्र,

किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः ।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥

इत्यादिप्रकारेण बहुविधमधिक्षिप्तोऽपि रामः,

क्रोधाविष्टां तु वैदेहीं काकुत्स्थो बहुसान्त्वयत् ।

इति सान्त्ववचनमेवोक्तवानित्यवगम्यते । तथा

स हि धर्मो मम द्वेष्यः प्रसङ्गाद्यस्य मुह्यसि ।
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥

इत्यादिप्रकारेण पितरं स्वं चाधिक्षिपन्तं लक्ष्मणमपि

विमृज्य बाष्पं परिसान्त्व्य चासकृ-
त्स लक्ष्मणं राघववंशवर्धनः ।

इत्येवमादिप्रकारेण सान्त्ववचनमेव उक्तवानित्यवगम्यते । अग्रेऽपि 'न क्रुध्यत्यभिशप्तोऽपि' इत्यादिवचनेन च सर्वविषयेऽपि सहनं प्रतीयते । तत्र 'न क्रुध्यति' इति वचनस्य मातृसमुदीरितत्वात्, तासां च मान्यत्वात् तत्कृताधिक्षेपसहनं न्याय्यम् । सीतालक्ष्मणयोस्तु शिक्षणीयत्वेन तत्कृताधिक्षेपसहनं युक्तमेव । तथा च मनुः— 'ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः । बृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ॥ मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया । दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥ एतैर्विवादं संत्यज्य सर्वपापैः प्रमुच्यते । एतैर्जितश्च जयति सर्वाँल्लोकानिमान्गृही ॥ आचार्यो

ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः । अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ॥ जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः । संबन्धिनो द्युलोकस्य पृथिव्यां मातृमातुलौ ॥ आकाशेशास्तु विज्ञेया बालवृद्धातुराः कृशाः । भ्राता ज्येष्ठः समः पित्रा भार्यापुत्रौ स्वका तनुः ॥ छाया स्वदासवर्गस्तु दुहिता कृपणं परम् । तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा ॥' इति । मोक्षधर्मे युधिष्ठिरं प्रति व्यासवचनमपि— 'ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः । वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ॥ मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया । दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥ एतान्विमुच्य संवादान्सर्वपापैः प्रमुच्यते । एतैर्जितस्तु जयति सर्वलोकान्न संशयः ॥ आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः । अतिथिस्त्विन्द्रलोकेशो देवलोकस्य ऋत्विजः ॥ जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः । संबन्धिबान्धवा दिक्षु पृथिव्यां मातृमातुलौ ॥ वृद्धबालातुरकृशास्त्वाकाशे प्रभविष्णवः । भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः

स्वका तनुः ॥ छाया स्वा दासवर्गश्च दुहिता कृपणं परम् । तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः ॥ गृहधर्मपरो विद्वान्धर्मशीलो जितक्रमः ।' इति । एकत्रिंशे— ततः सीतया सह वनगमने कृतनिश्चयं रामभद्रमवलोक्य शोकाकुलहृदयो लक्ष्मणः भ्रातुश्चरणौ उपसंगृह्य,

यदि गन्तुं कृता बुद्धिर्वनं मृगगजायुतम् ।
अहं त्वानुगमिष्यामि वनमग्रे धनुर्धरः ॥
न देवलोकाक्रमणं नामरत्वमहं वृणे ।
ऐश्वर्यं वापि लोकानां कामये न त्वया विना ॥

इत्यवादीत् । अनेन इतरैरपि कनिष्ठैः प्राप्तस्वर्गादिसुखपरित्यागपूर्वकमतिक्लेशमनुभूयापि पितृसमो ज्येष्ठो भ्रातानुसर्तव्य इति धर्मः सूचितः । तथा च मनुः— 'पितेव पालयेत्पुत्राञ्ज्येष्ठो भ्राता यवीयसः । पुत्रवच्चापि वर्तेरञ्ज्येष्ठे भ्रातरि धर्मतः ॥' इति । पुराणसारेऽपि—'कनिष्ठास्तन्नमस्थेरन्सर्वे च्छन्दानुवर्तिनः । तमेव चोपजीवेरन्यथैव पितरं तथा ॥' इति । भीष्मपर्वण्यपि— 'ततो युधिष्ठिरो दृष्ट्वा युद्धाय सुसमुद्यते । ते सेने सागरप्रख्ये

मुहुः प्रचलिते नृप ॥ विमुच्य कवचं वीरो निक्षिप्य च वरायुधम् । अवरुह्य रथात्तूर्णं पद्भ्यामेव कृताञ्जलिः ॥ पितामहमभिप्रेक्ष्य धर्मपुत्रो युधिष्ठिरः । वाग्यतः प्रययौ येन प्राङ्मुखो रिपुवाहिनीम् ॥ तं प्रयान्तमभिप्रेक्ष्य कुन्तीपुत्रो धनंजयः । अवतीर्य रथात्तूर्णं भ्रातृभिः सहितोऽभ्यगात् ॥' इति। सभापर्वण्यपि युधिष्ठिरः— 'श्यामो युवा लोहिताक्षः सिंहस्कन्धो महाभुजः । नकुलो गूढ एवैको विध्येरन्मम तद्धनम् ॥ अयं धर्मान्सहदेवोऽनुशास्ति लोके ह्यस्मिन्पण्डिताख्यां गतश्च । अनर्हता राजपुत्रेण तेन दीव्याम्यहं चाप्रियवत्प्रियेण ॥ यो नः संख्ये नौरिव पारनेता जेता रिपूणां राजपुत्रस्तरस्वी। अनर्हता राजपुत्रेण तेन दीव्याम्यहं शकुने फाल्गुनेन ॥ यो नो नेता यो युधानं प्रणेता यथा वज्री दानवशत्रुरेकः । तिर्यक्प्रेक्षी संनतभ्रूर्महात्मा सिंहस्कन्धो यश्च सदात्यमर्षी ॥ बलेन तुल्यो यस्य पुमान्न विद्यते गदाभृतामग्र्य इहारिमर्दनः । अनर्हता राजपुत्रेण तेन दीव्याम्यहं भीमसेनेन राजन्' इति। तत्रैव दुर्योधनं प्रति भीमसेनः

'ईशानः पुण्यतपसां प्राणानामपि चेश्वरः । मन्यते जितमात्मानं यद्येष विजिता वयम् ॥' इति । एवं महाप्रस्थाने कनिष्ठकृतं ज्येष्ठानुवर्तनम्—'ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् । गमनाय मतिं चक्रे भ्रातरश्चास्य ते तदा । ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः । विसृज्याभरणान्यङ्गाज्जगृहे वल्कलान्युत ॥ भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी । तथैव जगृहुः सर्वे वल्कलानि नराधिप । हर्षोऽभवद्धि सर्वेषां भ्रातॄणां गमनं प्रति । युधिष्ठिरमतं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च ॥ युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् । अर्जुनस्तस्य चान्वेव यमौ चापि यथाक्रमम् ॥ पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा । द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम ॥' इति । ततस्तद्वचनमाकर्ण्य मद्वियोगेन कैकेयीकृततिरस्कारेण च क्लिश्यमानायाः स्मरणमपि न करिष्यति । अतस्तद्रक्षणायात्रैव स्थेयं तेन चाहमपि पूजितो भवामीति राममुदीरितं वचनमाकर्ण्य लक्ष्मण एवमवादीत् ।

कौसल्या बिभृयादार्या सहस्रमपि मद्विधान् ।
यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीवनम् ॥

भरतोऽपि त्वत्तेजसः चकितहृदयः कौसल्यां परिचरिष्यति ।

कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ।
भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥

इति । ननु, ज्येष्ठभ्राता पितृसमो मृते पितरि भूसुराः । कनिष्ठास्तं नमस्येरन्सर्वे च्छन्दानुवर्तिनः ॥ इत्यादिस्मृतिपर्यालोचनया पितुरनन्तरमेव ज्येष्ठभ्रात्रनुसरणस्य कर्तव्यत्वावगमेन तद्विरुद्धतया विद्यमान एव पितरि लक्ष्मणेन ज्येष्ठभ्रात्रनुसरणं कथं कृतम् 'तस्यां शुश्रूषा नित्या पतितायामपि' इत्यापस्तम्बवचनपर्यालोचनया मातृशुश्रूषणस्य अवश्यकर्तव्यत्वावगमेन मातृशुश्रूषणं वा कथं वा न कृतम् इति चेन्न । पित्रोः संमतत्वेन ज्येष्ठानुसरणस्य युक्तत्वात् । पितृसंमतत्वं च,

रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ।

कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते ॥

इति युद्धकाण्डस्थदशरथवचनादवगम्यते। तथा मातृसंमतत्वमपि,

व्यसनी वा समृद्धो वा गतिरेष तवानघ।
एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ॥

इदं हि वृत्तमुचितं कुलस्यास्य सनातनम्।
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ॥
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्।

इत्यत्रैव सुमित्रावचनादवगम्यते। ततः प्रसन्नहृदयेन रामेण वनगमनाय कृताभ्यनुज्ञो लक्ष्मणः तदाज्ञया आचार्यसद्मनि नित्यं पूजिते सखड्गे रौद्रे धनुषी अभेद्यकवचम्, अक्षय्यसायकौ तूणी चादाय रामाय निवेदयामास—

तमुवाचात्मवान्रामः प्रीत्या लक्ष्मणमागतम्।
अहं प्रदातुमिच्छामि यदिदं मामकं धनम् ॥
ब्राह्मणेभ्यस्तपस्विभ्यस्त्वया सह परंतप।
वसन्तीह दृढं भक्त्या गुरुषु द्विजसत्तमाः ॥
तेषामपि च मे भूयः सर्वेषां चोपजीविनाम्।

वसिष्ठपुत्रं च सुयज्ञमार्यं
त्वमानयाशु प्रवरं द्विजानाम् ।
अभिप्रयास्यामि वनं समस्ता-
नभ्यर्च्य शिष्टानपरान्द्विजातीन् ॥

इति । ननु, अहं प्रदातुमिच्छामीत्यादिवचनैः,

अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः ।
ब्राह्मणेभ्यो धनं दत्त्वा सर्वं चैवोपजीविनाम् ॥

इत्यग्रे सुमन्त्रवचनेन च रामेण जीवति पितरि द्रव्यदानं कृतमित्यवगम्यते । तदेतन्नोपपद्यते । 'ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरस्तथा । भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ भार्या पुत्रश्च दासश्च त्रय एतेऽधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥' इति मनुवचनेन ऊर्ध्वं पितुः पुत्रा रिक्थं भजेरन् । 'निवृत्ते रजसि मातुः' इति गौतमवचनेन 'जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः' इति याज्ञवल्क्यवचनेन च पितुरूर्ध्वमेव द्रव्यस्वामित्वस्वातन्त्र्ययोरवगमेन जीवति पितरि द्रव्यस्वामित्वाभावेन स्वातन्त्र्या-

भावेन च पुत्रेण दातुमशक्यत्वादिति चेत्, न। रामस्य उत्पत्तिप्रभृति पित्र्यादिधने स्वामित्वमस्त्येव। तथा हि स्वत्वं तावन्न शास्त्रैकश्रुत्येकसमधिगम्यं किं तर्हि लौकिकप्रमाणगम्यम्। लौकिकाश्च पुत्रजन्मप्रभृत्येव पुत्रे द्रव्यस्वामित्वं व्यवहरन्ति। अतः पित्रार्जितधनेष्वपि उत्पत्तिप्रभृति स्वामित्वमस्त्येव। अयं चार्थः 'अधुना वर्ण्यते दायविभागे योगमूर्तिना' इत्येतच्छ्लोकव्याख्यानावसरे विज्ञानेश्वरेण विचारपूर्वकं निर्णीतः। तथा तत्र संदेहः—स्वस्य सतो विभागो विभागात्स्वत्वं वेति। तत्रापि किं लौकिकप्रमाणगम्यं स्वत्वम्, अथ वा शास्त्रैकसमधिगम्यमेव स्वत्वम्, अन्यथा स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु 'ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः' इति गौतमवचनवैयर्थ्यापत्तेः। अस्य चायमर्थः—रिक्थं पित्राद्यानन्तर्यप्राप्तं क्रयो मूल्येन द्रव्यान्तरस्वीकारः। संविभागो भ्रात्रादीनां साधारणस्य परस्परं विभागः। परिग्रहो वन्येषु अस्वामिकेषु वृक्षेषु तृणजलकाष्ठादिषु प्रथमस्वीकारः। एतेषु निमित्तेषु द्रव्य-

स्वामित्वं भवति। एतानि सर्ववर्णसाधारणानि स्वत्व-निमित्तानि। अथ ब्राह्मणस्याधिकं लब्धं याजनाध्यापन-प्रतिग्रहैर्यल्लब्धं तदधिकमसाधारणं स्वं ब्राह्मणस्य। क्षत्रि-यस्य विजितं विजयेन लब्धमधिकं स्वम्। निर्विष्टं वैश्य-शूद्रयोः निर्विष्टं कर्मोपात्तं वैश्यस्य कृष्यादिना शुश्रूषा-दिना शूद्रस्य च लब्धमधिकम् इति। धारणं स्वं तथा च एतादृशस्वत्वबोधकशास्त्रवैयर्थ्यापत्तेः। एतच्छास्त्र-मन्तरापि लोकत एकत एव स्वत्वावगमे उदाहृतस्वत्वबो-धकसूत्रवैयर्थ्यापत्तेः। तथा— 'यो दत्ता दायिनो हस्ता लिप्सेत ब्राह्मणो धनम्। याजनाध्ययनेनापि यथा स्तेनस्तथैव सः' इति चोरयाजनादिना द्रव्यमार्जयतां तत्समानदण्ड-विधानमनुपपन्नं स्यात्। लोकतश्चोरस्यापि स्वत्वसंभवेन तद्याजनेन धनग्राहिणः चौर्यप्रसक्त्यभावात्। अपि च लौकिकं चेत्स्वत्वं मम स्वमनेनापहृतमिदं दापयेति न ब्रूयात्। अपहर्तुरेव स्वत्वात्। अपि च सुवर्णरजतादि-स्वरूप इव अस्य स्वं अस्य वा स्वमिति संदेहो न स्यात्। यस्य हस्ते यद्वर्तते तस्य स्वं तदिति निश्चितत्वात्।

तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति। अत्रोच्यते—स्वत्वं लौकिकमेव लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवत्। न च पाकरूपलौकिकार्थक्रियासाधनत्वात् अदृष्टाहवनीयादीनामपि लौकिकत्वं स्यादिति वाच्यम्। विविधसंभारसंभृतदेशविशेषनिधानादिसंस्कृताग्निरूपाहवनीयस्य परिदृश्यमानवह्नित्वेन पाकसाधनत्वेऽपि अदृष्टाहवनीयरूपेण पाकसाधनत्वाभावात्। नैवं धने धनत्वेन क्रयसाधनत्वं संभवति, अपि तर्हि स्वकीयधनत्वेन अन्यथा अन्यदीयादपि धनात् आपणीयवस्तूनां क्रयविक्रयादिव्यवहारापत्तेः। अपि च अनाघ्रातशास्त्रगन्धानां भिल्लानां स्वत्वव्यवहारो न स्यात्। न चेष्टापत्तिः, तन्मूलक्रयविक्रयादिव्यवहारोच्छेदप्रसङ्गात्। किं च स्वत्वस्य लौकिकत्वाभावे 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इति लिप्सासूत्रतृतीयवर्णके 'याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेत्' इति द्रव्यार्जनोपायनियमः किं क्रत्वर्थः उत पुरुषार्थ इति संदिह्य क्रत्वर्थ इति पूर्वपक्षं प्रापय्य क्रतुप्रकरणाम्नानाभावात् पुरुषार्थतया याजनाध्यापनप्रतिग्रहार्जितैः द्रव्यैः

क्रतुनिर्वृत्तिसिद्धेश्च पुरुषार्थो द्रव्यार्जनोपायनियम इति सिद्धान्तं चाभिधाय पूर्वपक्षे नियमातिक्रमात् क्रतोर्वैगुण्यं न पुरुषः प्रत्यवैति इति योजनम्, सिद्धान्ते तु पुरुषः नियमातिक्रमात्प्रत्यवायं प्राप्नोति न क्रतोर्वैगुण्यमिति च प्रयोजनमभिहितम्; तदिदं सर्वमनुपपन्नं स्यात्। स्वत्वस्य शास्त्रैकसमधिगम्यत्वं वदता याजनादिशास्त्रेणैव स्वत्वस्यावगम इति वक्तव्यम्। तेन च नियतोपायैरेव आर्जितद्रव्येषु स्वत्वावगमेन अन्योपायसाध्ये द्रव्ये स्वत्वाभावेन तादृशद्रव्यार्जनप्रयुक्तप्रत्यवायस्य क्रतुवैगुण्यस्य चाप्रसक्तेः न चैवं चोरापहृतद्रव्येऽपि चोरस्वत्वं स्यादिति वाच्यम्। चौर्यस्य लोकतोऽपि स्वत्वसाधनत्वे विशादात्। न हि चौर्येण समानीतं द्रव्यं चोरस्वमिति लौकिका अपि व्यवहरन्ति। प्रत्युत चौर्यनिश्चये पुनरपि राज्ञा दापनीयत्वावगमात्। तथा च गौतमः— चोरहृतमुपावित्य यथास्थानं गमयेत् कोशाद्वा दद्यादिति। अविहितोपायसाध्ये च द्रव्ये स्वत्वमङ्गीकृत्यैव क्रयविक्रयादिना व्यवहरन्ति। नियमातिक्रमात्पुरुषः परं प्रत्यवायं प्राप्नोतीति अतः स्वत्वस्य

लौकिकत्वमुपपन्नमेवेति । यदुक्तं लौकिकत्वे स्वत्वस्य स्वत्वप्रतिपादकसूत्रवैयर्थ्यमिति तदपि न, मन्दबुद्धीनां व्यामोहनिराकरणार्थं न तु अप्राप्तस्वत्वविधानार्थमिति न सूत्रवैयर्थ्यशंका । यदपि चोरं याजकस्येत्यादि तदपि न द्रव्यस्यान्यदीयतया चोरस्य स्वतानिष्पत्तौ तेन त्यक्तुमशक्यतया तद्याजने प्रायश्चित्तं तद्द्रव्यपरिग्रहे चोरत्वं च भवत्येवेति चौर्यार्जितं द्रव्यं चोरस्वं न भवतीत्यनेनैव मदीयस्वमनेनापहृतमिति व्यवहारोऽप्युपपन्न एव। यदपि मदीयमन्यदीयं वेति संदेहो न स्यादिति तदपि न, उपायसंदेहेन तत्संदेहोपपत्तेः। तस्मात्स्वत्वं लौकिकप्रमाणगम्यमेव। एतादृशमपि स्वत्वं किमुत्पत्तिप्रभृति उत विभागादिनेति संदेहः । तत्तत्पूर्वपक्षः । विभागेनैव स्वत्वम् । अन्यथा जातपुत्रस्य आधानविधानं न स्यात् । उत्पन्नपुत्रसाधारणत्वात् द्रव्यस्य । न च पुत्रानुमत्या अधिकारः संभवतीति वाच्यम्, तथा सति विभागात् प्राक् सर्वानुमतिपूर्वकं पितृप्रसादलब्धस्याशौर्यभार्याधने चोभयंयत्र विद्याधनं लभेत् त्रीण्येतान्यपि भाज्यानि । प्रसादो यस्य पैतृ-

क इति वचनावगतविभागप्रतिषेधोऽनुपपन्नः स्यात्। पित्रा दत्ते धने विभागाप्राप्तेः। अपि च भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्। सा यथाकाममश्नीयात् दद्याद्वा स्थावरादृते इति वचनागतभर्तृकृतप्रीतिदानमप्युपपन्नं स्यात्। पुत्रादिसाधारणस्य द्रव्यस्य दानासंभवात्। तस्मान्न जन्मना स्वत्वं किं तु विभागेनैव। न चैवं विभागात् प्राक् पितुरूर्ध्वं चौरादिभिः ह्रियमाणं द्रव्यं केनचिन्निवार्यते पितुर्द्रव्यस्वामिनोऽभावात्। पुत्राणां च विद्यमानानामपि विभागाभावेन स्वत्वानिष्पत्त्या स्वामित्वाभावात्। किं च एकस्य पुत्रस्य पितुरूर्ध्वं स्वत्वं न स्यात् तत्प्रापकविभागाभावात्। न चेष्टापत्तिः। तन्मूलक्रयविक्रयादिसकलव्यवहारविलोपप्रसङ्गात् इति वाच्यम्। विभागवत् पित्रानन्तर्यस्यापि स्वत्वप्रापकत्वात्। तस्मान्न जन्मना स्वत्वम्। किं तु पितुरभावाद्विभागाद्वा स्वत्वम् इति। सिद्धान्तस्तु स्वत्वं लौकिकप्रमाणगम्यं न वैदिकमिति प्रतिपादितम्। तच्च उत्पत्त्यावगम्यते पुत्रजन्मसमनन्तरमेव द्रव्यस्वामी उत्पन्न

इति व्यवहारात् उत्पत्त्यैवार्थस्वामित्वं लभते इत्याचार्या इति गौतमवचनाच्च। न च उत्पत्तितः स्वत्वाङ्गीकारे विभागशास्त्रानर्थक्यप्रसङ्ग इति वाच्यम्। तस्य पुत्रादिषु समुदायद्रव्यनिरूपितस्वामित्वानाम् एकदेशे व्यवस्थापनार्थत्वेन वैयर्थ्याभावात्। यदुक्तमर्थसाध्याधानादिषु जातपुत्रस्य अधिकारो न स्यादिति, तन्न, तत्र विधानबलादेव साधारणद्रव्यसाध्याधानादिषु अधिकारसंभवात्। यथा राजसूये विधानबलादन्यदीयमेव द्रव्यं दक्षिणात्वेन न दीयते। तथा चापस्तम्बः— 'बार्हस्पत्यं चरुमिति द्वादशान्वहं रन्तिनां हवींषि यस्य गृहे निर्वपति तत इष्टिपरिवेषं दक्षिणा च'। अस्य चायमर्थः— बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो ग्रह इत्यादिवाक्यैः रन्तिनां हवींषि ब्राह्मणे राजन्यपि गृहेषु कर्तव्यत्वेन विहितानि तेषां च तत इष्टिपरिवेषं दक्षिणा चेति तत्तद्गृहस्वामिधनादेव दक्षिणादानं ब्राह्मणसंतर्पणं च कर्तव्यम् इति। तथा च स एवान्यत्र— वैष्णवं त्रिकपालं त्रयोदशं तक्षरथकारयोर्गृहे सर्वायसानि दक्षिणा तक्ष्णो रथकारस्य

वेति । यच्च पितृप्रसादलब्धानां विभागप्रतिषेधानुपपत्तिरिति तदपि न । समवेतैस्तु प्रत्यासं सर्वे तत्र समांशिन इति वचनेन अविभक्तानां भ्रातृसंपादितधनान्तरवत्पितृप्रसादलब्धस्यापि भ्रातृसंपादिततया विभागप्रसक्तौ तत्प्रतिषेधसंभवात् । यत्तु 'भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्' इत्यादिवचनावगतप्रीतिदानमनुपपन्नं स्यादिति । तदपि न । उत्पत्तितः स्वत्वेऽपि पुत्रसंमत्या प्रीतिदानसंभवात् पुत्रसंमत्यपेक्षणमपि न सर्वत्र ; किं तु स्थावरादिविषय एव 'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च' इत्यादिवचनैः चरेषु स्वातन्त्र्यावगमात् तदपि स्वातन्त्र्यं स्वार्जितमणिमुक्ताप्रवालादिविषयं पितामहार्जितमणिमुक्ताप्रवालादिषु तु स्वातन्त्र्यं पितृपुत्रयोः सममेव । तथा च याज्ञवल्क्यः— 'भार्यापितामहोपात्ता निबन्धो द्रव्यमेव च । तत्र स्यात्सदृशं साम्यं पितुः पुत्रस्य चैव हि ॥' अस्य चायमर्थः—भूः शालिक्षेत्रादिका निबन्धः क्रमुकपर्णादि भारः द्रव्यं रजतसुवर्णादि एतेषु अनार्जकत्वा-

विशेषात् स्वामित्वं सममेव। स्थावरे तु पित्रार्जिते पितामहार्जिते च पितुः पितामहस्य वा स्वातन्त्र्यं पुत्रसंमतिसापेक्षमेव। तथा च याज्ञवल्क्यः— 'स्थावरं द्विपदं चैव यद्यपि स्वयमार्जितम्। असंभूय सुतान्सर्वान्न दानं न च विक्रयः॥' 'ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः॥' अस्य चापवादः— 'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः॥' इति। अस्यार्थः— अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु च अनुज्ञादानादावसमर्थेषु भ्रातृषु वा तथाविधेष्वविभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणेऽवश्यकर्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोऽपि कुर्यादिति। तस्मात्स्थावरेषु पित्रा व्यवहारक्षमपुत्रादिसंमत्यैव क्रयविक्रयादिव्यवहारः। चरेषु तु न संमत्यपेक्षा। अतो भर्तृकृतप्रीतिदानमुत्पत्तिप्रभृति स्वत्वेऽप्युपपन्नमेवेति सिद्धमौत्पत्तिकं स्वत्वम्। न चैवं जीवतोः स्वतन्त्रः स्यात्।

भार्या पुत्रश्च दासश्च त्रय एतेऽधनाः स्मृताः' इत्यादि-वचनविरोधः। तस्य वचनस्य उत्पत्तिप्रभृति स्वामित्वे पित्राज्ञया विना पुत्रादिना न व्यवहर्तव्यमित्येवंपरत्वात् एवं च रामस्य उत्पत्तिप्रभृतिसकलद्रव्यस्वामित्वमस्त्येव तत्र साधारणद्रव्येषु व्यवहारार्थतया पित्राज्ञा अपेक्षिता। पितृप्रसादादिलब्धधनेषु तु स्वातन्त्र्यमप्यस्त्येव अत एव पितृप्रसादादिलब्धधनस्य अविभाज्यत्वमाह याज्ञवल्क्यः —'पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्' इति। मनुरपि— 'पितृद्रव्याविरोधेन यदन्यत्स्वयमार्जितम्। मैत्रमौद्वाहिकं चैव मधुपर्किकमेव च ॥ अनुपन्नप्यपितृद्रव्यं श्रमेण यदुपार्जयेत्। स्वयं मे हितलब्धं तं नाकामो दातुमर्हति ॥' इति। भारतेऽपि पितरि धृतराष्ट्रे जीवति दुर्योधनादीनां बहुरत्नधनवस्त्रादिकमसाधारण्येन यत्स्थितं तच्च धर्मपुत्रराज्याभिषेकानन्तरं भीमादीनामसाधारण्येन युधिष्ठिरेण दत्तमिति प्रतिपादितम्। राजधर्मे— 'ततो दुर्योधनगृहं प्रासादैरुपशोभितम्। बहुरत्नसमाकीर्णं दासीदाससमाकुलम् ॥ धृतराष्ट्राभ्यनुज्ञातो भ्रातृदत्तं वृको-

दरः । प्रतिपेदे महाबाहुर्मन्दरं मघवानिव ॥ यथा दुर्यो-धनगृहं तथा दुःशासनस्य तु । प्रासादमालासंयुक्तं हेम-तोरणसंयुतम् ॥ दासीदाससुसंपूर्णं प्रभूतधनधान्यवत् । प्रतिपेदे महाबाहुरर्जुनो राजशासनात् ॥ दुर्मर्षणस्य भवनं दुःशासनगृहाद्वरम् । कुबेरभवनप्रख्यं मणिहेमवि-भूषितम् ॥ नकुलाय महार्हाय कर्शिताय महाहवे । ददौ प्रीत्या महाबाहुर्धर्मसूनुर्युधिष्ठिरः ॥ दुर्मुखस्य च वेश्माग्र्यं श्रीमत्कनकभूषितम् । पूर्णपद्मदलाक्षीणां स्त्रीणां शयनसं-कुलम् ॥ प्रददौ सहदेवाय सततं प्रियकारिणे । मुमुदे तच्च लब्ध्वा स कैलासं धनदो यथा ॥' तथा दानार्थतया धृत-राष्ट्रेण द्रव्ययाचनाय प्रेषितं विदुरं प्रति धर्मपुत्रवाक्यम् 'यन्ममास्ति धनं किंचिदर्जुनस्य च वेश्मनि । तस्य स्वामी महाराजा इति वाच्यः स पार्थिवः ' इति । अने-नापि अर्जुनस्यासाधारणं द्रव्यमवगम्यते । अतः श्रीरामकृत-दानादिकं युक्तमेव ॥ द्वात्रिंशे— ततो गुरुपुत्रं सुयज्ञमा-नीय विविधभूषणगणैः स्वयमभिपूज्य तत्पत्न्यै सीता-हस्ताद्विविधहारहेमसूत्रपर्यङ्कास्तरणादिकं दापयित्वा राजा

गजसहस्रपरिवृतं शत्रुंजयनामानं गजराजं तस्मै दत्तवान् । सुयज्ञोऽपि तत्कृतां पूजामभि रामलक्ष्मणसीतानां प्रयुयोजाशिषः शिवाः । ततो लक्ष्मणोऽपि रामभद्राभ्यनुज्ञया अगस्त्यकौशिकावपि समानीय गोसहस्रेण उत्तमवस्त्रसुवर्णरजतैश्च पूजयामास ।

स चापि रामः प्रतिपूर्णपौरुषो
महद्धनं धर्मबलैरुपार्जितम् ।
नियोजयामास सुहृज्जनेऽचिरा-
द्यथार्हसंमानवचः प्रचोदितः ॥

द्विजः सुहृद्भृत्यजनोऽथ वा तदा
दरिद्रभिक्षाचरणश्च योऽभवत् ।
न तत्र कश्चिन्न बभूव तर्पितो
यथार्हसंमाननदानसंभ्रमैः ॥

अत्र यथार्हमिति विशेषणेन उत्कृष्टस्य निकृष्टपूजा निकृष्टस्य वा उत्कृष्टपूजा न कर्तव्येति सूचितम् । तथा च गौतमः— 'समासमाभ्यां विषमसमे पूजातः' इति । अस्यार्थः— कुलशीलविद्यादिभिस्तुल्यः समः आसना-

शनपरिचरणात्मिकायां पूजायां समेन वैषम्यप्रसक्तौ असमेन वा साम्यप्रसक्तौ तदन्नं न भोक्तव्यमिति । स एवान्यत्र 'शय्यासनावसथ अनुव्रज्योपासनानि सदृक्-श्रेयसोः समानि अल्पशोऽपि हीनः' इति । मनुरपि— 'आसनावसथौ शय्यामनुव्रज्यामुपासनम् । उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् ॥' इति । ततः समागतान्ब्राह्मणांस्तदभीष्टप्रदानेन परिपूर्णमनोरथान्विधाय तैश्च कृतस्वस्त्ययनः दशरथदर्शनाय स्वभवनान्निर्जगाम । अनेन सर्वैरपि यात्रासमये ब्राह्मणे गोहिरण्यादि दत्त्वा तदाशिषः परिग्राह्या इति सूचितम् । तथा च उद्योगपर्वणि पाण्डवैर्यात्रादानं कृतमित्यवगम्यते—'स्कन्धावारेण महता प्रययुः पाण्डुनन्दनाः । ददतो गोहिरण्यं च ब्राह्मणैरभिपूजिताः' इति । तत्रैव परशुरामं प्रति भीष्माभियाने 'ततः कृतः स्वस्त्ययनो मात्रा यं प्रति नन्दितः । द्विजातीन्वाच्य पुण्याहं स्वस्ति चैव महाद्युते' इति ॥ त्रयस्त्रिंशे—ततः पितुर्दर्शनाय स्वभवनान्निर्गम्य राजमार्गे पादचारेण गच्छन्,

यं यातमनुयाति स्म चतुरङ्गबलं महत् ।
तमेकं सीतया सार्धमनुयाति स्म लक्ष्मणः ॥

या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥

गच्छन्तमनुगच्छामो येन गच्छति राघवः ।
अस्माभिश्च परित्यक्तं पुरं संपद्यतां वनम् ॥

वनं नगरमेवास्तु येन गच्छति राघवः ।

इति पौरजनोदीरितवचनमाकर्ण्यापि अविचलितहृदयो रामभद्रः दशरथभवनमागम्य राज्ञः स्वागमनवृत्तान्तनिवेदनाय सुमन्त्रं प्रेषयामास । चतुस्त्रिंशे, ततो वनगमनकृतनिश्चयं स्वसंदर्शनसमुत्सुकं रामभद्रं सुमन्त्रमुखादवगत्य सकलावरोधजनपरिवृत उवाच राजा तं सुमन्त्रम् आनय मे सुतम् इति । ततः सुमन्त्रवचनाद्राजभवनं प्रविशन् लक्ष्मणेन सीतया चानुगम्यमानो रामभद्रः प्रेमातिशयेन स्वसमीपमभिद्रवन्तं मध्ये भूमौ मूर्च्छया पतितं पितरं पर्यङ्के समुपवेश्य,

अनुजानीहि सर्वान्नः शोकमुत्सृज्य मानद ।

लक्ष्मणं मां च सीतां च'

इत्यनेन त्रयाणामपि अनुज्ञाप्रार्थनमवगम्यते, तदनुपपन्नम्। रामलक्ष्मणयोरुभयोरेव पित्रधीनत्वेन तदाज्ञापेक्षायामपि भर्त्रधीनायाः सीताया दशरथानुज्ञां विनापि वनगमनसंभवादिति चेत्, न, सीतायाः भर्त्रधीनत्वेऽपि स्वस्य पित्रधीनतया स्वकर्तव्यम् अन्यथा प्रत्यवायो भवेदित्यभिप्रायेणैव वनं प्रति सीतां नेतुं विज्ञापनपूर्वकमनुज्ञाग्रहणसंभवात्। तथा च मनुः 'तेषामनुपरोधेन पारक्यं यद्यदाचरेत्। तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः।' इति। आनुशासनिके विपुलोपाख्यानेऽपि गुर्वनुज्ञया गुरुभार्यां रक्षितवतः शिष्यस्य रक्षणप्रकारानिवेदनमात्रेण दोषमाह गुरुः 'तथैव हि भवेयुस्ते लोकाः पापकृतो यथा। कृत्वानाचक्षतः कर्म मम तच्च यथाकृतम्॥ ते त्वां हर्षस्मितं दृष्ट्वा गुरोः कर्मानिवेदकम्। स्मारयन्तस्तथा प्राहुस्ते यथा श्रुतवान्भवान्॥' इति। ततो राजा रामभद्रमेवमब्रवीत्—

अहं राघव कैकेय्या वरदानेन मोहितः।

अयोध्यायास्त्वमेवाद्य भव राजा निगृह्य माम् ॥

इति। अत्र यद्यपि भव राजा निगृह्य मामितिवचनावगतं तन्निग्रहपूर्वकं स्वस्य राज्येऽभिषेचनमपि पित्राज्ञप्तमिति वनगमनवत्तदपि अवश्यं कर्तव्यमिति प्रतीयते, तथापि वने गच्छतः पुत्रस्य भूयान्क्लेशो भविष्यतीति विचिन्त्य स्नेहवशात्तथोक्तवान् न तात्पर्येण; अत एव समनन्तरमेव दशरथवचनम्।

न हि सत्यात्मनस्तात धर्माभिमनसस्त्व।
विनिवर्तयितुं बुद्धिः शक्यते रघुनन्दन ॥

श्रेयसे वृद्धये तात पुनरागमनाय च।
गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयम् ॥

छद्मना चलितस्त्वास्मि स्त्रिया च्छद्माग्निकल्पया।
वञ्चना या तु लब्धा मे तां त्वं निस्तर्तुमिच्छसि ॥

न चैतदाश्चर्यतमं यस्त्वं ज्येष्ठसुतो मम।
अपानृतकथं पुत्र पितरं कर्तुमिच्छसि ॥

अत एव च युद्धकाण्डेऽपि—

तारितोऽहं त्वया पुत्र सुपुत्रेण महात्मना।

अष्टावक्रेण धर्मात्मा तारितो ब्राह्मणो यथा ॥

इति वनगमनमेवाभ्यनुजानाति । ततः कैकेयीप्रेरितेन राज्ञानुज्ञातो रामभद्रः,

त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ ।
प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे ॥

पिता हि दैवतं तात देवतानामपि स्मृतम् ।
तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ॥

पुरं च राष्ट्रं च महीं सकाननां
मया विसृष्टा भरताय दीयताम् ।
अहं निदेशं भवतोऽनुपालयन्
वनं गमिष्यामि चिराय सेवितुम् ॥

मयातिसृष्टां भरतो महीमिमां
सशैलखण्डां सपुरां सकाननाम् ।
शिवां सुसीमामनुशास्तु केवलां
त्वया यदुक्तं नृपते तथास्तु तत् ॥

इत्यवदत् । अत्र यद्यपि स्वतन्त्रस्य पितुः पुत्राभ्यनुज्ञां विनापि राज्यप्रदानेऽधिकारोऽस्तीति मया निसृष्टे-

ति कृतमभ्यनुज्ञानमसंगतम् । तथापि 'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । स्थावरस्य तु सर्वस्य न पिता न पितामहः' इति वचनेन स्थावरे राज्यादौ पुत्रसंमत्यैव स्वातन्त्र्यावगमेन पुत्रासंमतिप्रयुक्तदोषपरिहाराय कुलपरम्पराप्राप्तज्येष्ठपुत्राभिषेचननियतिक्रमदोषपरिहाराय पूर्वैर्यः कृतराज्यप्रदानप्रतिज्ञाभङ्गदोषपरिहाराय च रामेण कृतं मया निसृष्टेत्यभ्यनुज्ञानं युक्तमेव । पञ्चत्रिंशे—

ततः कोपसंरक्तनयनः सुमन्त्रः कैकेयीहृदयभेदनमिदमभाषत ।

न ह्यकार्यतमं किंचित्तव देवीह विद्यते ।
पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चान्ततः ॥

अत्र सुमन्त्रः अकृतभर्तृवधां कैकेयीं 'पतिघ्नीं मन्ये' इति कथमुक्तवानिति चेत् न । गुरुभूतपत्यधिक्षेपाविलक्षणपतिवधकर्तृत्वेन पतिघ्नीत्ववर्णनोपपत्तेः । पत्युर्गुरुत्वं च वृद्धमनुना उक्तम् ' अग्निर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः' इति । आश्वमेधिकेऽपि सक्तुप्रस्थोपाख्याने श्वशुरं

प्रति स्नुषावाक्यम्— 'गुरोर्मम गुरुस्त्वं वै यतो दैवत-दैवतः । देवातिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे प्रभो ॥' इति । गुर्वधिक्षेपश्च गुरुवधत्वं कर्णपर्वणि अर्जुनं प्रति भगवतोक्तम्— 'त्वमित्युक्तस्तु निहतो गुरुर्भवति भारत । गुरूणामवमानो हि वध इत्यभिधीयते ॥ अथर्वाङ्गिरसी ह्येषा श्रुतिरेषा सनातनी ।' इति । तस्मात्कैकेय्याः सुमन्त्रोक्तं पतिघ्नीत्वमुपपन्नम् ।

मावमंस्था दशरथं भर्तारं वरदं पतिम् ।
भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते ॥
न च ते विषये कश्चिद्ब्राह्मणो वस्तुमर्हति ।
तादृशं त्वममर्यादमद्य कर्म चिकीर्षसि ॥

अनेन यत्र धर्मविप्लवो जायते तत्र वासो न कर्तव्य इति सूचितम् । तथा च मोक्षधर्मे—'चतुर्णां यत्र वर्णानां धर्मव्यतिकरो भवेत् । न तत्र वासं कुर्वीत श्रेयोर्थी वै कथंचन ॥ यत्र संलोलिता लुब्धैः प्रायशो धर्मसेतवः । प्रदीप्तमिव चेलान्तं कस्तं देशं न संत्यजेत् ॥ कर्मणा यत्र पापेन वर्तन्ते जीवितेप्सवः । व्यवधावेत्ततस्तूर्णं सर्पाच्छरणादिव ॥'

आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च ।

पुरा खलु महर्षिदत्तवरमहिम्ना तिर्यक्कूजितादिभाषाभिज्ञं तव पितरं स्वशयने संचरन्त्याः जृम्भिकायाः शब्दश्रवणेन बहुधा हसन्तं तव मात्रा हासकारणे पृष्टे एतदाख्याने स्वस्य मरणं भवेदिति प्रतिषेधं कुर्वन्,

शंस मे जीव वा मा वा न मामपहसिष्यसि ।

इति निर्बन्धमवदत् ।

तथा त्वमपि राजानं दुर्जनाचरिते पथि ।
असद्ग्राहमिमं मोहात्कुरुषे पापदर्शिनि ॥

सत्यश्चायं प्रवादोऽयं लौकिकः प्रतिभाति मे ।
पितृन्समनुजायन्ते नरा मातरमङ्गनाः ॥

अत्र मातुः समानगुणा कन्यकेत्यर्थः कैकेयीचारित्रमुदाहरता सुमन्त्रेण स्पष्टीकृतः । 'पितृन्समनुजायन्ते' इत्ययमर्थस्तु,

न ह्यदत्तां महीं पित्रा भरतः शास्तुमर्हति ।
त्वयि वा पुत्रवद्वस्तुं यदि जातो महीपतेः ॥

यद्यपि त्वं क्षितितलाद्गगनं चोत्पतिष्यसि ।
पितृवंशचरित्रज्ञः सोऽन्यथा न करिष्यति ॥

इति भरतगुणानुदाहरता वसिष्ठेन च स्पष्टीकृतः । तदलमसन्मार्गानुसारेण रामाभिषेकानुज्ञया भर्तारं सत्प्रतिज्ञं विधाय सर्वानप्यस्मान्विगतज्वरान्विधेहीत्येवमादिसुमन्त्रकृतविविधनिर्भर्त्सनमविगणय्य अविचलितहृदया बभूव । षट्त्रिंशे—ततः सकोशेन चतुरङ्गबलेनानुगम्यमानो रामभद्रः,

यजन्पुण्येषु देशेषु विसृजंश्चाप्तदक्षिणाः ।
ऋषिभिश्च समागम्य प्रवत्स्यति सुखं वने ॥
भरतश्च महाबाहुरयोध्यां पालयिष्यति ।

इति राज्ञा दशरथेन समुदीरितं वचनमाकर्ण्य कोपवशेन,

राज्यं गतजनं साधो पीतभाण्डां सुरामिव ।
निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते ॥
तवैव वंशे सगरो ज्येष्ठं पुत्रमुपारुधत् ।
असमञ्ज इति ख्यातं तथायं गन्तुमर्हसि ॥

इति मुक्तलज्जमभिदधानां कैकेयीं सिद्धार्थो महामात्रः समभाषत । क्रीडतो बालकानम्भसि परिक्षिप्तोऽसमञ्जस परित्यागः सकलजनहितकर एव, सकललोकदयापरं निरस्तसमस्तदोषं रामभद्रं केन कारणेन वनं प्रेषयितुमिच्छसि ।

अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च ।
निर्दहेदपि शक्रस्य द्युतिं धर्मनिरोधनात् ॥

तदलमनेनासदारम्भेण इति । सप्तत्रिंशदारभ्य चत्वारिंशत्पर्यन्तम् सिद्धार्थवचनमाकर्ण्य राज्यं परित्यज्य वने वन्येन जीवतो मम किमनेन चतुरङ्गबलेन कोशेन वा समानीयतां खनित्रपिठरचीराणि इति वदन्तं रामभद्रं निरपत्रपा कैकेयी पूर्वमेव संभृतानि चीराण्यानीय परिधत्स्वेति समभाषत । तदुक्तानि चीराणि स्वयं परिधाय तत्परिधानप्रकारानभिज्ञायाः सीतायाः तत्प्रदर्शनाय कौशेयस्योपरि रचितबन्धं तं रामभद्रं प्रतिषिध्य सुकुमारी राजकुमारी कठिनतरचीरपरिधानानभिज्ञा, नेयं वन-

वासाय वृत्ता, अतः मृदुतरवसनभूषणगणभूषितैव वनमभिगन्तुमर्हतीति वसिष्ठः समभाषत । ततः,

राजा सत्वरमाहूय व्यापृतं वित्तसंचये ।
उवाच देशकालज्ञो निश्चितं सर्वतः शुचिम् ॥

अनेन कोशाधिकारे शुचिरेव नियोक्तव्य इति सूचितम् । तथा च राजधर्मे— 'कोशाख्यपटलं यस्य कोशवृद्धिपरैर्नरैः । आप्तैः शुद्धैश्च सततं चीयते स नृपोत्तम ॥' इति ।

वासांसि च महार्हाणि भूषणानि वराणि च ।
वर्षाण्येतानि संख्याय वैदेह्याः क्षिप्रमानय ॥

ततस्तदानीतैः,

भूषयामास गात्राणि तैर्विचित्रैर्विभूषणैः ।
व्यराजयत वैदेही वेश्म तत्तु विभूषिता ॥

ननु रामेण चीरे धृते कौशेयादिकं सीता कथं धृतवती, पत्न्याः पतिसमानव्रतचारित्वस्य धर्म्यत्वात् ।

तस्मिंस्तथा जल्पति विप्रमुख्ये
गुरौ नृपस्याप्रतिमप्रभावे ।

नैव सा सीता विनिवृत्तभावा
प्रियस्य भर्तुः प्रतिकारकामा ॥

इति वचनेन,

बबन्ध वै तथा चीरं सीतया तुल्यशीलया ।

इत्यनेन च सीतायाः भर्तृकृतानुकरणस्य संमतत्वाव-गमाच्च समानव्रतचारित्वं च । तथा चारण्यके पर्वणि— 'प्राप्य भार्यामगस्त्यस्तु लोपामुद्रामुवाच ह । महार्हाण्यु-त्सृजैतानि वासांस्याभरणानि च । ततः सा दर्शनीयानि महार्हाणि तनूनि च । समुत्ससर्ज रम्भोरूर्वसनान्याय-तेक्षणा ॥ ततश्चीराणि जग्राह वल्कलान्यजिनानि च । समानव्रतचर्या च बभूवायतलोचना ॥' इति । महा-प्रस्थानिकेऽपि— 'ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः । उत्सृज्याभरणान्यङ्गाज्जगृहे वल्कलानि च ॥ भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी । तथैव जगृहुः सर्वे वल्कलानि नराधिप ॥' इति । सावित्र्युपाख्याने— 'दत्त्वा सोऽश्वपतिः कन्यां यथार्हं सपरिच्छदम् । ययौ स्वमेव भवनं संयुक्तः परया मुदा ॥ गते पितरि सन्यस्य

सर्वाण्याभरणानि सा। जगृहे वल्कलान्येव वस्त्रं काषायमेव च ॥' इति। अतः कौशेयादिधारणमयुक्तमिति चेत् सत्यम्, भर्त्रभिप्रायानुसारेण कृतम्। भर्त्रभिप्रायश्च,

अथोत्तमान्याभरणानि देवि
देहि स्नुषायै व्यपनीय चीरम्।
एकस्य रामस्य वने निवास-
स्त्वया वृतः केकयराजपुत्रि ॥
विभूषितेयं प्रतिकर्मनित्या
वसत्वरण्ये सह राघवेण।
वस्त्रैश्च सर्वैः सहितैर्विधानै-
र्नेयं वृता ते वरसंप्रदाने ॥

इति वसिष्ठवचनम्।

चीराण्यपाख्याज्जनकस्य कन्या
नेयं प्रतिज्ञा मम दत्तपूर्वा।
वासांसि च महार्हाणि भूषणानि वराणि च।
वर्षाण्येतानि संख्याय वैदेह्याः क्षिप्रमानय ॥

इति दशरथवचनं च परिपालयता रामेण प्रतिषेधात्। अग्रे

तथा तु भूषितां सीतां ददर्श ददतां वरः।
राघवः प्रीतिदानेन तपस्विन्या जहर्ष च॥

इति अनसूयादत्तवस्त्राभरणाङ्गरागादिना समलंकृतां सीतामवलोक्य हर्षप्रकटनात् युद्धकाण्डे रावणवधसमनन्तरम्,

दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम्।
इह सीतां चिरस्नातामुपस्थापय मा चिरम्॥

इति विभीषणं प्रति श्रीरामवचनाच्चावगम्यते। अतः सीताकृतं कौशेयकादिधारणं युक्तमेव। अथ कौसल्यां विचित्राभरणभूषिताम् उद्यतोंशुमतः प्रभामिव विराजमानां वनवासाय कृतनिश्चयां सीतां सादरं परिष्वज्य मूर्ध्नि चोपाघ्रायैवमुपदिदेश।

असत्यः सर्वलोकेऽस्मिन्सततं सत्कृताः प्रियैः।
भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः॥

एष स्वभावो नारीणामनुभूय पुरा सुखम्।
अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि च॥

न कुलं न कृतं विद्यां न दत्तं नापि संग्रहम्।

स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥
साध्वीनां हि स्थितानां तु सत्ये शीले श्रुते दमे ।
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥

स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो मम ।
तव दैवतमस्त्वेष निर्धनः सधनोऽपि वा ॥

इति । ततः,

करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम् ।
न मामसज्जनेनार्या समानयितुमर्हति ॥

धर्माद्विचलितुं नाहमलं चन्द्रादिव प्रभा ।
नातन्त्री वाद्यते वीणा नाचक्रो वर्तते रथः ॥

नापतिः सुखमेधेत या स्यादपि शतात्मजा ।
मितं ददाति हि पिता मितं माता मितं सुतः ॥
अमितस्य हि दातारं भर्तारं का न पूजयेत् ।

इति सीतावचनश्रवणसंजातहर्षौ कौसल्यां सर्वाश्च मातृरभिवाद्य,

संवासात्परुषं किंचिदज्ञानाद्वापि यत्कृतम् ।
तन्मे समनुजानीत सर्वाश्चामन्त्रयामि वः ॥

इति रामभद्रः प्रार्थितवान्,

अथ मातुः सुमित्राया जग्राह चरणौ पुनः ।
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ॥

सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने ।
रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥

व्यसनी वा समृद्धो वा गतिरेष तवानघ ।
एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ॥

इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् ।
दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु च ॥

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥

इति सुमित्राभ्यनुज्ञातेन लक्ष्मणेन सीतया च सह रामभद्रो राजानं प्रदक्षिणपूर्वकमभिवाद्य खनित्रपिठरकोपेतविविधवस्त्राभरणखड्गखेटकाद्यायुधसमलंकृतं सुमन्त्रानीतं सज्जं रथवरमास्थाय शोकाकुलपौरजनसमुदीरितानि तानि तानि वचनानि शृण्वन्राजभवनान्निर्ययौ । ततो रामभद्रमनुव्रजन्तम्,

यमिच्छेत्पुनरायान्तं नैनं दूरमनुव्रजेत् ।
इत्यमात्या महाराजमूचुर्दशरथं वचः ॥

अथ रामगमनसंजातशोकवशेन सर्वा एव राजमहिष्यः सकरुणमेवं चुक्रुशुः ।

अनाथस्य जनस्यास्य दुर्बलस्य तपस्विनः ।
यो गतिः शरणं चासीत्स नाथः क्व नु गच्छति

कौसल्यायां महातेजा यथा मातरि वर्तते ।
तथा यो वर्ततेऽस्मासु स महात्मा क्व गच्छति ॥

न क्रुद्ध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्जयन् ।
क्रुद्धान्प्रसादयन्सर्वान्समदुःखः क्व गच्छति ॥

द्विचत्वारिंशत्प्रभृति चतुश्चत्वारिंशत्पर्यन्तम्— ततो राजा दशरथः सकलावरोधजनपरिवृतोऽनुव्रजन्नतिक्रान्तलोचनपथं रामभद्रं विचिन्त्य शोकाकुलहृदयः प्रतिनिवृत्य वामपार्श्वमवलम्बमानां कैकेयीमेवमवदत्—

कैकेयि मा ममाङ्गानि स्पाक्षीस्त्वं दुष्टचारिणि ।
न हि त्वां द्रष्टुमिच्छामि न भार्या न च बान्धवी ॥

ये च त्वामुपजीवन्ति नाहं तेषां न ते मम ।
केवलार्थपरां हि त्वां त्यक्तधर्मां त्यजाम्यहम् ॥

अगृह्णां यच्च ते पाणिमग्निं पर्यणयं च यत् ।
अनुजानामि तत्सर्वमस्मिँल्लोके परत्र च ॥

भरतश्चेत्प्रतीतः स्याद्राज्यं प्राप्येदमव्ययम् ।
यन्मे दद्यात्स पित्र्यर्थे मां मा तद्दत्तमन्वगात् ॥

इति तां परित्यज्य कौसल्यां सुमित्रां चावष्टभ्य कौसल्याभवनमाजगाम । तत्र च शयनीये निपत्य विवेष्टमानं राजानं पुत्रशोकसमाकुलं कौसल्या समभाषत ।

पातयित्वा तु कैकेय्या रामं स्थानाद्यथेष्टतः ।
प्रदिष्टो रक्षसां भागः पर्वणीवाहिताग्निना ॥

अत्र पर्वणि पर्वकालकर्तव्यं दर्शपूर्णमासादिषु तुषादिकं पुरोडाशीयेभ्यो व्रीह्यादिभ्यः प्रक्ष्याव्य रक्षोभ्यो भागो नित्यं दीयते । तथा विध्यपराधे सति नैमित्तिकोऽपि रक्षसां भागो भवति । तथा चापस्तम्बः— 'यस्य हविः क्षायति तं यज्ञं निर्ऋतिर्गृह्णाति' इति । बोधायनोऽपि— 'अप्रायश्चित्तिको यज्ञो ह्यसुरैः संप्रभुज्यते' इति । शाता-

त्रपीयेनापि—'पर्वणो यश्चतुर्थांश आद्याः प्रतिपदक्षयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥' इति
यागकालमुक्त्वा अस्मात्कालाच्च्यावितस्य राक्षसत्वमु-
क्तम्। 'न यष्टव्यं चतुर्थेऽशे यागैः प्रतिपदः क्वचित्।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी॥' इति।

निःसंशयं मया मन्ये पुरा वीर कदर्यया।
पातुकामेषु वत्सेषु मातृणां शातिताः स्तनाः॥

अनेन दुग्धपानार्थं मात्रासंगतः किमुत स्तनच्छेदन-
मिति प्रतिपादनेन वत्सानां स्तन्यपाने विघ्नो न कर्तव्यः
इति सूचितम्। तथा च मनुः—'न वारयेद्गां धयन्तीं
न चाचक्षीत कस्यचित्' इति। आपस्तम्बोऽपि—
'संसृष्टां च वत्सेनानिमित्ते' इति।

न हि मे जीविते किंचित्सामर्थ्यमिह कल्प्यते।
अपश्यन्त्याः प्रियं पुत्रं महाबाहुं महाबलम्॥

एवं सकरुणं विलपन्तीं कौसल्याम्,

इदं धर्मे स्थिता धर्म्यं सुमित्रा वाक्यमब्रवीत्।
रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन॥

वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन्सदानघः ।
अनुगच्छति वैदेही धर्मात्मानं तवात्मजम् ॥

कीर्तिभूतां पताकां यो लोके भ्रमयति प्रभुः ।
न हि रामात्परो लोके विद्यते सत्पथे स्थितः ॥

जहि शोकं च मोहं च देवि सत्यं ब्रवीमि ते ।
पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः ॥

कराभ्यां मृदुपीनाभ्यां चरणौ पीडयिष्यति ।

अत्र जनन्या अभिवादनं चरणपीडनपूर्वकमेव कर्तव्यमित्युक्तम् । एतच्चाभिवादनप्रकरणे लिखितम् । पञ्चचत्वारिंशे— ततो रामभद्रोऽपि स्वमनुसरतः पौरजनान्विविधोपायेनापि अशक्यनिवर्तनानवलोक्य,

उवाच रामः स्नेहेन ताः प्रजाः स्वाः प्रजा इव ।
या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनः ॥

मत्प्रियार्थं विशेषेण भरते सा निवेश्यताम् ।
स हि कल्याणचारित्रः कैकेय्यानन्दवर्धनः ।
करिष्यति यथावद्वः प्रियाणि च हितानि च ॥

ज्ञानवृद्धो वयोबालो मृदुर्वीर्यगुणान्वितः ।
अनुरूपः स वो भर्ता भविष्यति भयापहः ॥

स हि राजगुणैर्युक्तो युवराजः समीक्षितः ।
न च तप्येद्यथा चासौ वनवासं गते मयि ॥

महाराजस्तथा कार्यो मम प्रियचिकीर्षया ।

अत्र भरताय राज्यं प्रदातुं कैकेय्या वनं प्रति प्रेषणेनापकृतोऽपि रामः तत्पुत्रस्य भरतस्य,

या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनः ।
मत्प्रियार्थं विशेषेण भरते सा निवेश्यताम् ॥

इति नियोगपूर्वकं प्रकृतिसंनिधौ तद्गुणकथनात् । तथा चात्रैव चित्रकूटे भरतं प्रति,

मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ।
मया च सीतया चैव शपसेऽसि रघुनन्दन ॥

इत्युक्तत्वात् । तथा युद्धकाण्डेऽपि कैकेय्या दोषनिरसनपूर्वकमुत्तमलोकप्राप्तिर्भवत्विति दशरथं प्रति प्रार्थनाच्च महदपकारकारिष्वपि उपकारः कर्तव्य इत्ययं धर्मः सूचितः । तथा चापद्धर्मे लुब्धकपोतीये–'छेत्तुमप्यागते च्छायां

नोपसंहरते द्रुमः' इति । 'आत्मनो हितमन्विच्छन्बाधते यः परं नरः । कर्तव्या मूढविज्ञाने दया तत्र दयालुभिः ॥ अज्ञानात्तत्र ये दण्डं पातयन्ति बुधा यदि । बुधेभ्यस्तद्हं मन्ये वरमज्ञानिनो नराः ॥' ततः पलितशिरसो वाजपेयच्छत्रनिवारितातपान्पदातीन्द्विजवरान्,

अवेक्ष्य सहसा रामो रथादवततार ह ।
पद्भ्यामेव जगामाथ ससीतः सह लक्ष्मणः ॥

अनेन पदातीञ्श्रेयसोऽवलोक्य यानादवतरणीयमिति सूचितम् । तथा च श्रुतिः— 'तस्माज्ज्यायांसं कनीयान्प्रत्यवरोहति' इति । उद्योगपर्वणि भगवद्यानेऽपि—'अथ पश्यन्महाबाहुर्ऋषीनध्वनि केशवः । ब्राह्म्या श्रिया दीप्यमानान्स्थितानुभयतः पथि ॥ सोऽवतीर्य रथात्तूर्णमभिवाद्य जनार्दनः । यथावत्तानृषीन्सर्वान्नित्यभाषत केशवः' इति । ततः पद्भ्यामेव गच्छन्रामभद्रोऽनुगतद्विजवरसमुदीरितसरसतरवचनश्रवणसंजातसंतोषस्तैः सह तमसातीरमाजगाम । षट्चत्वारिंशत्प्रभृति अष्टचत्वारिंशत्पर्यन्तम्—ततो रामः,

अद्भिरेव तु सौमित्रे वत्स्याम्यद्य निशामिमाम् ।
एतद्धि रोचते मह्यं वन्येऽपि विविधे सति ॥

इति लक्ष्मणमवदत् । अनेन वासाय प्रस्थितेन प्रथमदिवसे जलाहारेणैव स्थेयमिति सूचितम् । तथा च भारते वनपर्वणि वनवासाय प्रस्थिताः पाण्डवाः— 'ऊषुस्तां रजनीं वीराः संस्पृश्य सलिलं शुचि । उदकेनैव तामूषुस्ते रात्रिं दुःखकर्शिताः ॥ इति । ततो रामः लक्ष्मणोपकल्पितायां पर्णशय्यायां सीतया सह स्वपन्किंचिदवशिष्टायामेव रजन्यां प्रबुध्य स्वपदवीमनुसरतः पुत्रकलत्रादिष्वपि निरपेक्षांस्तरुमूलेषु सुखसुप्तान्पौरजनानवलोक्य लक्ष्मणमेवमवादीत्,

यावदेव तु संसुप्तास्तावदेव वयं लघु ।
रथमारुह्य गच्छामः पन्थानमकुतोभयम् ॥

पौरा ह्यात्मकृतादुःखाद्विप्रमोच्या नृपात्मजैः ।
न तु खल्वात्मना योज्या दुःखेन पुरवासिनः ॥

इति । अनेन राज्ञा स्वयं क्लेशमनुभूयापि पौरजनहितमाचरणीयमिति सूचितम । तथा च भारते शान्तौ—

'यथा हि गर्भिणी हित्वा स्वप्रियं मनसोऽनुगम्। गर्भस्य हितमादत्ते तथा राज्ञाप्यसंशयम्॥ वर्तितव्यं कुरुश्रेष्ठ नित्यं धर्मानुवर्तिना। स्वं प्रियं समभित्यज्य यद्यल्लोकहितं भवेत्॥' इति। कामन्दकेऽपि— 'आविष्ट इव दुःखेन तद्गतेन गरीयसा। समन्वितः करुणया परया दीनमुद्धरेत्॥ न तेभ्योऽभ्यधिकाः सन्ति सन्तः सत्पुरुषव्रताः। दुःखपङ्कार्णवे मग्नं दीनमभ्युद्धरन्ति ये॥' इति। ततस्तद्वचनोच्चारिते सति रोचते मह्यमपीदमिति लक्ष्मणेन गदिते सुमन्त्रः स्यन्दनोत्तमे हयोत्तमान्संयोज्य,

त्वमारोहस्व भद्रं ते ससीतः सहलक्ष्मणः।
इत्यवादीत्।

ततः समास्थाय रथं महारथः
ससारथिर्दाशरथिर्वनं ययौ।
उदङ्मुखं तं तु रथं चकार वै
प्रयाणमाङ्गल्यनिमित्तदर्शनात्॥

अनेन उत्तरदिशः प्रशस्तत्वात् तदभिमुखगमनं श्रेयस्करमिति सूचितम्। तथा च तैत्तरीयश्रुतिः— 'तस्मा-

दुत्तरतोऽभिप्रयायी जयति' इति । तथा च वनपर्वणि—वनवासाय प्रस्थिताः पाण्डवाः 'वर्धमानपुरद्वारेणाभिनिष्क्रम्यते तदा। उदङ्मुखाः शस्त्रभृतः प्रययुः सह कृष्णया॥' इति। उत्तरदिशः प्राशस्त्यं च उद्योगपर्वणि गालवं प्रति नारदेनोक्तम्— 'यस्मादुत्तीर्यते पापाद्यस्मान्निःश्रेयसं चरेत्। तस्मादुत्तारणफलादुत्तरेत्युच्यते बुधैः॥' इति। ततः स्वपदवीमनुसरतः पौरजनान्वञ्चयितुममार्गेणैव किंचिदूरं गच्छन्यथापूर्वं मार्गेणैव संप्रायात्। ततः प्रबुद्धाः पौरजानपदा रामलक्ष्मणौ जनकनन्दिनीं चानालोक्य शोकाकुलहृदयाः तैर्विना परिमुषितमिवात्मानं मन्वानाः मोहाच्च मुहुर्मुहुरितस्ततः परिभ्रमन्तः पुनस्तद्दर्शननैराश्येन दूयमानमानसाः कृच्छ्रेण स्वं स्वं भवनमाजग्मुः। अथ रामभद्रविनाकृतान्स्वजनानवलोक्य कलुषितहृदयानां पौरस्त्रीणाम्,

कैकेय्या यदि चेद्राज्यं स्यादधर्म्यमनाथवत्।
न हि नो जीवितेनार्थः कुतः पुत्रैः कुतो धनैः॥
यया पुत्रश्च भर्ता च त्यक्तावैश्वर्यकारणात्।
कं सा परिहरेदन्यं कैकेयी कुलपांसनी॥

कैकेय्या न वयं राज्ये भृतका निवसेम हि ।
जीवन्त्या जातु जीवन्त्यः पुत्रैरपि शयामहे ॥
या पुत्रं पार्थिवेन्द्रस्य प्रवासयति निर्घृणा ।
कस्तां प्राप्य सुखं जीवेदधर्म्यां दुष्टचारिणीम् ॥
उपद्रुतमिदं सर्वमनाकुलमनामयम् ।
कैकेय्या हि कृते कृत्स्नं विनाशमुपयास्यति ॥
इत्येवमादि सकरुणं विलपन्तीनाम्,
जगामास्तं दिनकरो रजनी चाभ्यवर्तत ।

इति । एकोनपञ्चाशत्पञ्चाशयोः—

रामोऽपि रात्रिशेषेण तेनैव महदन्तरम् ।
जगाम पुरुषव्याघ्रः पितुराज्ञामनुस्मरन् ॥

ततः क्रमेण गोमत्यादिनदीः सकलसंपद्भरसंभृतान् कोसलानप्यतीत्य प्रभातायां शर्वर्याम् ।

अयोध्याभिमुखो धीमान्प्राञ्जलिर्वाक्यमब्रवीत् ॥
आपृच्छे त्वां पुरि श्रेष्ठे काकुत्स्थपरिपालिते ।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥

अनेन देशान्तरं गच्छतां निवासदेशमामन्त्र्यैव गन्तव्यमिति सूचितम्। एवं वनपर्वणि गन्धमादनात्प्रयाणसमये धर्मराजकृतप्रार्थना— 'आमन्त्र्य वेश्मानि सरांसि नद्यः सर्वाणि रत्नांसि च धर्मराजः। यथागतं मार्गमवेक्षमाणः पुनर्गिरिं तं च निरीक्ष्यमाणः॥ समाप्तकर्मा सहितः सुहृद्भिर्जित्वा सपत्नानतिलभ्य राज्यम्। शैले च भूयस्तपसे यतात्मा द्रष्टा भवामीति मतिं चकार॥' इति।

ततस्त्रिपथगां गङ्गां शिवतोयामशैवलाम्।
विष्णुपादच्युतां दिव्यामपापां पापनाशिनीम्॥
तां शंकरजटाजूटभ्रष्टां सागरतेजसाम्।
आससाद महाबाहुः शृङ्गिबेरपुरं प्रति॥

ततस्तत्तीरनिवासिनां गुहेन अर्घ्यपाद्यादिभिरभिपूज्य समाहृतं विविधभक्ष्यभोज्यादिकमुपभुज्यतामिति बहुशः प्रार्थितोऽपि रामः सलिलेनैव कृताहारः इङ्गुदीपादपमूले पर्णशय्यायामेव तां रात्रिमत्यवाहयत्। एकपञ्चाशे— ततस्त्वदर्थमुपकल्पितायां सुखशय्यायां प्रत्याश्वसिहीति

गुहेन प्रार्थितो लक्ष्मणः सखीतं वसुधातलसंसुप्तं लोकनाथं रामभद्रमवलोकयतो मम कथं निद्रा भवेदित्यभिधाय रामगुणानेव कथयन् तेन सहैव रात्रिं निनाय। द्विपञ्चाशे— ततः प्रभाते सुमन्त्रः गुहानीतया नावा गङ्गां तरितुं पादचारेणैव,

दृष्ट्वा दूरगतं रामं दुःखार्तो रुरुदे चिरम्।
ततस्तु विगते बाष्पे सूतं स्पृष्ट्वोदकं शुचिम्॥

अनेनाश्रुपाते आचमनं कर्तव्यमिति सूचितम्। तथा चापस्तम्बः— 'शृङ्गाणिकाश्रूपालम्भ' इति। कूर्मपुराणेऽपि— 'उच्छिष्टं पुरुषं दृष्ट्वा भोज्यं चापि तथा विधम्। आचामेदश्रुपाते च लोहितस्य तथैव च॥' इति।

यथा दशरथो राजा मां नाशोचेत तथा कुरु।
यद्ययं ज्ञायते किंचित्स महात्मा महीपतिः॥
कैकेय्याः प्रियकामार्थं तत्कार्यमविशङ्कया।
एतदर्थं हि राज्यानि प्रशासति नरेश्वराः॥
यदेषां सर्वकृत्येषु मनो न प्रतिहन्यते।

अनेन राजाज्ञा न प्रतिहन्तव्येति सूचितम्। तथा च राजधर्मे— 'तस्योपदेशे स्थातव्यं दक्षेणाक्लिष्टकर्मणा। न हि राज्ञः प्रतीपानि कुर्वन्सुखमवाप्नुयात्॥ पुत्रो भ्राता वयस्यो वा यद्वाप्यात्मसमो भवेत्।' इति। कामन्दकेऽपि— 'आज्ञा यस्य प्रतीच्छन्तो भृत्याः कुर्युरुपासनम्। भर्तृचित्तानुवृत्तित्वं सद्वृत्तमनुजीविनाम्॥' इति। मत्कृतां प्रणतिं सूत मातृभ्यश्च निवेदय। स्वमातरमिव कौसल्यां पूजयस्वेति मद्वचनाद्भरतस्त्वया वाच्य इति सुमन्त्रमवदत्। ततो रामस्त्वद्रहितेन कथमयोध्यां प्रविशामि,

भक्तवत्सल तिष्ठन्तं भर्तृपुत्रगते पथि।
भक्तं भृत्यं स्थितं स्थित्यां न मां त्वं हातुमर्हसि॥

इति बहुविधं क्लिश्यमानं सुमन्त्रम्,

जानामि परमां भक्तिं मयि ते भक्तवत्सल।
शृणु चापि यदर्थं त्वां प्रेषयामि पुरीमितः॥
कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः।

इत्यवदत्। भक्तं भृत्यमित्यनेन भक्तो भृत्यः स्वामिना

न परित्याज्य इति सूचितम्। तथा चानुशासनिके छत्रोत्पत्तौ सूर्यं प्रति जमदग्निवचनम्— 'भक्तं च भजमानं च तवास्मीति च वादिनम्। त्रीनेतान्विषमप्राप्तान्विषमेष्वपि न त्यजेत् ॥' इति। मार्कण्डेयोऽपि— 'ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा। तुल्यमेभिर्महापापं भक्तत्यागाद्युदाहृतम् ॥ भजन्तं भक्तमत्याज्यमदुष्टं त्यजतः सुखम्। नेह नामुत्र पश्यामि तस्माच्छक्र दिवं व्रज ॥' एवं सति दशरथमन्त्रित्वात् तदाज्ञां विना स्वेन नेतुमशक्यत्वात् संदेशस्य तन्मुखेन प्रेषणीयत्वाच्च त्यक्त इति न कश्चिद्विरोधः। ततः स्वाज्ञया गुहानीतेन न्यग्रोधक्षीरेण रामलक्ष्मणौ जटां विधाय सीतया लक्ष्मणेन च नावमारूढो रामः,

ब्रह्मवत्क्षत्रवच्चैव जनापहितमात्मनः।
आचम्य च यथा शास्त्रं नदीं तां सीतया सह ॥

प्राणमत्प्रीतिसंहृष्टो लक्ष्मणश्चामितप्रभः।

अनेन नावारोहणे ब्रह्मक्षत्रयोर्हितो मन्त्रजपः कर्तव्यः। महानदीसंतरणे आचमननमस्कारादिकं च कर्तव्यमिति

सूचितम्। तथा चाश्वलायनः— 'सुत्रामाणं पृथिवीं पृथिवीयामनेहसं सुशर्माणमदितिं सुप्रणीतं दैवीं नावं स्वरित्रामनागसमश्रवन्तीमारुहेमां स्वस्तये' इति। आचमने यमः— 'उत्तीर्योदकमाचामेदवतीर्य तथैव च। एवं स्यात्तेजसा युक्तो वरुणोऽपि सुपूजितः॥' इति। हारीतोऽपि— 'नोत्तरेदनुपस्पृश्य जलं विप्रः सदा शुचिः।' इति। ततः,

मध्यं तु समनुप्राप्य भागीरथ्यास्त्वनिन्दिता।
वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत्॥

पुत्रो दशरथस्यायं महाराजस्य धीमतः।
निदेशं पारयत्वेनं गङ्गे त्वदभिरक्षितः॥

चतुर्दश हि वर्षाणि समग्राण्युष्य कानने।
भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति॥

ततस्त्वां देवि सुभगे क्षेमेण पुनरागता।
यक्ष्ये प्रमुदिता गङ्गे सर्वकामप्रसाधिनि॥

त्वं हि त्रिपथगा देवि ब्रह्मलोकं समीक्षसे।
भार्या चोदधिराजस्य लोकेऽस्मिन्संप्रदृश्यते॥

सा त्वां देवि नमस्यामि प्रशंसामि च शोभने ।
प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते ॥

गवां शतसहस्रं च वस्त्राण्यन्नं च पेशलम् ।
ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया ॥

सुराघटसहस्रेण मांसभूतोदनेन च ।
यक्ष्ये त्वां प्रयतां देवि पुरीं पुनरिहागता ॥

यानि त्वत्तीरवासीनि दैवतानि भवन्ति च ।
तानि सर्वाणि यक्ष्यामि तीर्थान्यायतनानि च ॥

पुनरेव महाबाहुर्मया भ्रात्रा च संगतः ।
अयोध्यां वनवासात्तु प्रविशतु त्वयानघे ॥

इति । एवं विविधं प्रार्थयमानया सीतया सह क्षिप्रमेव दक्षिणं तीरमागमत् । ननु अत्र गङ्गे त्वदभिरक्षित इत्यनेन गङ्गायाः संबोध्यत्वं संरक्षणकर्तृत्वं चावगम्यते । एवम् 'भार्या चोदधिराजस्य लोकेऽस्मिन्संप्रदृश्यते ।' इत्यनेन गङ्गोदधिराजयोर्दम्पत्यमवगम्यते । एवम् 'यक्ष्ये प्रमुदिता गङ्गे सर्वकामप्रसाधिनि । सा त्वां देवि नमस्यामि प्रशंसामि च शोभने ॥' इत्यनेन फलोद्देशेन नति-

स्तुतिपूर्वजाकर्मत्वमवगम्यते । एवम् 'प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते । गवां शतसहस्रं च वस्त्राण्यन्नं च पेशलम् ॥ ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया ।' इत्यनेन राज्यप्राप्त्यनन्तरं गङ्गाप्रीत्यै शतसहस्रगवादिकं ब्राह्मणेभ्यो दीयते इति प्रतिपादनेन गङ्गायाः प्रीतिरवगम्यते । 'यानि त्वत्तीरवासीनि' इत्यादिना गङ्गातीरवर्ति तीर्थायतनादीनामपि प्रीत्यै पूजा चावगम्यते । इदं च चैतन्यविग्रहादिनियतं संबोध्यत्वरक्षणकर्तृत्वदाम्पत्यफलार्थिपूजनीयत्वतज्जनितप्रीतिमत्त्वादिकं न जलादिमकाया गङ्गायाः संभवति जलस्य चैतन्यविग्रहाद्यभावात् इति चेन्न । इन्द्रादीनां देवानां मन्त्रार्थवादादिप्रसिद्धविग्रहादिवत् गङ्गाया अपि मन्त्रवर्णेतिहासपुराणप्रसिद्धविग्रहादिसंभवेन संबोध्यत्वसंरक्षणकर्तृत्वप्रीतिमत्त्वादीनां संभवात् । तथा हि— इन्द्रादीनां हविर्ग्रहणे मन्त्रः— 'इदं वसो सुतमन्धः पिबासुपूर्णमुदरम् अनाभयिन्नरिमा ते पिब सोममिन्द्रमन्द तु त्वायं ते सुषाव हर्यश्वादिः सोतुर्बाहुभ्यां सुयतो नार्वा आयुर्दा अग्ने हविषो

जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम् ।' 'अग्निरिदं हविरजुषत' इत्यादि । तथा अर्थवादोऽपि— 'स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् ।' इति । तथा इतिहासोऽपि— 'ततः पीत्वा बलभित्सोममग्र्यं ये चाप्यन्ये सोमपा देवसङ्घाः सर्वेऽनुज्ञाताः प्रययुः । पार्थिवेन यथाजोषं तर्पिताः प्रीतिमन्तः ।' इति । तथा प्रीतौ 'वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः' 'सुप्रीतोऽग्निः सुधितो दम आस विशेदाति वार्यमियत्यै मनोऽग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।' तथार्थवादोऽपि— 'आहुतिभागा वा अन्या देवता अन्याः स्तोमभागाः छन्दोभागास्ता या अग्नावाहुतयो हूयन्ते ताभिराहुतिभागाः प्रीणाति अथ यत्सुवन्ति शंसन्ति च तेन स्तोमभागा छन्दोभागां उभयो ह्यस्यैता देवताः प्रीता अभीष्टा भवन्ति य एवं वेद' इति । तथा इतिहासेऽपि— 'ततस्तु स प्राह राजानमिन्द्रः प्रीतो राजन्प्रीयमाणो मरुतः सर्वाश्चान्या देवताः प्रीयमाणाः हविस्तुभ्यं प्रतिगृह्णन्तु राजन्फलम् ।'

दाने मन्त्रः— 'अर्यमायाति वृषभस्तुविष्मान् दाता वसूनां पुरुहूतो अर्हन्। सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु।' 'उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्ये। उभा दातारा विषां रयीणामुभा वाजस्य सातये हुवे वां।' 'द्रविणोदा द्रविणस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत्। द्रवीणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः।' 'हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात्' इति। तथा अर्थवादोऽपि— 'नृप एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इति। इतिहासोऽपि— 'इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः' इति। ईश्वरत्वेऽपि मन्त्रवर्णः 'अभित्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानम। अस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः' 'इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्यर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः' इति। तथा अर्थवादोऽपि—'तस्माद्रुद्रः पशूनामधिपतिः' इति। तथा इतिहासोऽपि—'तपन्तं तमभिद्रुत्य परिजग्राह वासवः वराणामीश्वरो दाता सर्वभूतहिते रतः' इति। चेतसाव-

स्वेऽपि मन्त्रः—'अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम' इति। तथा अर्थवादोऽपि—'ततो वै ते सुवर्गं लोकं प्रजानन् तद्धोभये देवा असुरा अनुबुबुधिरे' इति। तथा इतिहासोऽपि—'त्वं चैवैतद्वेत्थ पुरंदरश्च विश्वेदेवा वसवश्चाश्विनौ च।' विग्रहे मन्त्रः—'तꣳ सुप्रतीकꣳ सुदृशꣳ स्वंचमविद्वाꣳसो विदुष्टरं सपेम।' तथा अर्थवादोऽपि—'तिस्रो मइमास्तनुवो वीर्यावतीस्ताः प्रीणीता' इति 'एता वाव द्वादशप्रजापतेस्तन्व' इति। तथा इतिहासोऽपि—'तस्यां देवेश्वरः पार्थ सभायां परमासने। आस्ते शच्या महेन्द्रेण श्रिया लक्ष्म्या च भारत॥ बिभ्रद्वपुरनिर्देश्यं किरीटी लोहिताङ्गदः। विरजोम्बरश्चित्रमाल्यो हि कीर्तिद्युतिभिः सह। एवमादिभिर्मन्त्रार्थवादादिभिः इन्द्रादीनां विग्रहादिसिद्धिवत् गङ्गाया अपि 'तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः' इति च मन्त्रवर्णेन 'शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोपस्पृशत त्वचं मे सर्वाꣳ अग्नीꣳरप्सुषदो हुवे वो मयि

वर्चो बलमोजो निधत्त' इति मन्त्रवर्णेन । आदिपर्वणि स राजा शन्तनुर्धीमान्देवराजसमद्युतिः । बभूव मृगयाशीलः सततं वनगोचरः ॥ गङ्गामनुचचारैकः सिद्धचारणसेविताम् । स कदाचिन्महाराज ददर्श परमां स्त्रियम् ॥ दिव्यरूपा हि सा देवी गङ्गा त्रिपथगा नदी । मानुषं विग्रहं श्रीमद्बिभ्रती सुमनोहरम् ॥ भाग्योपनतकामस्य भार्येवोपस्थिताभवत् । शन्तनो राजसिंहस्य देवराजसमद्युतेः ॥ संभोगस्नेहचातुर्यैर्भावहाभ्यैर्मनोरमैः । राजानं रमयामास यथा रेमे तथैव सः ॥ रममाणस्तया सार्धं यथाकामं नरेश्वरः । अष्टावजनयत्पुत्रांस्तस्यामसरवर्णिनः' इति । 'तस्य रूपगुणोपेता गङ्गा श्रीरिव रूपिणी । उत्तीर्य सलिलात्तस्माल्लोभनीयतमाकृतिः ॥ दक्षिणं सालसंकाशमूरुं भेजे शुभानना' इति । एवमादीतिहासेन च गङ्गादिनदीनामपि विग्रहादिसिद्धौ संबोध्यत्वरक्षणकर्तृत्वप्रार्थनीयत्वादिकं संभवत्येव । नन्वेतत्सर्वं तदा शोभते यदीन्द्रादीनां मन्त्रार्थवादादिवशेन विग्रहादिकं सिद्धयेत्, तदेव न संभवति, तथा हि— मन्त्रास्तावत् मन्त्राधिकरणन्यायेनानुष्ठेयनिर्वापाद्यर्थप्रकाशनपराः न तु देवताविशेष-

जीभूतविग्रहादिपराः । एवमर्थवादा अपि 'विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति अर्थवादाधिकरणन्यायेन विध्यपेक्षितस्तुतिपराः न तु विग्रहादिपराः । अतोऽन्यपरैर्मन्त्रार्थवादादिभिर्विग्रहादिकं न सिध्यति यत्परः शब्दः स शब्दार्थ इति न्यायात्; अन्यथा भोजनप्रकरणे लवणानयनतात्पर्येण प्रयुक्तस्य सैन्धवमानयेति वाक्यस्य तात्पर्याविषयीभूते अश्वानयनरूपार्थान्तरेऽपि प्रामाण्यप्रसङ्गात् । एवं श्वेतो धावतीति श्विवित्रिकर्तृकवस्त्रनिर्णेजनपरवाक्यस्य इतः सारमेयो गच्छतीत्यर्थान्तरेऽपि प्रामाण्यप्रसङ्गात् । न चेष्टापत्तिः शब्दस्य तात्पर्यविषयव्यतिरिक्तार्थे प्रामाण्यव्यवहाराभावस्य सर्वसंप्रतिपन्नत्वात् । न च यथा समिधो यजतीत्यादिवाक्यानां परमतात्पर्यविषयीभूतक्रतूपकारव्यतिरिक्तविग्रहादितात्पर्यैकत्वमप्यस्त्विति वाच्यम् । 'समिधो यजति तनूनपातं यजति' इत्यादिवाक्यानां क्रतूपकारतात्पर्यकाणां समिधादियागस्वरूपेऽपि तात्पर्यस्य वक्तव्यत्वात् । अन्यथा समिधादियागानामप्रामाणिकत्वापत्त्या तैः क्रतूपकारासिद्धिप्रसङ्गात् । न चार्थवादादीनां विग्रहादितात्पर्याभावे किं-

चिद्बाधकमस्ति। न च निरालम्बनस्तुत्यनुपपत्तिलक्षणबाधकमत्राप्यस्तीति वाच्यम्— 'शिखा ते वर्धिष्यते औषधं पिब' इत्यादौ अविद्यमानशिखावृद्धिप्रकाशनमुखेन प्राशस्त्यबुद्धिवत् अर्थवादेष्वपि असदर्थमालम्ब्य स्तुत्यादिबुद्धिसंभवात्। एवं 'ब्रीहीणां मेध सुमनस्यमानः' 'अग्निस्ते तनुवं मातिधाक्', 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' 'द्यां ते धूमो गच्छतु अन्तरिक्षमर्चिः पृथिवी भस्मनापृणस्व' 'दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिंसीः पृथिव्या संभव' इत्यादिमन्त्राणामर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यादिति नावमिकाधिकरणन्यायेन अनुष्ठेयनिर्वापादिप्रशंसार्थमविद्यमानसौमनस्यशरीरवत्त्वादिवबाहुत्वादि प्रकाशयतां विद्यमाननिर्वापादिप्रकाशनेन क्रतूपकारकत्वं संभवति। तस्मादन्यपरैर्मन्त्रार्थवादादिभिर्विग्रहादिकं न सिध्यति। प्रमाणान्तरविरुद्धत्वादपि न मन्त्रार्थवादादिकं विग्रहादिसाधकम्। तथा हि—'असौ योऽवसर्पति नीलग्रीवो विलोहितः उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः' इति आदित्यस्य नीलग्रीवत्वादि-

विशिष्टं विग्रहं गोपालसलिलाहारिणीप्रभृति सकलहस्थं प्रतिपादयतो मन्त्रस्य अचेतने ज्योतिर्मण्डले आदित्यादिशब्दानां शक्तिग्राहकप्रत्यक्षविरोधः । तथा नीलग्रीवत्वविशिष्टमादित्यविग्रहं प्रतिपादयतोऽस्य मन्त्रस्य तथाविधस्य नमः सूर्यायादित्याय नमो नीलग्रीवाय शितिकण्ठायेति कृच्छ्राङ्गादित्योपस्थानमन्त्रस्थं च शिवासाधारणं नीलग्रीवत्वादिविशिष्टं विग्रहं प्रतिपादयद्भिर्मन्त्रार्थवादादिभिर्विरोधेन, तथा 'अर्यम्णे चरुं निर्वपेत्सुवर्गकामोऽसौ वा आदित्योऽर्यमा' इति श्रुतिविहितकाम्येष्टिविशेषक्रमप्रमाणविनियुक्तस्य 'अर्यमायातिवृषभस्तुविष्मान् दाता वसूनां पुरुहूतो अर्हन् सहस्राक्षो गोत्रभिद्वज्रबाहुः' इत्यादिमन्त्रस्य महेन्द्रासाधारणं वज्रहस्तत्वादिविशिष्टविग्रहं प्रतिपादयद्भिर्मन्त्रार्थवादादिभिर्विरोधः । तथा, एतेन वै सर्पा अपमृत्युमजयन् अपमृत्युं जयति य एतदुपयन्ति तस्मात्ते हित्वा जीर्णां त्वचमिति सर्पन्ति अपहिते मृत्युमजयन् सर्पा वा आदित्या आदित्यानामेवैषां प्रकाशो भवति य एतदुपयन्ति' इति आदित्यानां कद्रुसुतत्वं प्रतिपादयतोरसर्पसत्रार्थवादस्य शिरःपाण्या

युक्तान् अतिप्रभावान् पौरुषेयान्निग्रहान्प्रतिपादयद्भिर्म-न्त्रार्थवादिभिर्विरोधः। तथा— 'सायं यावानश्च वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ति'। 'अध्वर्योद्रा-वया त्वं सोममिन्द्रः पिपासति। उप नूनं युयुजे वृषणा हरी आचजगाम वृत्रहा' इत्यादीनां देवानां यागदेशागमनं प्रतिपादयतां मन्त्राणां प्रत्यक्षविरोधः। युगपत्प्रवृत्तानेक-यागदेशागमनं प्रतिपादयतां मन्त्राणां प्रत्यक्षविरोधः युगपत्प्रवृत्तानेकयागदेशागमनविरोधश्च। न च कायव्यूह-कल्पनेन सर्वत्रागमननिर्वाह इति वाच्यम्। मातृपितृभ-वत्वनियतानां करचरणादिमतां कायानामिच्छामात्रेण कल्पनानुपपत्तेः। 'कस्य वा ह देवा यज्ञमागच्छन्ति कस्य वा न बहूनां यजमानानाम्' इति ब्राह्मणश्रुत्यप्रश्ना-नुपपत्तेश्च कायव्यूहपरिग्रहेण सर्वेषां यज्ञदेशागमनासंभ-वात्। 'यो वै देवताः पूर्वः परिगृह्णाति स एना श्वो भूते यजते' इति उत्तरवाक्यमपि विरुध्येत। पश्चाद्दे-वतापरिग्रहं कृतवतां यज्ञं प्रति देवतागमनेन कर्मनैष्फ-ल्यप्रसङ्गात्। तथा देवतानां यागीयहविर्भोक्तृत्वं प्रतिपा-दयतां मन्त्रार्थवादादीनां प्रत्यक्षविरोधः। अग्नौ हुतानां

द्रव्याणां भस्मीभावस्य प्रत्यक्षसिद्धत्वात्पदहोमादिद्रव्याणामपि पांसुष्वेव निलीयमानत्वस्य प्रत्यक्षसिद्धत्वाच्च । तथा पञ्चशारदीयानामुक्षणां हयमेधीय परस्वदादीनां च यागीयानां पशूनां पर्यग्निकरणान्ते देवतोद्देशेन त्यक्तानां यथापूर्वं दृश्यमानत्वाच्च, अपि च हविर्भुञ्जाना देवता किं स्वस्थान एव स्थित्वा भुञ्जते उत यागदेशमागत्य, आद्ये 'अग्निमग्न आवह' इत्यावाहनं व्यर्थं स्यात् । अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति' इति 'आ च जगाम वृत्रहा' इत्यादि श्रुतिविरोधश्च स्यात् । द्वितीये—हविरग्निना देवानां सकाशं न नेतव्यमिति 'अतन्द्रो हव्या वहसि आविष्कृण्वन आदिदेवेषु राजसि अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त' इत्यादिश्रुतिविरोधः । एवं श्राद्धेषु तर्पणीयाः पितरः स्वस्थान एव स्थित्वा भुञ्जत इत्यङ्गीकारे तेषां श्राद्धदेशागमनविरोधः । उक्तं हि मनुना 'निमन्त्रितान् हि पितरः उपतिष्ठन्ति तान्द्विजान् । वायुभूतास्तु गच्छन्ति तथासीनानुपासते' इति । पाद्मपुराणेऽपि रामभद्रेण योगवाप्यां श्राद्धे क्रियमाणे दशरथतत्पितृपितामहास्तं देशमागत्य निमन्त्रि-

तत्राह्मणानां देहेषु स्थितान्दृष्ट्वा लज्जया श्राद्धदेशादपक्रान्तां सीतां दृष्ट्वा 'किमर्थमपक्रान्तासि' इति पृष्टवन्तं रामभद्रं प्रति सीतावचनम्, 'शृणु त्वं नाथ यद्दृष्टमाश्चर्यं हि मयेदृशम्। पिता तव मया दृष्टो ब्राह्मणाङ्गेषु राघव॥ सर्वाभरणसंयुक्तो द्वौ चान्यौ च तथाविधौ। दृष्ट्वा त्रपान्विता चाहमपक्रान्ता तदन्तिकात्॥' इति। तथा श्राद्धदेशमागत्य निमन्त्रितब्राह्मणमुखेनाविष्टा भुञ्जते इत्यङ्गीकारे अभूं नो दूतो हविषो 'जातवेदो अवाड्ढव्यानि सुरभीणि कृत्वा प्रादाः पितृभ्यः स्वधया ते अक्षन्' इति अग्निर्यजमानदत्तं सुहविः सुरभीकृत्य पितॄन्प्रापयतीति प्रतिपादकश्रुतिविरोधः। स्थावरतिर्यङ्मनुष्यादिशरीरं प्राप्तानां श्राद्धदेशागमनासंभवयुक्तिविरोधश्च। पूर्वजन्मपुत्रादिकृतश्राद्धैः कदापि कस्यापि तृप्तेरदर्शनेन प्रत्यक्षविरोधश्च। किं च देवानां हविर्भोक्तृत्वाङ्गीकारे—'न वै देवा अश्नन्ति न पिबन्त्येतद्देवा अमृतं दृष्ट्वा तृप्यन्ति' इति श्रुत्यन्तरविरोधश्च। प्रस्तरयागस्रुवहोमादीनां मन्त्रेषु कुशकाशदारुत्राकलादिषु मनुष्यानदनीयेषु तृप्तिकारकत्वस्य युक्तिविरोधश्च। तथा स्रुवादि-

परिमितैराज्यद्रव्यैर्ध्रुवदानादिपरिमितैः पुरोडाशादिद्रव्यैश्च महाविग्रहवत्त्वेन मन्त्रार्थवादादिप्रतिपादितानां देवानां तृप्तिं प्रतिपादयतां तेषां युक्तिविरोधः । 'यस्मै वा अल्पेनाहरन्ति नात्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति' इति श्रुतिरपि स्रुवादिपरिमिताज्यादिद्रव्यैर्देवतातृप्त्यसंभवयुक्तिमनुमोदते तथा देवतानां फलदातृत्वं प्रतिपादयन्ती श्रुतीनां कल्पान्तराणां नवस्थितदेवैः कल्पान्तरोपभोग्यफलदानत्वसंभवस्य युक्तिविरोधः । तथाहि देवतानां फलदातृत्वे फलमत उपपत्तेरिति अविरोधः । तथा हि । तत्र हि किं कर्मण एव फलं उत परमेश्वरादिति संदेहः । तत्र पूर्वपक्षः कर्मण एव फलम् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति श्रुत्या कर्मणः स्वर्गसाधनत्वेन विधानात् । न चाशुतरविनाशिनः कर्म कालान्तरभाविफलसाधनत्वमिति वाच्यम्, श्रुत्यवगतकरणत्वनिर्वाहाय कर्मैव स्वावस्थायां फलं स्वर्गादिकमुत्पाद्य विनश्यति, तच्च फलं कर्त्रा स्वसंपादितधनादिवत्तु कालान्तरे उपभुज्यते इति वा कल्प्यते । अन्यथा श्रुत्यवगत-

स्वर्गसाधनता यागस्य भज्येत। अतः कर्मण एव फलम्। अन्यथा ईश्वरात्फलमित्यङ्गीकारे सर्वसाधारणादीश्वरात् विचित्रफलं कथं भवेत्, विचित्रफलदाने च ईश्वरस्य वैषम्यनैर्घृण्ये स्याताम्। यद्धि च तत्परिहाराय कर्मानुरोधेन ईश्वरः फलं ददातीति कल्प्यते, तर्ह्यावश्यकात्कर्मण एव फलमित्यस्तु किमीश्वरेण इति। सिद्धान्तस्तु— ईश्वर एव फलप्रदाता अन्नादो वसुदान इत्यादि श्रुत्या ईश्वरस्य फलदातृत्वावगमात् सर्वज्ञस्य सर्वशक्तेः परमेश्वरस्यैव तत्तत्कर्मानुरूपफलदाने समर्थत्वाच्च। न च वैषम्यनैर्घृण्ययोः प्रसङ्गः। 'एष ह्येव साधु कर्म कारयति' इत्यादि श्रुत्या कर्मस्वरूपमपेक्ष्यैव फलप्रदातृत्वावगमेन वैषम्यनैर्घृण्ययोरप्रसक्तेः। तस्मादीश्वर एव फलदाता ईश्वरस्य फलदातृत्वानङ्गीकारे कुलालानधिष्ठितदण्डादेरिव चेतनाधिष्ठितस्य कर्मणः कारणानुपपत्तेः। किं च कर्मणः फलदातृत्वं चिरप्रध्वस्तत्वात् अनुपपन्नम्। न च स्वावस्थानवेलायां कर्मणःफलं जन्यत इति वाच्यम्, तत्किं भोक्रा संबद्धम् असंबद्धं वा। न तावदाद्यः तदानीमेवानुभवप्रसङ्गात्; न द्वितीयः

भोक्तृसंबन्धाभावे फलत्वव्याघातात्, अज्ञातसुखदुःखयोः प्रमाणाभावाच्च। न चापूर्वादिकं द्वारमाश्रित्य कर्म फलजनकं भवितुमर्हति, प्रमाणाभावात्। न च श्रुतिप्रतिपन्नस्वर्गसाधनत्वानुपपत्तिरेव मानमिति वाच्यम्। अन्नादो वसुदान इति श्रुत्या 'सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्। मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यति' इत्यादिभगवद्वचनात् प्रसन्नादीश्वरात्फलमित्यवगमेन ईश्वरप्रसाददारा कर्मणः फलजनकत्वसंभवेनानुपपत्तेरभावात्। तस्मादीश्वर एव फलदाता। तथा च गीतायाम् 'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान् हि तान्' इति। 'त्रैविद्या मां सोमपा धूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते' इति च। एवं परमेश्वरस्यैव फलदातृत्वे सिद्धे तद्विरोधात् इन्द्रादीनां न फलदातृत्वम्। तथा एकैव अग्निहोत्रदेवता दध्ना प्रीता इन्द्रियं प्रयच्छति पयसा पशून् इत्यादि व्यवस्थाकल्पनायां लोके द्रव्यदानेन प्रीणनीयराजादीनां

प्रदेयद्रव्यभेदेन व्यवस्थितफलप्रदातृत्वादर्शनेन लोकदृष्टि-विरोधात् उक्तन्यायेन देवतानां फलदातृत्वान्यथानुपपत्तिकल्पनीयं फलैश्वर्यमपि निरस्तम्। तस्मादुक्तन्यायेन देवताविग्रहादीनां सकलप्रमाणविरुद्धत्वात् मन्त्रार्थवादे इतिहासादिकं विग्रहादिपक्षकसाधकं न भवत्येवेति इन्द्रादिदेवतानां विग्रहादिकं न सिद्ध्यत्येव इति। एवमुक्त-न्यायेन गङ्गाया अपि उदाहृतमन्त्रेतिहासादेः विग्रहाद्य-सिद्धौ संबोध्यत्वरक्षणकर्तृत्वादिकमनुपपन्नमेव इति चेत्, सन्तीति वदन्कर्ममीमांसकः प्रष्टव्यः किं विग्रहवन्तः कर्मदेवा न सन्ति। अथ वा आजानदेवा न सन्ति इति। तत्र न तावदाद्यः, स्वर्गाद्यर्थतया ज्योतिष्टोमादिविधान-वैयर्थ्यापत्तेः। ज्योतिष्टोमादयो हि 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं यत्तत्सुखं स्वःपदा-स्पदम्' इत्याद्यर्थवादावगतसुखलक्षणस्वर्गाद्यर्थाः स च स्वर्गादिः स्वर्गलोके 'यजमानं हि देहि मां नाकस्य पृष्ठे परमे व्योमन्' इति मन्त्रावगतलोकविशेषं गतेन अन्य-तरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वेत्यादिश्रुतिप्रतिपन्नं दिव्यशरीरं प्राप्तेनोपभोक्तव्यः।

'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति श्रवणात् अशरीरस्य सुखोपभोगासंभवात् इहस्थितस्य पुण्यपापाभ्यामारब्धशरीरादियुक्तस्य विधिनिषेधबद्धस्य दुःखासंभिन्नसुखोपभोगासंभवाच्च । अतश्च ज्योतिष्टोमादिविधिवैयर्थ्यपरिहाराय ज्योतिष्टोमादिफलभूतस्वर्गाद्युपभोगार्थं देवाः दिव्यविग्रहादिमन्तोऽवश्यमभ्युपगन्तव्याः । अत एव स्वर्गोपभोगाय शरीरमुत्पादयितुमाप्यपयःप्रभृतिभिराहुतिद्रव्यैः सूक्ष्मरूपतामापन्नैर्वेष्टितो गच्छतीति । उक्तं रंहत्यधिकरणे तथा हि—तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । जीवो भूतसूक्ष्मैरसंपरिष्वक्तो देहं गच्छति, उत संपरिष्वक्तः इति विशये 'स एतास्तेजोमात्राः समभ्यादद्दान इत्यादिवाक्येषु करणोपादानवद्भूतोपादानाश्रवणात् असंपरिष्वक्तो गच्छति इति पूर्वं प्रापय्य तदन्तरप्रतिपत्तौ देहान्तरप्रतिपत्तौ देहबीजभूतभूतसूक्ष्मैः संपरिष्वक्तो रंहति गच्छति कुतः प्रश्ननिरूपणाभ्यां वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नः इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति निरूपणं प्रतिवचनं ताभ्यां भूतसूक्ष्मैः परि-

वेष्टितो गच्छतीति । ननु पञ्चम्याहुतावापः पुरुषवचसो भवन्तीत्ययं मात्रावेष्टितत्वं श्रुतमत आह—त्र्यात्मकत्वात्तु भूयस्त्वात् त्रिवृत्करणश्रुतेः । इतरभूतद्वयसहितानामेव अपां शरीरारम्भकत्वं न केवलानाम् । कार्यस्य शरीरस्य त्र्यात्मकत्वदर्शनात् च । बाहुल्यापेक्षया तु अपां पुरुषवचनत्वं न भूतान्तरनिरासार्थम् । दृश्यते हि सर्वदेहेषु रसलोहितादिद्रवभूयस्त्वं कर्म च निमित्तकारणं देहारम्भे कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिः द्युलोकाख्येऽग्नौ हूयन्त' इति । वक्ष्यति तस्मादप्यपां बाहुल्यसिद्धम् । प्राणगतेश्च 'तमुत्क्रामन्तं प्राणेनोत्क्रामति' इति । प्राणगतिश्रुता सा नेतराश्रया उपपन्ना जीवदेहे तथा दर्शनात् तथा च यदाश्रयः प्राणो गच्छति तैर्भूतसूक्ष्मैर्वेष्टितो जीवो रंहतीति गम्यते । इन्द्रियाणां च तदाश्रयत्वानुपलब्धेरग्न्यादिगतश्रुतेरिति चेन्न, भाक्तत्वात् । मृतस्य 'अग्निं वागप्येति वातं प्राण' इति श्रुतेः न प्राणो जीवेन सह गच्छतीति चेन्न, वागादीनामग्न्यादिगतिश्रुतेः । ओषधीर्लोमानि वनस्पतीन्केशा इत्यादि-

वत् भाक्ततया तत्कृतोपकारनिवृत्तिमात्रपरत्वात् । प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः । शुरर्जन्यपृथिवीपुरुषयोषिल्लक्ष्मणेषु पञ्चाग्निषु प्रथमे 'असौ वाव लोको गौतमाग्निः' इत्युक्तः 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' इति श्रद्धाया एव होमद्रव्यत्वेन श्रवणात् । अपां चाश्रवणात् पञ्चम्यामाहुतौ अपां पुरुषभावो न युक्त इति चेन्न । यतः 'आपो हास्मै श्रद्धां संनमन्ते' इति श्रुतेः श्रद्धाहेतवः आपः श्रद्धाशब्देनाभिलप्यन्ते । एवं सति प्रश्नप्रतिवचनयोरुपपत्तिः । इतरथा कथं वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति, पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नप्रतिवचनयोः प्रथमाहुतेरसंभवादुपपत्तिः । अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः । श्रद्धाशब्दोदितानामपां पुरुषवचस्त्वेऽपि न तत्परिवेष्टितत्वं जीवस्य उच्यते श्रद्धावज्जीवस्याश्रुतत्वादिति चेन्न । कुतः ? अथ य इमे इष्टापूर्ते दत्तमित्युपासते ते धूमभिसंभवन्तीति वाक्यशेषात् अग्निहोत्राद्यनुष्ठातृणां प्रतीतेः तेषां चाग्निहोत्रादर्शपूर्णमासादिकर्मसाधनभूतदधिपयःप्रभृतयो द्रवद्रव्यभूयस्त्वात् प्रत्यक्षत्वेन आपः सन्ति । ता आहव-

नीये हुताः सूक्ष्मा आहुत्यपूर्वरूपाः सत्यः तानिष्टादिकारिण आश्रयन्ति। तेषां च नैधनेन विधिना शरीरे संस्कृते श्रद्धापूर्वकर्मसमवायिन्य आहुतिमय्य आपोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिणो जीवान्परिवेष्ट्यामुं लोकं फलदानाय नयन्ति। तदिदं नयनं जुहोतिनाभिधीयते श्रद्धां जुह्वति इति। तथा चाग्निहोत्रषट्प्रश्नप्रतिवचनरूपेण वाक्यशेषेण 'ते वा एते आहुती हुते उत्क्रामतः' इति। एवमादिनाग्निहोत्राहुत्योः फलारम्भाय लोकान्तरप्राप्तिः प्रदर्शिता। तस्मादाहुतिमयीभिरद्भिः संपरिष्वक्तो जीवो रंहति स्वकर्मफलभोगाय इति सिद्धम्। नाप्याज्ञानदेवा न सन्तीति द्वितीयः, इन्द्रत्वादिप्रापकशताश्वमेधादिविधिवैयर्थ्यापत्तेः। किं च, ब्रह्मणः सायुज्यं सलोकतां यन्ति एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतां यन्ति य एतदुपयन्तीत्यादिश्रुत्या ब्रह्मादिदेवतासायुज्यसार्ष्टिसालोक्यादिफलोद्देशेन विश्वसृज्जामयने विधानवैयर्थ्यप्रसङ्गात्। तत्र सालोक्यं तल्लोकप्राप्तिस्तत्सार्ष्टिस्तत्समानभोगत्वं तत्सायुज्यं च गान्धर्वादिशास्त्रं जानानस्य ब्रह्मादेर्नृत्तगीतादिभिर्यो भोगस्तादृशभोगवत्त्वमिति विवेकः।

तथा च छन्दोगानां सामविधानब्राह्मणे 'सुतासो मधुमत्तमा इति वर्ग' इत्यारभ्य 'मासेनेन्द्रं चतुर्भिः प्रजापतिं संवत्सरेण यत्किंच जगत्सर्वं हास्य गुणीभवति' इत्यन्तेन इन्द्रादिदेवतावशीकरणफलोद्देशेन सुतासो मधुमत्तमा इत्यस्यामृचि उत्पन्नस्यामजपविधानवैयर्थ्यप्रसङ्गात्। न हि तत्तल्लोकाधिपानां दिव्यदेहोपभोगभाजामभावे तत्तदायुज्यवशीकरणाद्युद्देशेन कर्मविधानं संभवति। किं च, आजानदेवकर्मदेवानां विग्रहवत्त्वानङ्गीकारे तं ब्रह्माह अभिधावत मम यशसा तमागतं पृच्छति कोऽसीति ब्रह्मालंकारेणालंकृतः इत्यादिश्रुतिविरोधश्च। एवं च आजानजानां कर्मदेवानां च विग्रहादिसिद्धौ, सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणीति श्रुत्या कर्मजानां देवानां देहप्रभामण्डलान्येव नक्षत्राणीति यथा स्वीक्रियते, तेनैव प्रकारेण आजानजानामादित्यादिदेवानामपि मण्डलानि देहप्रभामण्डलान्येव, तस्मिन्नेव मण्डले आदित्यादिशब्दाः प्रयुज्यन्ते, गोलकेष्विव चक्षुरादिशब्दाः; एवं च तदीयदेहप्रभामण्डलदर्शनमेव आदित्यादिदर्शनमिति कृत्वा 'ततैनं गोपा अदृशन्' इत्यादिश्रुत्या आदित्यादेः सर्वजनदृश्यत्वप्रति-

पादनं न विरुध्यते। एवमस्मिन्मन्त्रे कृच्छ्राङ्गादित्योपस्थानमन्त्रे च आदित्यस्य नीलग्रीवत्वादिशिवासाधारणाकृतिविशेषप्रतिपादनम् 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' 'नमो हिरण्यबाहवे' इत्यादिश्रुतिप्रतिपन्नान्तर्याम्यभिप्रायेणेति न तु प्रयुक्तोऽपि विरोधः शङ्कनीयः। 'अर्यमा याति' इति मन्त्रेऽपि आदित्यस्य महेन्द्रासाधारणबज्रहस्तत्वादिप्रतिपादनं द्वादशादित्यान्तर्गतेन्द्रपरत्वान्न विरुध्यते। तथा च भारते आदिपर्वणि— 'धाता मित्रोऽर्यमा शक्रो वरुणश्चांश एव च। भगो विवस्वान्पूषा च सविता दशमस्तथा॥ एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते' इति। हरिवंशेऽपि— 'अदित्यां काश्यपाज्जाता आदित्या द्वादशैव हि। इन्द्रो विष्णुर्भगस्त्वष्टा वरुणोंशोऽर्यमा रविः। पूषा मित्रश्च वरदो धाता पर्जन्य एव च' इति। 'सर्पा वा आदित्याः' इत्याद्युक्तिरपि यूपादित्योक्तिवत्प्रशंसापरा। एवं निरस्तसमस्तविरोधेन फलविधिसामर्थ्येन सिद्धे विग्रहवति देवतागणे युगपदारब्धेषु क्रतुषु युगपदाहूतेन्द्रादिदेवानां युगपत्संनिधानमपि नानुपपन्नम्। योगबलेनानेकशरीरपरिग्रहसंभ-

वात्, शरीराणां मातापितृप्रभवत्वनियमस्तु अणिमाद्यष्टैश्वर्यादिफलकयोगविधिविरोधात् सुखानां दुःखसंभिन्नत्वनियमवदनादरणीयः । अत एव मातापितृसंयोगं विनैव संकल्पमात्रेणैवानेकशरीरपरिग्रहं दर्शयति श्रुतिः— 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते' इत्यादि । तथा— 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा' इत्यादि । विष्णुपुराणेऽपि— 'तथान्यान्मानसान्पुत्रान्ससर्जादौ चतुरानात्मनोऽसृजत् । मरुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा । मरीचिं दक्षमत्रिं च वसिष्ठं चैव मानसान् । नव ब्रह्माण इत्येते पुराणे निश्चयं गताः' इति । आदिपर्वण्यपि— 'एवमुक्त्वा तु यजने हुते हविषि संस्कृते । उत्तस्थौ पावकात्तस्मात्कुमारो देवसंनिभः । कुमारी चापि पाञ्चाली वेदीमध्यात्समुत्थिता' इति । एवं च यज्ञवाटमागतानां देवानामदृश्यत्वमपि अणिमाद्यष्टैश्वर्यबलादुपपन्नं न प्रसक्तेन विरुध्यते । 'कस्य वा ह देवा यज्ञमागच्छन्ति यो व देवताः पूर्वं प्रतिगृह्णाति स एनान् श्वोभूते यजते' इत्याद्यर्थवादानां प्रातरन्वाधानस्ता-

बकत्वेन स्वार्थतात्पर्यकत्वाभावात्। एवं भोक्तृत्वमपि देवानामुपपन्नमेव। अग्नौ प्रक्षिप्तस्य हविषो भस्मीभावेऽपि रसांशभोजनसंभवात्। न च तत्र प्रमाणाभावः, 'अबाहुव्याणि सुरभीणि कृत्वा' इति हविषोऽवस्थान्तरकरणपूर्वकं नयनप्रतिपादकमन्त्रस्यैव प्रमाणत्वात्। एवं पर्यग्निकरणान्ते उत्सृष्टेषु पशुषु काशकुशस्ववादिष्वपि रसांशभोगः संभवत्येव। न चैवमुत्सृष्टानां पशूनां पूर्वावस्थातो वैलक्षण्यमनुभूयेतेति वाच्यम्। मधुकरोपभुक्तपुष्पाणामिव वैलक्षण्योपपत्तेः। न चैवम् अग्नौ प्रास्ताहुतिरित्यादिस्मृत्या हविषः आदित्यादिमण्डलं प्राप्य पुनर्वृष्ट्यन्नपुरुषादिभावेन प्रत्यावृत्तिप्रतिपादनं विरुध्येत इति वाच्यम्। 'यद्धि देवा हविर्जुषतेऽल्पमप्येकमाहुतमपि तद्गिरिमात्रं वर्धयन्ते' इति त्यक्तस्य हविषो वृद्धिश्रवणेन कश्चिदंशस्तृप्तिपर्याप्तो देवैर्भुज्यते। कश्चिदंशो वृष्ट्यन्नादिरूपेणावर्तत इति न विरोधः। पित्राद्युद्देशेषु दत्तमन्नमपि पित्रादिभिर्यच्छरीरं परिगृहीतं तत्तज्जात्युचिताहाररूपेण परिणमते पित्राद्युद्देशेषु दत्तमन्नमपि तत्तत्तृप्तिकरं भवति। तथा च विष्णुपुराणे— श्यमन्तकमण्याहरणाय जाम्बवता सह

युध्यमानस्य कृष्णस्य ज्ञातिकृतश्राद्धदत्तविशिष्टपात्रोपयुक्तान्नतोयादिना कृष्णस्य बलप्राणपुष्टरभूत् इति। तत्रैव 'श्रद्धान्वितैर्दत्तं पितृभ्यो नाम गोत्रतः। यदाहारास्तु ते जातास्तदाहारत्वमेति तत्' इति। मात्स्येऽपि— 'देवो यदि पिता जातः शुभकर्मणि योगतः। तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुतिष्ठति॥ गान्धर्वभोग्यरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेप्युपतिष्ठति॥ पानं भवति यक्षत्वे राक्षसत्वे तथामिषम्। दानवत्वे तथा मांसं प्रेतत्वे रुधिरोदकम्॥ मनुष्यत्वेऽन्नपानादि नानाभोगरसो भवेत्' इति। एवं च पित्राद्युद्देशेन दत्तं हविस्तत्तज्जात्युचितान्नरूपेण परिणतं सत्तत्तृप्तिकरं भवति। देवानां यागदेशानागमने आवाहनश्रुतेः, आगमने अग्नेर्हव्यवाहत्वश्रुतेश्चिरोध इत्यपि न, अग्निमग्न आवहेत्यादिमन्त्रेण आह्वाने आगत्य हावींगृह्णन्ति अनाह्वाने च अग्निनानीतं हविर्भुञ्जते इति व्यवस्थया आवेरोधसंभवात्। अत एव मन्त्रेणाह्वाने देवतागमनं भारते दृष्टम्। जनमेजयः—यथा चेदं कर्म समाप्यते मे यथा च वै तच्चक्यति शीघ्रम्। तथा भवन्तः प्रयतन्तु सर्वे परं शक्त्या सहमे

विद्विषाणः॥ ऋत्विजः—यथा शास्त्राणि नः प्राहुर्यथा शंस-
ति पावकः। इन्द्रस्य भवने राजंस्तक्षको भयपीडितः। यथा
सूतो लोहिताक्षो महात्मा पौराणिकश्चोदितवान्पुरस्तात्।
एतच्छ्रुत्वा दीक्षितस्तप्यमान आस्ते होतारं चोदयन्
कर्मकाले॥ होता च यत्तोऽस्य जुहाव मन्त्रैर्यथामरेन्द्रः
स्वयमाजगाम। विमानमारुह्य तदैव देवैः सर्वे देवैः परिसं-
स्तूयमानः॥ तस्योत्तरीये निहितः स नागो भयोद्विग्नः
शर्म नैवाभ्यगच्छत्। जनमेजयः—इन्द्रस्य भवने विप्रा यदि
नागः स तक्षकः। तमिन्द्रेणैव सहितं पातयध्वं विभावसौ॥
हूयमानस्तथा चैव तक्षकः सपुरंदरः। आकाशे ददृशे
चैव ब्राह्मणेन व्यथितस्तथा॥ पुरंदरस्य तं यज्ञं दृष्ट्वोरु
भयमाविशत्। हित्वा तु तक्षकं त्रस्तः स्वमेव भवनं
ययौ। इन्द्रे गते तु नागेन्द्रस्तक्षको भयमोहितः॥ मन्त्र-
शक्त्या पावकार्चिः समीपमवशो गतः। सौतिः—जन-
मेजयेन राज्ञा तु नोदितस्तक्षकं प्रति। होता जुहाव तत्रस्थं
सशक्रं पन्नगं तथा॥ आदिपर्वणि—'सा तथोक्ता
तथेत्युक्त्वा तेन भर्त्रा वराङ्गना। अभिवाद्याभ्यनुज्ञातः
प्रदक्षिणमवर्तत॥ आह्वयामास वै कुन्ती गर्भार्थं धर्मम-

च्युतम् ॥ जजाप मन्त्रं विधिवद्दत्तं दुर्वाससा पुरा । आजगाम ततो देवी धर्मो मन्त्रबलोत्तप: । विमाने सूर्य-संकाशे कुन्ती यत्र व्यवस्थिता' इति । यद्यप्यतीतानां पित्रादीनां परिगृहीतजन्मान्तराणां श्राद्धदेशागमनं युक्ति-विरुद्धं तथापि तेषामधिष्ठात्राजानपितृरूपा: वसुरुद्रादि-त्यादय: स्मृतिषु प्रसिद्धा: स्वयं हविर्भिस्तृप्ता: सन्त: स्वा-धिष्ठितान्यजमानपितॄनपि तर्पयित्वा श्राद्धकर्तुरपि उचि-तफलं प्रयच्छन्ति । यथा सुहृद्दत्तौदनेन स्वयं तृप्ता गर्भिण्यो गर्भाण्यपि पोषयन्ति सुहृच्चाश्च सत्युपकुर्वन्ति । हरिवंशे भीष्मं प्रति शन्तनुवचनम्—'आदिदेवसुनाख्यात पितरो देवदेवता: । तान्यजन्ति स्म लोका वै सदेवनर-दानवा: । सयक्षोरगगन्धर्वा: सकिंनरमहोरगा: ॥ आप्यायिताश्च ये श्राद्धै: पुनराप्याययन्ति वै । जगत्सदे-वगन्धर्वमिति ब्रह्मानुशासनम् ॥ तान्यजस्व महाभागा-ऽश्राद्धी श्राद्धैरतन्द्रित: । ते ते श्रेयो विधास्यन्ति सर्व-कामफलप्रदा: । त्वयैवाराध्यमानास्ते नामगोत्रादिकी-र्तनै: ॥ अस्मानाप्याययिष्यन्ति स्वर्गस्थानपि भारत' इति । तदुक्तं पुराणे—'वसुरुद्रा दितिसुता: पितर:

श्राद्धदेवताः । प्रीणयन्ति मनुष्याणां पितृंश्राद्धेषु तर्पिताः ॥ एवमेते महात्मानः श्राद्धे सत्कृत्य पूजिताः । सर्वान्कामान्प्रयच्छन्ति शतशोऽथ सहस्रशः ।' इति । विष्णुपुराणे—'श्राद्धैराप्यायिता दद्युः सर्वान्कामान्पितामहाः' इति । यदपि— 'न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति' इत्यादि श्रुतिविरोध इति, तन्न संभवति । तत्र 'असौ वा आदित्यो देवमधु' इत्यादि खण्डपञ्चकप्रतिपादितरोहजादिरूपात्मकान्यमृतानि स्वतोऽनदनीयद्रव्यत्वेन कुशादिवददनीयरूपतया परिणामासंभवाच्च अनुपभोग्यत्वशङ्कायां दर्शनमात्रेण तृप्तिप्रदानि इति परिहारार्थत्वेन तदवतारात्, यत्तादनीयं वस्तु तदुपभोगे तु न किंचिद्बाधकमास्ते । न च प्रीतिमतामपि देवानां कल्पान्तरभाविफलदातृत्वं न संभवति । तेषामिन्द्रादीनां कल्पान्तरावस्थानासंभवादिति वाच्यम्, तत्रापि देवताप्रीतिजनितेश्वरप्रीतिद्वारा फलोपपत्तेः । न चैवं सर्वत्र आदृश्यकेश्वरप्रीत्यैव तत्फलसंभवे किं देवताप्रीतिकल्पनयेति वाच्यम् । मन्त्रार्थवादादिभिरवगतदेवताप्रीतिपरित्यागे प्रमाणाभावात् ।

न चैवमीश्वरप्रीतैः साधारणतया फलतारतम्यं न स्यात्। तारतम्ये च प्रीतस्य परमेश्वरस्य वैषम्यनैर्घृण्यप्रसङ्गः इति वाच्यम्। 'एष ह्येव साधु कर्म कारयति तं यमधो निनीषते' इति श्रुत्या कर्मापेक्षयैव फलदानेन वैषम्याद्यभावात्। अत एव फलमत उपपत्तेरित्यधिकरणविरोधोऽपि नास्ति, कर्मणा प्रीतस्य परमेश्वरस्यैव 'अन्नादो वसुदानः' इति श्रुत्या फलदातृत्वाभ्युपगमात्। अत एव गुणक्रियाव्यपदेशाकाङ्क्षायागेषु कृष्णाय स्वाहा श्वेताय स्वाहेत्यादिषु देवतायां अभावेऽपि परमेश्वरप्रीत्यैव फलसंभवान्न विरोधः। किं च इन्द्रादयो देवा नात्यन्तं परमेश्वराद्भिन्नाः, किं तु 'एतद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ एव सर्वे देवाः' इति 'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः' इति 'एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवाः' इत्यादि श्रुतेः 'एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः॥ सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ' इति स्मृतेश्च इन्द्रादयो देवास्तस्यैव रूपभेदाः

इति न तेन तेषामन्यथासिद्धिः। वस्तुतस्तु मन्त्रार्थवादादीनां फलविध्यपेक्षितदेवतास्वरूपप्रतिपादकतया विवक्षितार्थकत्वेन मीमांसकैरपि अङ्गीकर्तव्यतया देवताविग्रहादिपञ्चकनिराकरणस्य फलप्रदाने कर्मण एव प्राधान्यमिति प्रतिपादनार्थत्वेन विग्रहादिनिराकरणेऽपि तेषां तात्पर्याभावात्, तैरपि मन्त्रार्थवादादीनामवान्तरतात्पर्येण विग्रहादिकमङ्गीकर्तव्यमेव। यदुक्तं तात्पर्याविषयत्वाद्विग्रहादिकं न सिद्ध्यति, अन्यथा 'ऐन्द्रवमानय' इति वाक्यस्य लक्षणानयनतात्पर्येण प्रयुक्तस्य तात्पर्याविषयेऽश्वानयनरूपार्थान्तरेऽपि प्रामाण्यं स्यादिति तत्र अश्वानयनरूपार्थान्तरप्रतीतेरननुभवपराहतत्वात्। न चार्थवादस्थले स्तुतिव्यतिरिक्तार्थो न प्रतीयत इति वक्तुं शक्यम्। तथा सति शक्यार्थप्रतीत्यभावेन शक्यसंबन्धरूपलक्षणया स्तुतिप्रतिपत्तेरभावप्रसङ्गात् अनुभवविरोधाच्च। एवं च मानान्तराविरुद्धः अप्राप्तार्थः शब्दगम्य इति अर्थवादादिवाक्याद्विग्रहादिकं सिद्ध्यत्येव। अत एवानधिगतार्थगन्तृ प्रमाणमिति मीमांसका अपि वर्णयन्ति। अन्यथा तात्पर्याविषयीभूतात्प्रामाण्यव्यावृत्तिरवश्यन्तीयरू-

पोऽपूर्वोऽर्थस्तात्पर्याविषयोऽपि सिद्ध्यति । तदा आर्ष-वादिकदेवताविग्रहादिष्वपि दीयतां दृष्टिः । एवं च देवा-नामाह्वाने आगत्य भुञ्जते अनाह्वाने च स्वस्थाने स्थित्वा-ग्निना नीतं हविर्भुञ्जते । भुक्त्वा च प्रीता भवन्ति प्री-ताश्च फलं प्रयच्छन्ति फलप्रदानानुपपत्त्या ईश्वरा अपि देवता अपि च अध्वादिष्वसंभवादनधिकारं जैमिनिरिति सूत्रे मधुविद्यायां वस्वादिदेवानामधिकारो नास्ति, 'तस्यां विद्यायां वसूपजीव्यत्वादेः ध्यातव्यत्वस्य वसूनामेकैको भूत्वेत्यनेनावगतवसुभावलक्षणफलस्य चासंभवादनधिकार इति जैमिनिराचार्यो मन्यते' इति भगवता बादरायणेन प्रतिपादनात् असंभवस्थले अनधिकारेऽपि संभवद्विद्या-न्तरे अधिकारोऽस्तीति जैमिनेरपि देवताविग्रहादिकं संमतमेवेत्यवगम्यते । इदं सर्वमपि विग्रहं चैतन्यं चान्तरा अनुपपन्नमिति सिद्धं विग्रहादिपञ्चकमिन्द्रादिदेवता-नाम् । एवमेव इतिहासपुराणादिभिर्विग्रहादिमत्त्वेन प्रसि-द्धायाः गङ्गायाः प्रार्थनीयत्वफलदातृत्वादिकं सर्वमप्युपप-न्नमेव । न च तदुपस्थापकपदाभावात् न तद्बोधः संभव-तीति वाच्यम् । चक्षुरादिशब्दानामिन्द्रियवाचकत्ववत्

गङ्गादिशब्दानामपि तदभिमानिदेवतावाचकत्वसंभवेन तेषामेव तदुपस्थापकत्वात्। न च प्रवाहे सर्वैः प्रयुक्तानां गङ्गादिपदानां तदभिमानिदेवतावाचकत्वं न संभवतीति वाच्यम्। आदित्यादिशब्दानां ज्योतिर्मण्डल इव गङ्गादिपदानामपि प्रवाहे लक्षणयैव प्रयोगसंभवेन तद्वाचकत्वसंभवात् इति। एवमेवास्मिन्ग्रन्थे तत्र तत्र श्रूयमाणानां नदीसमुद्रपुरीपर्वतवनस्पतिविमानादीनां श्रुतिस्मृतीतिहासपुराणादिभिर्विग्रहादिमत्त्वेनावगमात्तद्बोध्यत्वादिकमुपपन्नम्। तथा हि— एवमेव यमुनां प्रति सीतावचनम्—

स्वस्ति देवि तरामि त्वां पारयेन्मे पतिर्व्रतम्।
यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च॥

स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालिताम्।

इति।

ततो मध्यात्समुद्रस्य सागरः स्वयमुत्थितः।
उद्यन्हि महाशैलान्मेरोरिव दिवाकरः॥

पन्नगैः सह दीप्ताग्र्यैः समुद्रः प्रत्यदृश्यत।
स्निग्धवैदूर्यसंकाशो जाम्बूनदविभूषितः॥

रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः ।
सर्वपुष्पमयीं दिव्यां शिरसा धारयन्स्रजम् ॥
धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव ।

इति । एवं पुरीं प्रति रामवचनम् ।

आपृच्छे त्वां पुरिश्रेष्ठे काकुत्स्थपरिपालिते ।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥

इति । सुन्दरकाण्डे लङ्काहनुमत्संवादे—

तथा सा हरिशार्दूलं प्रविशन्तं महाबलम् ।
नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥
सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता ।
स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥
पुरस्तात्तस्य वीरस्य वायुसूनोरतिष्ठत ।
ततः कृत्वा महानादं सा वै लङ्का भयानकम् ॥
तलेन वानरश्रेष्ठं ताडयामास वेगिता ।
ततः संवर्तयामास वामहस्तस्य सोऽङ्गुलीः ।
मुष्टिनाभिजघानैनां हनुमान्क्रोधमूर्छितः ॥

बालकाण्डे—

शैलेन्द्रो हिमवन्नाम धातूनामाकरो महान् ।

तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि ॥
या मेरुदुहिता राम तयोर्माता सुमध्यमा ।
नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया ॥

तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता ।
उमा नाम द्वितीया तु कन्या तस्यैव राघव ॥

इति । सुन्दरकाण्डे—

हिरण्यनाभो मैनाको निशम्य लवणाम्भसः ।
उत्पपात जलात्पूर्णो महाद्रुमलतायुतः ॥

प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् ।
मानुषं धारयन्रूपमात्मनः शिखरे स्थितः ॥

दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ।
निपत्य मयि शृङ्गेषु विश्रमस्व यथासुखम् ॥

इति ।

न्यग्रोधं तमुपागम्य वैदेही वाक्यमब्रवीत् ।
नमस्तेऽस्तु महावृक्ष पारयेन्मे पतिव्रतम् ॥

कौसल्यां चैव पश्येयं सुमित्रां च यशस्विनीम् ।
इति सीताञ्जलिं कृत्वा प्रत्यगच्छद्वनस्पतिम् ॥

युद्धकाण्डे—

अब्रवीत्तु तदा रामस्तद्विमानमनुत्तमम् ।
वह वैश्रवणं वेगमनुज्ञातोऽसि गम्यताम् ॥

ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ।
उत्तरां दिशमागम्य जगाम भवनाचलम् ॥ इति ।

उत्तरकाण्डे—

अथापश्यद्राक्षसमये भ्रातृभिः सह राघवः ।
शुश्राव मधुरां वाणीमन्तरिक्षात्प्रभाषिताम् ॥

सौम्य राम निरीक्षस्व सौम्येन नयनेन माम् ।
कैलासशिखरात्प्राप्तं विद्धि मां पुष्पकं प्रभो ॥

तव शासनमाज्ञाय गतोऽस्मि धनदं प्रति ।
उपयातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥

निर्जितस्त्वं महेन्द्रेण राघवेण महात्मना ।
निहत्य युधि दुर्धर्षं राघणं राक्षसाधिपम् ॥

ममातिप्रेमा प्रीतिर्हते तस्मिन्दुरात्मनि ।
राघणे जगणे सौम्य सपुत्रे सहबान्धवे ॥

स त्वं रामेण लङ्कायां निर्जितः परमात्मना ।
वह सौम्य तमेव त्वमहमाज्ञापयामि ते ॥

एष मे परमः कामो यत्त्वं राघवनन्दनम् ।
वहेर्लोकस्य संयानं गच्छ त्वं विगतज्वरः ॥

तच्छासनमहं ज्ञात्वा धनदस्य महात्मनः ।
त्वत्सकाशं पुनः प्राप्तः स्वयं प्रतिगृहाण माम् ॥

बाढमित्येव काकुत्स्थः पुष्पकं समपूजयत् ।
लाजाक्षतैश्च पुष्पैश्च गन्धैश्चैव सुगन्धिभिः ॥

गम्यतां च यथाकाममागच्छेस्त्वं यदा स्मरे ।
सिद्धानां च यथा सौम्य मा विषादेन योजय ॥

एवमस्त्विति रामेण विसृष्टः पुष्पकः पुनः ।
अभिप्रेतां दिशं प्रायात्पुष्पकः पुष्पमोदितः ॥

उत्तरकाण्डे—

मनसा पुष्पकं दध्यावागच्छेति महायशाः ।
इङ्गितं स तु विज्ञाय पुष्पको हेमभूषितः ।
आजगाम मुहूर्तेन समीपं राघवस्य वै ॥

सोऽब्रवीत्प्रणतो भूत्वा आगतोऽस्मि नराधिप ।
वश्यस्तव महाबाहो किंकरः समुपस्थितः ॥

भाषितं रुचिरं श्रुत्वा पुष्पकस्थ नराधिपः ।
अभिवाद्य महर्षींस्तान्विमानमधिरोहत ॥ इति ।

बालकाण्डे श्रीरामं प्रति विश्वामित्रः—

भृशाश्वतनयान्राम भास्करान्कामरूपिणः ।
प्रतीच्छ मम भद्रं ते पात्रभूतोऽसि राघव ॥

बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना ।
दिव्यभास्करदेहाश्च मूर्तिमन्तः सुखप्रदाः ॥

केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा ।
चन्द्रार्कसदृशाः केचित्प्रह्वाञ्जलिपुटास्तथा ॥

रामं प्राञ्जलयो भूत्वाब्रुवन्मधुरभाषिणः ।
इमे स्म नरशार्दूल शाधि किं करवाम ते ॥

मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ ।
गम्यतामिति तानाह यथेष्टं रघुनन्दनः ॥

अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम् ।
वयमस्त्विति काकुत्स्थं जग्मुरुक्त्वा यथागतम् ॥

छान्दोग्ये— 'अस्य यज्ञैकां शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहाति अथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति । जीवापेतं वा व किलेदं म्रियते न जीवो म्रियते' इति । तथा तैत्तिरीयके— 'स वनस्पतीनुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति तेऽब्रुवन् वरं वृणामहै वृक्णान् पराभविष्यन्तो मन्यामहे ततो मा पराभूमेत्याब्रश्चनाद्वो भूयांस उत्तिष्ठानित्यब्रवीत् । तस्मादाब्रश्चनाद्वृक्णाणां भूयांस उत्तिष्ठन्ति वारे वृतं ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्' इति । तत्रैव 'स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रतिगृहाण' इति । 'साब्रवीद्वरं वृणे खातात्पराभविष्यन्तीति मन्ये ततो मा पराभूवमिति पुरा ते संवत्सरादपि रोहादित्यब्रवीत्तस्मात्पुरा संवत्सरात्पृथिव्यै खातमपि रोहति वारे वृतं ह्यस्य इति प्रजापतिरग्निमचिनुत तं पृथिव्यब्रवीत् न मय्यग्निं चेष्यसेति मा धक्ष्यति सा त्वाति-

दह्यमाना विभमिष्ये स पापीयान् भविष्यसि' इति । मनुरपि— 'ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः । अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥ पुष्पिणः फलिनश्चैव वृक्षास्तूभयथा स्मृताः । गुच्छगुल्मं तथैव तृणजातयः ॥ बीजकाण्डरुहाण्येव प्रतानावल्ल्य एव च । तमसा बहुरूपेण वेष्टिताः कर्महेतुना ॥ अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः' इति । भारते— लाङ्गलेन स्वप्रवाहमाकर्षन्तं बलरामं प्रति 'तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत् । प्रसीद नाथ भीतास्मि प्रतिलोमेन कर्मणा ॥' मोक्षधर्मे नारदाश्वसिलसंवादे वृक्षौषधितृणानि प्रति ब्रह्मणो वाक्यम् 'ततो वृक्षौषधितृणं समाहूय पितामहः । देवेनाभिहितानस्मान्न पुनर्हन्तुमर्हसि ॥ वयमग्निं तथा शीतं वर्षं च पवनेरितम् । सहामः सततं देव तथा च्छेदनभेदने ॥ ब्रह्मवध्यामिमामद्य भवतः शासनाद्वयम् । प्रहीष्यामोऽलोकेन सोक्षं चिन्तयतां भवान् । ब्रह्मोवाच 'पर्वकाले तु संप्राप्ते यो वै च्छेदनभेदने । करिष्यति नरो मोहात्तमेवानुगमिष्यति ॥ भीष्म उवाच— ततो वृक्षौषधितृणमेवमुक्तं महात्मना । ब्रह्माणमभिसं-

पूज्य जगामाशु यथागतम् ॥' इति । विष्णुपुराणेऽपि— 'ततो मही महीपाल भारार्ता भयपीडिता । जगाम शरणं देवं सर्वभूतपितामहम् ॥ वन्द्यमानं मुदोपेतैर्ब्रह्मवन्दे चैनमेत्य सा' । कालिदासः—'अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः । कुशः प्रवासस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत् ॥ सा साधु साधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभासः । जेतुः परेषां जयशब्दपूर्वं तस्थाञ्जलिं बन्धुमतो बबन्ध ॥ तां सोऽनपोढार्गलमन्यगारं छायामिवादर्शतलं प्रविष्टाम् । सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥ लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते । विभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ॥ का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते । आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥ तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन । तस्याः पुरः सम्प्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ॥' इति । हरिवंशे— 'सोऽनुमान्य सुरान्सर्वान्कृष्णवाक्यं निवेद्य च । सभां सुधर्मामादाय पुनरायां-

न्महीतलम् ॥ सा ह्यक्षय्या सभा रम्या कामगा कामरूपिणी' । विष्णुपुराणे—'सभा सुधर्मा कृष्णेन मर्त्यलोके समुज्झिते । स्वर्गं जगाम मैत्रेयः पारिजातश्च पादपः' । भारते अश्वपतिनामा मद्राधिपतिरपत्योत्पादनायाष्टादशवर्षपर्यन्तम् 'हुत्वा शतसहस्रं स सावित्र्या राजसत्तमः । षष्ठे षष्ठे तथा काले बभूव मितभोजनः ॥ पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् । रूपिणी तु तदा राजन्दर्शयामास तं नृपम् ॥ अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता । उवाच चैनं वरदा वचनं पार्थिवं तदा ॥' सभापर्वणि—'शक्रस्य तु सभा दिव्या भास्वरा कर्मभिर्जिता । स्वयं शक्रेण कौरव्य निर्मितार्कसमप्रभा ॥ विस्तीर्णा योजनशतं शतमध्यर्धमायता ॥ वैहायसी कामगमा पञ्चयोजनमुच्छ्रिता । जराशोकक्लमापेता निरातङ्का शिवा शुभा ॥ वेश्मासनवती रम्या दिव्यपादपशोभिता ।' हरिवंशेऽपि—'चकार वायोराह्वानं भूयश्च पुरुषोत्तमः । सप्राणः प्राणभूतानामुपतस्थे गदाधरम् ॥ तमुवाच ततः कृष्णो रहस्यं पुरुषो हरिः । मारुतं जगतः प्राणं रूपिणं समुपस्थितम् ॥' अत्यल्पमिदमुच्यते । बृहदारण्यके—

'यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः एवमप्सु अग्नौ अन्तरिक्षे वायौ दिवि आदित्ये दिक्षु चन्द्रतारके आकाशे तमसि तेजसि इत्यधिदैवतम् । यः सर्वेषु भूतेषु इत्यधिभूतं प्राणे वाचि चक्षुषि श्रोत्रे मनसि त्वचि ज्ञाने रेतसि इत्यध्यात्मम्' इत्येवं पृथिव्यादीनां 'यं पृथिवी न वेद' इत्यादिना ब्राह्मणः पृथिवीकर्तृकदर्शनविषयत्वाभावप्रतिपादनान्यथानुपपत्त्या पृथिव्यादीनां सर्वेषामपि चैतन्यावगमात् यस्य पृथिवी शरीरमित्यनेन परमेश्वरस्य सर्वत्राविर्भावचनात् परमेश्वरेणैव चेतनेन सर्वेषामपि भूतानां चैतन्यं सिद्ध्यति । अत एव 'पुरुषमेधे ब्राह्मणे ब्राह्मणमालभत' इत्यादिश्रुतौ देवतात्वेन अवगतानां ब्राह्मणत्वादिजातीनां लोके अचेतनत्वेन प्रसिद्धानामपि परमेश्वराविर्भावप्रयुक्तचैतन्यवत्त्वादेवतात्वमुपपद्यते । अत एव विभूत्यध्याये शुक्लानुपतने च परमेश्वराविर्भावाधीनमेव चैतन्यं विग्रहवत्त्वादिकं सर्वस्येति प्रतिपादितम् । तथा हि गीतायाम्— 'हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः शुक-

श्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ अहमात्मा गुडाकेश सर्वभूताशये स्थितः । अहमादिश्च मध्यं च भूतानामन्त एव च ॥' इत्यादिना स्वस्य सर्वात्मकतामतिज्ञापूर्वकम् 'आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्' इत्यारभ्य 'मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्' इत्यन्तेन आदित्यादिव्यष्टिरूपतां प्रतिपाद्य संग्रहेण समष्टिरूपत्वमुपसंहरति 'यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप । एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया । यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् । अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥' इति । मोक्षधर्मे शुकानुपतने– 'ततो द्वैपायनसुतं बहुमानात्समन्ततः । कृताञ्जलिपुटाः सर्वा निरीक्षन्ते स्म देवताः ॥ अब्रवीत्तांस्तदा वाक्यं शुकः परमधर्मवित् । पिता यद्यनुगच्छेन्मां क्रोशमानः शुकेति वै ॥ ततः प्रतिवचो देयं सर्वैरेव समाहितैः । शुकस्य वचनं श्रुत्वा दिशः सर्वा सकानना ॥ चमुद्राः

सरितः शैलाः प्रत्यूचुस्तं समाहिताः । यथा ब्रूषे विप्र बाढमेवं भविष्यति ॥ ऋषेर्व्याहरतो वाक्यं प्रतिवक्ष्यामहे वयम् ।' इति । मोक्षधर्मे भृगुभरद्वाजसंवादे भरद्वाजः— 'पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः । स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ॥ अनुष्मणामचेष्टानां घनानां चैव सत्त्वतः । वृक्षाणां वै न लक्ष्यन्ते शरीरे पञ्च धातवः ॥ न पश्यन्ति न रृण्वन्ति न गन्धरसवेदिनः ॥ न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः । अद्रवत्वादनग्नित्वादभूमित्वादवायुतः ॥ आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौतिकम् ।' भृगुरुवाच—'घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः । तेषां पुण्यफलव्यक्तिर्नित्यं समुपपद्यते ॥ ऊष्मतो म्लायते पर्ण त्वक्फलं पुष्पमेव च । म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते । वायव्यग्न्यशनिनिर्घोषैः फलपुष्पं विशीर्यते ॥ श्रोत्रेण गृह्यते शब्दः तस्माच्छृण्वन्ति पादपाः । पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि । अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥ पादैः सलिलपानैश्च व्याधीनां चापि दर्शनात् ।

व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ॥ वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददत् । तथा पवनसंयुक्तः पादैः पिबति पादपः ॥ सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात् । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥ तने तज्जलमादत्तं जरयत्यग्निमारुते । आहारपरिणामाच्च तेषां वृद्धिश्च जायते ॥ एवं च जगन्मात्रस्य ईश्वरानुप्रवेशप्रयुक्तचैतन्यमादाय संबोध्यत्वसंभवेन नदीसमुद्रपुरीपर्वततरुवनस्पतिविमानादीनां संबोध्यत्वादिकमुपपन्नमेव । ततो बहुदूरं गतौ रामलक्ष्मणौ,

तौ तत्र हत्वा चतुरो महामृगा-
न्वराहमृश्यं पृषतं महारुरुम् ।
आदाय मेध्यांस्त्वरितं बुभुक्षितौ
वासाय काले ययतुर्वनस्पतिम् ॥

त्रिपञ्चाशे, ततः कृतसायंसन्ध्यो रामभद्रः लक्ष्मणमेवमवोचत् अद्य प्रभृति जागरणेनैवाप्रमत्तास्थां सीता संरक्षणीया, मत्प्रवासनेनातिदुःखितं राजानं कृतकामा

कैकेयी खपुत्रराज्यस्थैर्येच्छया किं करिष्यति वेद्मीतिदुः-
खितं मे मनः ।

इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमम् ।
काम एवार्थधर्माभ्यां गरीयानिति मे मतिः ॥

को ह्यविद्वानपि पुमान्प्रमदायाः कृते त्यजेत् ।
छन्दानुवर्तिनं पुत्रं ततो मामिव लक्ष्मण ॥

अर्थधर्मौ परित्यज्य यः काममनुवर्तते ।
एवमापद्यते क्षिप्रं राजा दशरथो यथा ॥

इति । अर्थधर्मौ परित्यज्य काममुपसेवमानस्य अवस्था-
कथनेन केवलकामासक्तिर्न कर्तव्येति सूचितम् । तथा
च वनपर्वणि युधिष्ठिरं प्रति भीष्मवचनम्— 'यश्च धर्मं
च कामार्थं नेतरार्थेऽनुतिष्ठति । मिलाणि तस्य नश्यन्ति
धर्मार्थाभ्यां च हीयते ॥ तस्य धर्मार्थहीनस्य कामार्थौ
निधनं ध्रुवम् । कामतो रममाणस्य मीनस्येवाम्भसः
क्षये ॥ तस्माद्धर्मार्थयोर्नित्यं न प्रमाद्यन्ति पण्डिताः ।
ननु अत्र कैकेय्यासक्तहृदयो राजा धर्मार्थविनवेक्ष्य काम-

वशादेव पुत्रं परित्यक्तवानिति रामेणोक्तमित्यवगम्यते । तदनुपपन्नम्, 'धर्मपाशेन बद्धोऽस्मि' इति दशरथवचनपर्यालोचनया, 'पितरं सत्यमिच्छामि' इति रामवचनपर्यालोचनया च पूर्वप्रदत्तवरनिर्वहणरूपधर्मार्थमेव रामविवासनेन कामप्रयुक्तत्वाभावादिति चेत्, सत्यम् । युद्धार्थं गमनसमये कैकेयीविश्लेषासहिष्णुना राज्ञा युद्धभूम्यां कैकेयीनयनं कामप्रयुक्तमेवेति, तन्मूलकवरप्रदानतत्परिपालनादिकं सर्वमपि पारम्पर्येण काममूलकमेवेत्येतदभिप्रायेणैव रामेणोक्तमिति न विरोधः । 'नूनं जात्यन्तरे कस्मिन्स्त्रियः पुत्रैर्वियोजिताः । जनन्या मम सौमित्रे तामप्येतदुपस्थितम् ॥ अनेन जन्मान्तरेऽस्मिन्वा जन्मनि येन यादृशं कर्म कृतं तस्य तादृशं फलं भवतीति सूचितम् । तथा च कर्मविपाके 'वर्तमानशरीरेण संपन्नं कर्म देहिनः । इह वामुत्र वा तस्य तद्ददाति फलं शुक' इति ।

अल्पभाग्या हि मे माता कौसल्या रहिता मया ।
शेते परमदुःखार्ता पतिता शोकसागरे ॥

एको ह्यहमयोध्यां च पृथिवीं चापि लक्ष्मण ।

तपेयमिषुभिः क्रुद्धो ननु वीर्यमकारणम् ॥

अधर्मभयभीतश्च परलोकस्य चानघ ।
तेन लक्ष्मण नाद्याहमात्मानमभिषेचये ॥

इति । अनेन शत्रुणापि बलात्कारेण धर्मविरुद्धं न कर्तव्यमिति सूचितम् । तथा च वनपर्वणि युधिष्ठिरं प्रति मार्कण्डेयवचनम्— 'नृपाश्च नाभागभगीरथादयो महीमिमां सागरान्तां विजित्य । सत्येन तेऽप्यजयंस्तात लोकान्नेशे बलस्येति चरेदधर्मम् ॥ अलर्कमाहुर्नरवर्य सन्तं सत्यव्रतं काशिकरूशराजम् । विहाय राज्यानि वसूनि चैव नेशे बलस्येति चरेदधर्मम् ॥' इति ।

एतच्चान्यच्च करुणं विलप्य विजने बहु ।
अश्रुपूर्णमुखो रामो निशि तूष्णीमुपाविशत् ॥

ततस्तत्र सुखासीनौ नातिदूरे निरीक्ष्य ताम् ।
न्यग्रोधे सुकृतां शय्यां भेजाते धर्मवत्सलौ ॥

इति अयोध्याकाण्डे प्रथमो भागः ॥